वृत्तानि मौक्तिकानीव कानिचिद्विचिनोम्यहम् ॥ २ ॥
वेदानां प्रथमाङ्गस्य कवीनां नयनस्य च ।
पिङ्गलाचार्य्यसूत्रस्य मया वृत्तिर्विधास्यते ॥ ३ ॥
क्षीराब्धेरमृतं यद्वदुद्धृतं देवदानवैः ।
छन्दोऽब्धेः पिङ्गलाचार्य्यच्छन्दोऽमृतं तथोद्धृतम् (१) ॥ ४ ॥

इह हि त्रैवर्णिकानां साङ्गस्य वेदस्याध्ययनमाम्नायते (२) अर्थावबोधपर्य्यन्तत्वाध्ययनविधिः । वेदाङ्गञ्च छन्दः । ततस्तदध्ययनं विधिबोधितत्वादनुष्ठेयम् (३)। अथ अनुष्टुभा यजति बृहत्या गायति गायत्र्या स्तौतीत्येवमादिश्रवणादर्थान्वयायातमनुष्टुबादिज्ञानम् । किञ्च, छन्दसामपरिज्ञानात् प्रत्युत(४) प्रत्यवाय श्रूयते । यथा । "यो ह वा अविदितार्षेयच्छन्दोदैवतविनियोगेन ब्राह्मणेन मन्त्रेण याजयति वाऽध्यापयति वा, स स्थाणुं वर्च्छति गर्त्तं वा पद्यते वा प्रमीयते पापीयान् भवति यातयामान्यस्य च्छन्दांसि भवन्ति" इति च्छन्दोगब्राह्मणं (५) । तस्माच्छन्दःपरिज्ञानं कर्त्तव्यम् । तदर्थमिदं शास्त्रमारभ्यते । तत्र लघुनोपायेन शास्त्रावबोधसिद्धार्थं सञ्ज्ञाः परिभाषते सूत्रकारः (६) ।

---

१ ख, ग, चिह्नितपुस्तकयोः १, ३, ४, सङ्ख्यकाः श्लोका न सन्ति ।
२ अध्ययन श्रूयते इति ख, चिह्नितपुस्तकपाठः ।
३ विधिबोधितत्वात्तदनुष्ठेयमिति क ग, चिह्नितपुस्तकपाठः ।
४ प्रत्युत प्रत्यवाय इति ख, चिह्नितपुस्तकपाठः ।
५ पापीयान् भवतीति च्छन्दोगानामार्षेयब्राह्मणे इति ग, चिह्नितपुस्तकपाठः ।
६ ख, ग, चिह्नितपुस्तकद्वये मयाऽनेनैक श्लोकोऽपि न पठितः । अन्ये १, ३, ४, ५, ६, सङ्ख्यकश्लोकास्तु न पठिताः ।

धी श्री स्त्री म् ॥ १

धी श्री स्त्रीत्यनेन गुरुत्रयं सञ्ज्ञित्वेनोपलक्षयति, मकारश्च सञ्ज्ञात्वेन। तत्रायमर्थः, सर्व्वगुरोस्त्रिकस्य मसञ्ज्ञा(१) परिभाष्यते। धादीनामुपादानप्रयोजनमुपरिष्टाद्‌ वक्ष्यामः। मप्रदेशाः "विद्युन्माला मौ गौ" इत्येवमादयः॥

वरा सा य् ॥ २ ॥

वरा सा इत्यनेनादिलघोस्त्रिकस्य यसञ्ज्ञा (२) परिभाष्यते। यप्रदेशाः "भुजङ्गप्रयातं यः" इत्येवमादयः॥

का गुहा र् ॥ ३ ॥

का गुहा इत्यनेन मध्यलघोस्त्रिकस्य रसञ्ज्ञा(३) परिभाष्यते। रप्रदेशाः "स्रग्विणी रः" इत्येवमादयः॥

वसुधा स् ॥ ४ ॥

वसुधा इत्यनेनान्तगुरोस्त्रिकस्य ससञ्ज्ञा(४) परिभाष्यते। सप्रदेशाः "तोटकं सः" इत्येवमादयः॥

---

१ मकारः सञ्ज्ञा इति ख, चिह्नितपुस्तकपाठः।
२ य इति सञ्ज्ञा इति ख, चिह्नितपुस्तकपाठः।
३ र इति सञ्ज्ञा इति ख, चिह्नितपुस्तकपाठः।
४ स इति सञ्ज्ञा इति ख, चिह्नितपुस्तकपाठः।

सा ते क्न त् ॥ ५ ॥

सा ते क इत्यनेनान्तलघोस्त्रिकस्य तकारः सञ्ज्ञात्वेनोपादीयते (१)। तप्रदेशाः " तजुमध्या त्यौ" इत्येवमादयः ॥

कदा स ज् ॥ ६ ॥

कदा स इत्यनेन मध्यगुरोस्त्रिकस्य जसञ्ज्ञा(२)परिभाष्यते। जप्रदेशाः "कुमारललिता ज्सौ ग्" इत्येवमादयः ॥

किं वद भ् ॥ ७ ॥

किं वद इत्यनेनादिगुरोस्त्रिकस्य भसञ्ज्ञा ज्ञाप्यते (३)। भप्रदेशः " चित्रपदा भौ गौ" इत्येवमादयः ॥

न हसन् ॥ ८ ॥

न हस इत्यनेन सर्व्वलघोस्त्रिकस्य नसञ्ज्ञोपदिश्यते(४)। नप्रदेशाः "दण्डको नौ रः" इत्येवमादयः ॥

गृ ल् ॥ ९ ॥

गग्रहणं लस्यैकाक्षरोपलक्षणार्थम्। तस्य लकारसञ्ज्ञा

भवति (१)। लशब्दश्च लघुवाचकः। तेन ह्रस्वमक्षरं लघुसञ्ज्ञं भवतीत्यर्थः सम्पद्यते। लप्रदेशाः "लः समुद्रा गण." इत्येवमादयः ॥

गन्ते ॥ १० ॥

ग्रग्रहणमनुवर्त्तते। ग्रशब्दोपलक्षितस्य ह्रस्वाक्षरस्य पादान्ते वर्त्तमानस्य गुरुसञ्ज्ञाऽतिदिश्यते (२)। ग् इति प्रथमाक्षरप्रतीकेन गुरुशब्दस्य ग्रहणं (३)। ननु ग्लिति समानीत्यादीनां (४) पादान्ते वर्त्तमानस्य ह्रस्वस्य गुरुत्वं न दृश्यते। नैष दोषः। सर्व्वत्र पादान्ते वर्त्तमानस्य ह्रस्वस्य गुरुत्वमुत्सर्गसिद्धं। तच्च लकारस्योत्सर्गापवादेन बाध्यते। यथा। ग्लिति समानी, गीत्यार्य्या ल इत्यादौ सामान्यस्य विशेषेण बाधः कस्य न सम्मत. (५)। तस्मादचोद्यमेतत् (६)। केचिदिदं सूत्रं व्यवस्थितविभाषया व्याचक्षते, प्रमाणा-

---

१ ग्र इत्यनेनोपलक्षितस्य ह्रस्वस्य ल इति सञ्ज्ञा परिभाष्यते इति पुस्तकान्तरपाठः।

२ गुरुसञ्ज्ञा परिभाष्यते इति ख, चिह्नितपुस्तकपाठः। गुरुसञ्ज्ञा निर्दिश्यते इति पुस्तकान्तरपाठः।

३ प्रथमाक्षरस्य ग्रहणेन गुरोर्ग्रहणमिति ग, चिह्नितपुस्तकपाठः।

४ ननु ग्लितिसमानीगीत्यार्य्यादीनामिति ख, चिह्नितपुस्तकपाठः। ननु समानीगीत्यार्य्यादीनामिति ग, चिह्नितपुस्तकपाठः, पुस्तकान्तरपाठश्च।

५ इत्यादौ उत्सर्गस्यापवादेन बाधः कस्य न सम्मत इति पुस्तकान्तरपाठः। इत्यादौ उत्सर्गस्यापवादोऽपि बाधकत्वेन सम्मत इति ख, चिह्नितपुस्तकपाठः।

६ तस्मात् कुचोद्यमेतदिति ख, ग, चिह्नितपुस्तकपाठः।

दीनामन्ते गुरुत्वमेव, समान्यादीनामन्ते लघुत्वमेव, (१) शेषाणामिच्छया गुरुत्वं लघुत्वञ्चेति। तदनुपपन्नं। विकल्पस्याप्रस्तुतत्वात् कस्य व्यवस्थेति न विद्मः। ननु केनाप्युक्तं, "वा पादान्ते गुरु" इति (२) गुरुत्वं। सत्यमुक्तं। दुरुक्तं हि तत्। वान्ते गुरु इति(३) प्रोक्तं यैस्तु श्वेतपटादिभिः। उत्सर्गस्यापवादेन बाधस्तैर्नावधारितः॥ इत्युक्तं इच्छया गुरुत्वं लघुत्वञ्च नोपपद्यते। कस्येच्छया, किं शास्त्रकारस्य कवेर्वा। न तावदाद्यः पक्षः। सूत्रेष्वदर्शनात्। नापि द्वितीयः। कवेरपि इच्छायां(४) व्यवस्थाभावात्, को जानाति कस्य कीदृशीच्छेति। अन्ये त्वाहुः। ननु पादान्ते वर्त्तमानस्य ह्रस्वस्य पाणिनिना गुरुसञ्ज्ञा न कृता। तेनोक्तं "संयोगे गुरु, दीर्घञ्च" (१।४।११-१२) इति। नायं संयोगादिर्न च दीर्घः। तस्मात् गन्त इति सूत्रमयुक्तं। एवोच्यते। पाणिनिना स्वशास्त्रप्रयोजनार्थं गुरुसञ्ज्ञा कृता। "गुरोश्च हलः" (३।३।१०३) इत्यकारः प्रत्ययो यथा स्यात्। कुण्डा हुण्डा ईहाञ्चक्रे ऊहाञ्चक्रे इत्येवमादीनां "इजादेश्च गुरुमतोऽनृच्छः" इति (३।१।३६) सूत्रेणाम्प्रत्ययश्च (५)। पादान्ते वर्त्तमानस्य लघोर्गुरुत्वाति-

---

१ ख, ग, चिह्नितपुस्तकद्वये लघुत्वमेवेत्यस्यापि समान्यादिषु व्यवस्था प्रमाणमित्यधिक पाठोऽस्ति।

२ पादान्ते त्वक इति ख, चिह्नितपुस्तकपाठः, पुस्तकान्तरपाठश्च।

३ वान्ते त्वक इतीति ख, चिह्नितपुस्तकपाठः।

४ कवेरिच्छायामपीति ख, चिह्नितपुस्तकपाठः।

५ ईहाञ्चक्रे ऊहाञ्चक्रे इत्येवमादिष्वाम्प्रत्ययोऽपीति ख, चिह्नितपुस्तकपाठः।

देशे पाणिनेः प्रयोजनमेव नास्ति। किञ्चानुस्वारादिपूर्व्वस्य वर्णस्य वनं घटः सम्पदित्यादौ स्थितस्य गुरुसञ्ज्ञा पाणिनिना न कृता, किमेतावता अन्यैरपि न कर्त्तव्या। तस्मात् सूत्रमिदं "गन्ते" इति। गप्रदेशाः "गावन्त आपीडः" इत्येवमादयः॥

ग्रादिपरः॥ ११॥

ग्र इति व्यञ्जनसंयोगस्योपलक्षणम्। ग्र आदिर्येषां ते ग्रादयः। 'आदि'पदेन विसर्जनीयानुस्वारजिह्वामूलीयोपध्मानीयानां ग्रहणं। ग्रादयः परे यस्मात् सः ग्रादिपरः। ततश्चायं सूत्रार्थः, व्यञ्जनसंयोगात् पूर्व्वस्य ह्रस्वस्य (१) अनुस्वारविसर्जनीयजिह्वामूलीयोपध्मानीयेभ्यश्च गुरुसञ्ज्ञातिदिश्यते॥

हे॥ १२॥

ग इत्यनुवर्त्तते। हे इति द्विमात्रोपलक्षणार्थं। ततश्चायं सूत्रार्थः, द्विमात्रस्य (२) दीर्घस्य गकारसञ्ज्ञा क्रियते॥

लौ सः॥ १३॥

---

१ पूर्व्वस्मिन्ह्रस्वस्यैकमात्रिकस्येति ख, चिह्नितपुस्तकपाठ। पूर्व्वस्यैकमात्रिकस्येति ग, चिह्नितपुस्तकपाठः। पूर्व्वस्य ह्रस्वमात्रिस्येति पुस्तकान्तरपाठः।

२ द्विमात्रिकस्येति ख, ग, चिह्नितपुस्तकपाठ, पुस्तकान्तरपाठश्च।

ग इति गकारस्य परामर्शः । स गकारो द्विमात्रो द्वौ लघू कृत्वा गणनीयः (१) ॥

ग्लौ ॥ १४ ॥

अधिकारोऽयमाशास्त्रपरिसमाप्तेः । यत्र विशेषान्तरं न श्रूयते तत्र ग्लावित्युपतिष्ठते । गायत्र्या वसवः (३।३) इत्येवमादिषुवत् कृतेनेह व्यवहारो नास्ति ॥

अष्टौ वसव इति ॥ १५ ॥

अत्र शास्त्रे वसव इत्युच्यमानेऽष्टसङ्ख्योपलक्षिता गुरुलघुस्वरूपा वर्णाः (१) गृह्यन्ते । लौकिकप्रसिद्ध्युपलक्षणार्थमिदं सूत्रं । तेन चतुर्णां समुद्राः, पञ्चानामिन्द्रियाणामित्येवमादय: सङ्ख्याविशेषा लौकिकेभ्य (१) प्रत्येतव्याः । 'इति'कारोऽध्यायसमाप्तिसूचकः ॥

इह ध्यादीनामुपादानप्रयोजनं वर्ण्यते । अध्ययनात् धीर्भवति । यस्य धीमत्तस्य श्रीः, बुद्धिपूर्वकत्वात् विभूतेः । यस्य श्रीमत्तस्य स्त्री, गार्हस्थ्यमूलकत्वात् गार्हस्थ्यस्य । यदा सा द्रव्य,

नेन सर्व्वेषां स्त्रीसाधनोपायानां बुद्धिरुपायस्य माहात्म्यं दर्शयति, तथाचोक्तम्,

> "अर्द्धाङ्गुलपरोणाहजिह्वाग्रायासभीरवः ।
> सर्व्वाङ्गीण(१)परिक्लेशमबुधाः कर्म्म कुर्व्वते" ॥

तत्राह शिष्यः, का गुहा । 'गुहा'शब्दः स्थानपर्य्यायः । 'का गुहा,' यत्रासौ तिष्ठति । उपाध्यायो ब्रूते । 'वसुधा' पृथिव्यां(२), लभ्यते धीर्नात्रातिविषादः कर्त्तव्यः । पुनरप्याह शिष्यः, सा ते क्व । 'सा' धीः, त्वयोपदिष्टा, पृथिव्यां 'क्व', स्थितेन,(३) लभ्यते । गुरुराह, (४) गृहे । पुनरप्याह शिष्यः, कदा सः । 'सः' गृहस्थः पुरुषः, 'कदा' कस्मिन् काले, तां धियं प्राप्नोति ॥ अत्रोत्तरम्, (५) धादिपरः । धारणार्थाव बोधपरोऽसौ यदा स्यात् तदा धियं लभते । भूयोऽपि प्रश्नः, किं वद । 'किं,' कुर्व्वन् असौ तां धियं लभते तत् 'वद' (६) । तत्रोत्तरम्, न हसन् । हासादि-चापल्यं (७) अकुर्व्वाणस्तां धियं लभते इत्यर्थः ॥

इति भट्टहलायुधकृतौ छन्दोवृत्तौ (८) प्रथमोऽध्यायः ॥ १ ॥

---

१ सर्व्वाङ्गिकेति पुस्तकान्तरपाठः ।

२ पृथिव्यामेवेति ख, ग, चिह्नितपुस्तकपाठः । पुस्तकान्तरपाठश्च ।

३ क्व आश्रमे स्थितेनेति पुस्तकान्तरपाठः ।

४ तत्राचार्य्यो ब्रवीति इति ग, चिह्नितपुस्तकपाठः, पुस्तकान्तरपाठश्च ।

५ तत्रोत्तरमिति ख, चिह्नितपुस्तकपाठः ।

६ लभते इति ब्रूहि इति ख, चिह्नितपुस्तकपाठः । पुस्तकान्तरपाठश्च ।

७ हासादिचापल्यमिति ख, चिह्नितपुस्तकपाठः । पुस्तकान्तरपाठश्च ।

८ इति हलायुधभट्टकृतायां पिङ्गलछन्दोवृत्तौ इति ख, चिह्नितपुस्तकपाठः । इति हलायुधभट्टकृतायां पिङ्गलसूत्रवृत्तौ इति ग, चिह्नितपुस्तकपाठः ।

अथ द्वितीयोध्याय ।

१	छ०	गा०	उ०	अ०	बृ०	प०	त्रि०	ज०
२	आर्षी	२४	२८	३२	३६	४०	४४	४८
३	दैवी०	१	२	३	४	५	६	७
४	आसु०	१५	१४	१३	१२	११	१०	९
५	प्राजा०	८	१२	१६	२०	२४	२८	३२
६	याजु०	६	७	८	९	१०	११	१२
७	साम्नी	१२	१४	१६	१८	२०	२२	२४
८	आर्ची	१८	२१	२४	२७	३०	३३	३६
९	ब्राह्मी०	३६	४२	४८	५४	६०	६६	७२

---

१ एतच्चतुरङ्कक्रीडाचक्रं ख लिखितपुस्तके द्वितीयाध्यायादौ छन्द इति सूत्रस्य पूर्वं लिखितम्। किन्तु क, ग, लिखितपुस्तकद्वये नास्त्यलिखितमस्ति। तत्तु तत्तु सूत्राद्युदाहरणप्रसङ्गादस्य नचैव विन्यास अपेक्षित इति मन्यामहे।

२ प्राग्यजुषामार्षं (सू०२।१६) इत्यस्योदाहरणम् ।

३ दैव्येकम् (सू०२।३) एकैकं शेषे (सू०२।११) इत्यनयोरुदाहरणम्।

४ आसुरी पञ्चदश (सू०२।४) अन्त्यादासुरी (सू०२।१७) इत्यनयोरुदाहरणम्।

५ प्राजापत्याष्टौ (सू०२।५) चतुरश्चतुरः प्राजापत्यायाः (सू०२।११) इत्यनयोरुदाहरणम्।

६ याजुषी षट् (सू०२।६) एकैकं शेषे (सू०२।१०) इत्यनयोरुदाहरणम्।

७ साम्न्यौ द्विः (सू०२।७) द्वौ द्वौ साम्नां वर्धेत (सू०२।१२) इत्यनयोरुदाहरणम्।

८ आर्च्यो त्रिः (सू० २।८) त्रीणि ऋचाम् (सू० २।१०) इत्यनयोरुदाहरणम्।

९ तिस्रस्तिस्रः सजातीयाः एकैका ब्राह्मी (सू०२।१४) इत्यस्योदाहरणम्।

(११) छन्दः ॥ १ ॥

अधिकारोऽयमाशास्त्रपरिसमाप्तेः । इत ऊर्द्ध्वं यद्वक्ष्यामश्छन्दस्तत्रोपतिष्ठते । छन्दःशब्देनाक्षरसङ्ख्यावत् छन्दोऽत्राभिधीयते ॥

(अथ गायत्र्यधिकारः ।)

(१२) गायत्री ॥ २ ॥

अधिकारोऽयमाद्वादशसूत्रपरिसमाप्तेः । "तान्युष्णिग्" इत्यादिसूत्रात् (१) प्राक् यदुच्यते छन्दः, तद् गायत्रीसञ्ज्ञं वेदितव्यम् ॥

(१३) दैव्येकम् ॥ ३ ॥

एकाक्षरं छन्दो दैवीगायत्रीति सञ्ज्ञायते । तत्रायं प्रदर्शनोपायः । चतुरङ्गक्रीडायामिव चतुःषष्टिकोष्ठान् (२) लिखित्वा, प्रथमपङ्क्तौ आर्षीनाम लिखित्वा द्वितीयादिकोष्ठेष्वङ्कानामुपरि गायत्र्यादिसप्तच्छन्दसां नामानि विन्यसेत् । ततो द्वितीयायां (३) पङ्क्तौ प्रथमे कोष्ठे दैवीशब्दं विन्यसेत् । सञ्ज्ञाज्ञापनार्थं द्वितीये एकसङ्ख्याकमङ्कम् (४) ॥

१ इति सूत्रादिति ग, चिह्नितपुस्तकपाठः ।

२ कोष्ठाकाराणि इति ख, ग, चिह्नितपुस्तकपाठः ।

३ द्वितीयपङ्क्ताविति ख, ग, चिह्नितपुस्तकपाठः । पुस्तकान्तरपाठश्च ।

४ एकसङ्ख्याङ्कमेकं लिखेदिति ख, चिह्नितपुस्तकपाठः ।

(१९) आसुरी पञ्चदश ॥ ४ ॥

आसुरी गायत्री पञ्चदशाक्षरा । तानि चाक्षराणि "ग्लौ" (१।१४) इत्यधिकारात् गुरूणि लघूनि च यथासम्भवं द्रष्टव्यानि । तत्र तृतीयस्यां पङ्क्तौ प्रथमे कोष्ठे आसुरीशब्दं व्यवस्थाप्य द्वितीये पञ्चदशसङ्ख्याङ्कं विन्यसेत् (१) ॥

(२०) प्राजापत्याऽष्टौ ॥ ५ ॥

(१) प्राजापत्या गायत्री अष्टाक्षरा भवति । यत्र क्वचिद् वेदेऽष्टाक्षरं छन्दः सा (२) प्राजापत्या गायत्रीति ज्ञेयम् । तत्र चतुर्थ्यां पङ्क्तौ प्रथमे कोष्ठे प्राजापत्याशब्दं लिखित्वा द्वितीयेऽष्टसङ्ख्याङ्कं लिखेत् ॥

(२१) यजुषां षट् ॥ ६ ॥

यजुषां गायत्री षडक्षरा भवति । यत्र क्वचिद् वेदे षडक्षरं छन्दः तत् याजुषी गायत्री(३) सञ्ज्ञायते । तत्र पञ्चम्यां पङ्क्तौ प्रथमे कोष्ठे याजुषीशब्दं (४) व्यवस्थाप्य द्वितीये षट्सङ्ख्याङ्कं लिखेत् ॥

---

१ लिखित्वा द्वितीये कोष्ठे पञ्चदशसङ्ख्याङ्कं लिखेदिति ख, ग, चिह्नितपुस्तकपाठः ।

२ यदष्टाक्षरं छन्दः सा प्राजापत्या गायत्रीति विज्ञायते इति च, चिह्नितपुस्तके ऽष्टाक्षरमिति पाठः ।

३ सम्पद्यते इति क, ख, चिह्नितपुस्तकपाठः । पुस्तकान्तरपाठश्च ।

४ याजुषीति इति ख, चिह्नितपुस्तकपाठः । पुस्तकान्तरपाठश्च ।

५ षट्सङ्ख्याङ्कमिति ख ग, चिह्नितपुस्तकपाठः ।

(११) साम्नां द्विः ॥ ७ ॥

षडित्यनुवर्त्तते । द्विरितिक्रियाभ्यावृत्तिदर्शनात् करोति-रध्याक्रियते(१) । तेन द्विःकृता द्विगुणिता षट्सङ्ख्या साम्नां गायत्री भवति । यत्र क्वचिद् वेदे द्वादशाक्षरं छन्द, तत् साम्नां गायत्रीति सञ्ज्ञायते । तत्र षष्ठ्यां (२) पङ्क्तौ प्रथमे कोष्ठे सामशब्दं लिखित्वा द्वितीये द्वादशसङ्ख्याङ्कं लिखेत् ॥

(१२) ऋचां त्रिः ॥ ८ ॥

षडित्यनुवर्त्तते । अत्रापि पूर्ववत् क्रियाभ्यावृत्तिः, तेन त्रिगुणिता षट्सङ्ख्या ऋचां गायत्री भवति । यत्र क्वचिद् वेदेऽष्टादशाक्षरं छन्दः सा ऋचां गायत्री सञ्ज्ञायते(३) । तत्र (४) सप्तम्यां पङ्क्तौ प्रथमे कोष्ठे ऋक्शब्दं व्यवस्थाप्य द्वितीयेऽष्टादश-सङ्ख्याङ्कं लिखेत् ॥

(१३) द्वौ द्वौ साम्नां वर्द्धेत ॥ ९ ॥

गायत्रीत्यनुवर्त्तते । साम्नां पङ्क्तौ गायत्र्यां द्वौ द्वौ सङ्ख्याङ्कौ गृहीत्वा पूर्वात् पूर्वात् वर्द्धेत, यावदष्टमं कोष्ठं प्राप्नोति । तत्र साम्नां पङ्क्तौ तृतीयादिषु कोष्ठेषु क्रमेण वर्द्धितान्यक्षराणि अङ्केन विन्यसेत् ॥

१ द्विरिति क्रियाभ्यावृत्ति । द्वादशाक्षरं छन्दः साम्नां क्रियते इति ग, चिह्नित पुस्तकपाठ ।

२ षष्ठ पङ्क्ताविति ख, ग, चिह्नितपुस्तकपाठ ।

३ गायत्रीति सञ्ज्ञायते इति ख, चिह्नितपुस्तकपाठ । गायत्री ज्ञेयेति ग, चिह्नित पुस्तकपाठ ।

४ यत्रेति ख ग चिह्नितपुस्तकपाठ ।

(२५) त्रींस्त्रीनृचाम् ॥१०॥

गायत्रीत्यनुवर्त्तते । ऋचां गायत्री त्रींस्त्रीन् सङ्ख्याङ्कान् (१) गृहीत्वा पूर्व्ववत् वर्द्धते । अत्रापि ऋचां पङ्क्तौ तृतीयादिषु कोष्ठेषु त्रिसङ्ख्याकं क्रमेण वृद्धमङ्कं स्थापयेत् (२) ॥

(२६) चतुरश्चतुरः प्राजापत्यायाः ॥११॥

प्रजापत्यायाः पङ्क्तौ गायत्री चतुरश्चतुरःसङ्ख्याङ्कान् गृहीत्वा वर्द्धते । अत्रापि तृतीयादिषु कोष्ठेषु विन्यासः पूर्व्ववदेव ॥

(२७) एकैकं शेषे ॥१२॥

अनुक्तः शेष । यत्र गायत्र्यां सङ्ख्यावृद्धिर्नोक्ता सा एकैकं सङ्ख्याङ्कं गृहीत्वा वर्द्धते । दैवी, याजुषी, च शेषशब्देनोच्यते, आसुर्य्यां विशेषाभिधानात् (३) । तेन दैवी तृतीयादिषु कोष्ठेष्वेकैकमङ्कं (४) गृहीत्वा वर्द्धते । तथैव याजुषी ॥

(२८) जह्यादासुरी ॥१३॥

एकैकमित्यनुवर्त्तते । आसुरी गायत्री एकैकमक्षरं

१ त्रींस्त्रीन् त्रिसङ्ख्याङ्कानिति ख, चिह्नितपुस्तकपाठः ।

२ अत्रापि तृतीयादिकोष्ठेषु त्रिसङ्ख्याकं क्रमेण वृद्ध स्थापयेदिति ख, चिह्नित पुस्तकपाठः ।

३ आसुर्य्यां विशेषाभिधानादिति ख, चिह्नितपुस्तकपाठः । ग, चिह्नितपुस्तक पाठश्च ।

४ कोष्ठेषु क्रमेणैकैकमङ्कमिति ग, चिह्नितपुस्तकपाठः । कोष्ठेषु क्रमेणैकैकम-क्षरमिति घ, चिह्नितपुस्तकपाठः ।

एका ब्राह्मी त्रिष्टुप् भवति। ता एव तिस्रो जगत्यः सङ्गता द्वासप्तत्यक्षरा एका ब्राह्मी जगती भवति। अत्राष्टम्यां पङ्क्तौ प्रथमे कोष्ठे ब्राह्मीशब्दं व्यवस्थाप्य द्वितीयादौ क्रमेण गायत्री-प्रमुखान् (१) षट्त्रिंशदाद्यङ्कान् विन्यसेत् ॥

(११) प्राग् यजुषामार्ष्यं इति॥ १६ ॥

तिस्रस्तिस्र इत्यनुवर्त्तते। यजुषां पङ्क्तेः प्राक् प्राजापत्या, आसुरी, दैवी, इति यास्तिस्रो गायत्र्यास्ताः सङ्गताः सत्यश्चतुर्विंशत्यक्षरा एका आर्षी गायत्री भवति। ता एव तिस्र उष्णिहः सङ्गता अष्टाविंशत्यक्षरा एका आर्षी उष्णिक् भवति। ता एव तिस्रोऽनुष्टुभः सङ्गता द्वात्रिंशदक्षरा एका आर्षी अनुष्टुप् भवति। ता एव तिस्रो बृहत्यः सङ्गताः षट्त्रिंशदक्षरा एका आर्षी बृहती भवति। ता एव तिस्रः पङ्क्तयः सङ्गताश्चत्वारिंशदक्षरा एका आर्षी पङ्क्तिर्भवति। ता एव तिस्रस्त्रिष्टुभः सङ्गताश्चतुश्चत्वारिंशदक्षरा एका आर्षी त्रिष्टुप् भवति। ता एव तिस्रो जगत्यः सङ्गता अष्टाचत्वारिंशदक्षरा एका आर्षी जगती भवति। तत्र प्रथमायां पङ्क्तौ प्रथमे कोष्ठे आर्षीशब्दं व्यवस्थाप्य द्वितीयादिषु चतुर्विंशत्याद्यङ्कान् विन्यसेत्। प्रथमपङ्क्तेर्द्वितीयादिकोष्ठेष्वङ्कानामुपरि गायत्र्या-दीनि नामानि लिखेत्(२)। अयं स्पष्टतरःप्रदर्शनोपाय इति ॥

इति भट्टहलायुधकृतायां छन्दोवृत्तौ द्वितीयोऽध्यायः ॥ २ ॥

---

१ गायत्र्यादीनिति पुस्तकान्तरपाठः।

२ नामानिविन्यसेदिति घ, चिह्नितपुस्तकपाठः। पुस्तकान्तरपाठश्च।

(अथ तृतीयोऽध्यायः ।)

(११) पादः ॥१॥

अधिकारोऽयमाध्यायसमाप्तेः । यदित ऊर्द्धमनुक्रमिष्यामस्तत् पाद इत्यधिकृतं वेदितव्यम् । वक्ष्यति च गायत्र्या वसवः (३।३) इति ॥

(१२) इयादिपूरणः ॥२॥

पाद इत्यनुवर्त्तते । इयादिः पूरणो यस्य स इयादिपूरणः । आदिशब्देन उवादयो गृह्यन्ते । अयमर्थः, यत्र गायत्र्यादौ छन्दसि पादस्याक्षरसङ्ख्या न पूर्य्यते, तत्र इयादिभिः पूरयितव्या । यथा, तत् सवितुर्वरेणियं, दिवं गच्छ सुवःपतइत्यादि(१) ॥

(१३) गायत्र्या वसवः ॥३॥

पाद इत्यनुवर्त्तते । परिभाषेयं । गायत्र्याः पादः 'वसव.' अष्टाक्षराणि, भवन्ति । यत्र यत्र गायत्र्याः पादोऽभिधास्यते, तत्र तत्राष्टाक्षरो ग्राह्यः(२) ॥

(१४) जगत्या आदित्याः ॥४॥

पाद इत्यनुवर्त्तते । परिभाषेयं । जगत्याः पादो द्वादशाक्षरो भवति । यत्र कश्चित् जागतः पादस्तत्र द्वादशाक्षरो गृह्यते ॥

---

१ इत्येवमादय इति ख, चिह्नितपुस्तकपाठः । इत्यादय इति ग, चिह्नितपुस्तकपाठः ।
२ पदोत्तव इति ख, ग, चिह्नितपुस्तकपाठः ।

(३१) विराजो दिशः ॥५॥

पाद इत्यनुवर्त्तते । यत्र क्वचिद् वैराजः पाद इत्युच्यते, तत्र दशाक्षरः प्रत्येतव्यः ॥

(३२) त्रिष्टुभो रुद्राः ॥६॥

त्रैष्टुभः पाद इत्युक्ते सर्व्वत्रैकादशाक्षरो गृह्यते । अस्मिन्नेवाध्याये परिभाषा एतावतस्तः ॥

(३३) एकद्वित्रिचतुष्पादुक्तपादं ॥७॥

एभिश्चतुर्भिर्लक्षणैरुक्त..पादो यस्य तत् 'उक्तपादं,' (१) । यस्य च्छन्दसो यादृशः पादः परिभाषितस्तच्छन्दस्तेनैव पादेन क्वचिदेकपात्, क्वचिद् द्विपात्, क्वचित् त्रिपात्, क्वचिच्चतुष्पाद्, भवति । गायत्री च त्रिपादेव (२) । चतुर्भिरष्टाक्षरैः पादैरनुष्टुबेव भवति(३) ॥

(३४) आद्यं चतुष्पादृतुभिः ॥८॥

'ऋतु'शब्देन लक्षणया षडक्षरः पादोऽभिधीयते । तैः पादैश्चतुष्पादाद्यं गायत्रं(४) छन्दो भवति । एवं चतुर्व्विंशत्यक्षराणि जायन्ते(५) । तत्रोदाहरणम् ।

१ उक्तपादं छन्द इति ख, ग, चिह्नितपुस्तकपाठः । पुस्तकान्तरपाठश्च ।

२ गायत्री त्रिपदैवेति ग, चिह्नितपुस्तकपाठः । गायत्री च त्रिपदैवेति पुस्तकान्तरपाठः ।

३ पादैरनुष्टुबेव स्यादिति ख, ग, चिह्नितपुस्तकपाठः । पुस्तकान्तरपाठश्च ।

४ चतुष्पादं गायत्रमिति ग, चिह्नितपुस्तकपाठः ।

५ प्रभवन्ते इति ख, ग, चिह्नितपुस्तकपाठः । पुस्तकान्तरपाठश्च ।

* इन्द्रः शचीपतिर्बलेन वीलितः।
दुश्च्यवनो वृषा समत्सु सासहिः (१) ॥

(१०) क्वचित्त्रिपादृषिभिः ॥८॥

क्वचिद् वेदे सप्ताक्षरोपलक्षितैः पादैस्त्रिभिर्गायत्र्येव भवति। एवमेकविंशत्यक्षराणि जायन्ते। तत्रोदाहरणम्।

* युवाकु हि शचीनां युवाकु सुमतीनां। भूयाम वाजदाव्नां ॥ ऋ०। १म०। ४अ०। १७सू० ॥ ४ ॥ (२)

(११) सा पादनिवृत् ॥१०॥

सैव गायत्री पादनिवृदिति सञ्ज्ञां लभते। प्रयोक्तुरदृष्टाभ्युदयसम्बन्धज्ञापनार्थमियं सञ्ज्ञा। वेदस्यानादित्वात्(३) सञ्ज्ञेऽपि च न दुष्यति ॥

---

१ ख ग, चिह्नितपुस्तकद्वये नैतदुदाहरणमस्ति। पुनः *एतादृशचिह्नाङ्कितानि वेदोदाहरणान्यप्यन्यानि वक्ष्यमाणानि एतत्पुस्तकद्वये न सन्तीति वेदितव्यम्।

२ ऋग्वेद प्रथममण्डल चतुर्थानुवाक-सप्तदशसूक्तस्य चतुर्थी ऋगियम्। एषा सायणाचार्यकृता व्याख्या। 'हि' यस्मात् कारणात्, 'शचीनां' अस्मदीयकर्मणां सम्बन्धि सोमरूपं हविः, 'युवाकु' उदकविशेषेण पयःसक्त्वादिद्रव्यान्तरैश्च मिश्रितं तथा 'सुमतीनां' शोभनबुद्धियुक्तानामस्मदीयानां स्तोतॄणां वचनमपि 'युवाकु' नानाविधस्तुत्यगुणमिश्रितं। तस्मात् हे इन्द्रावरुणौ युवयोः प्रसादात् वयं 'वाजदाव्नां' अन्नप्रदानां पुरुषाणां मध्ये, मुख्याः 'भूयाम' भवेम ॥ ४॥

३ वेदवदनादित्वादिति ग चिह्नितपुस्तकपाठः।

(४१) षट्कसप्तकयोर्मध्येऽष्टावतिपादनिवृत् ॥११॥

प्रथमः षड्क्षरः, द्वितीयोऽष्टाक्षरः, तृतीयः सप्ताक्षरः, एवं त्रिभिः पादैर्या गायत्री सा अतिपादनिवृत्। त्रिपादित्यनुवर्त्तनीयम् ॥ (१)

(४२) द्वौ नवकौ षट्कश्च सा नागी ॥१२॥

आद्यौ(२) द्वौ नवाक्षरौ पादौ, तृतीयः षडक्षरः, एवं त्रिपात् या गायत्री, सा नागीत्युच्यते (३) ॥

(४३)विपरीता वाराही ॥१३॥

इयमेव नागी गायत्री, विपरीता सती, वाराही नाम (४) भवति। प्रथमः षडक्षरः, (५) द्वितीयतृतीयौ नवाक्षरौ ॥

(४४) षट्कसप्तकाष्टकैर्वर्द्धमाना(६) ॥१४॥

षडक्षरः प्रथमः पादः, सप्ताक्षरो द्वितीयः, अष्टाक्षरस्तृतीयः,

---

१ षट्कसप्तकयोर्मध्ये त्रिपादनिवृत् इति क्वचित् पाठः। तत्र प्रथमः सप्ताक्षरो द्वितीयः षडक्षरस्तृतीयः पुनः सप्ताक्षरः सा अतिपादनिवृदिति। एतस्य पाठेऽपि अनुक्रमणिकापाठेऽपि साम्यं दृश्यते इति ख, चिह्नितपुस्तकेऽधिकः पाठः।

२ ख, ग, चिह्नितपुस्तकद्वये आद्यौ इति पदं नास्ति।

३ एवं त्रिभिः पादैर्नागी गायत्री भवति इति ग, चिह्नितपुस्तकपाठः। एवं त्रिभिः पादैर्नागी नाम गायत्री भवति इति क, चिह्नितपुस्तकपाठः। पुस्तकान्तरपाठश्च।

४ वाराही नाम गायत्रीति पुस्तकान्तरपाठः।

५ षडक्षरः पादः इति ख, ग, चिह्नितपुस्तकपाठः

६ षट्कसप्ताष्टकैर्वर्द्धमाना इति ख चिह्नितपुस्तकपाठः। पुस्तकान्तरपाठश्च।

एवं त्रिभिः पादैर्वर्द्धमाना (१) गायत्री भवति॥ तत्रोदाहरणम्।

" त्वमग्ने यज्ञानां होता विश्वेषां हितः।

देवेभिर्मानुषे जने॥ ऋ०।६म०।२अ०।१६सू०॥१॥(२)

(३) विपरीता प्रतिष्ठा॥१५॥

सैव वर्द्धमाना यदा विपरीता स्यात्तदा प्रतिष्ठा गायत्री भवति(३)। अष्टाक्षरः प्रथमः पादः, द्वितीयः सप्ताक्षरः, तृतीयः षडक्षरः (४)॥ तत्रोदाहरणम्।

" आपः पृणीत भेषजं वरूथं तन्वे३ मम।

ज्योक् च सूर्यं दृशे॥ ऋ०।१म०।५अ०।२३सू०॥२१॥(५)

---

१ वर्द्धमाना नामेति पुस्तकान्तरपाठः।

२ ऋग्वेद-षष्ठमण्डल द्वितीयानुवाक-षोडशसूक्तस्य प्रथमा ऋगियम्। इयव्याख्या सायणाचार्यकृता व्याख्या। हे 'अग्ने,' 'त्वं,' 'विश्वेषां' सर्वेषां सप्तमस्थानरूपेण विभिन्नानां, 'यज्ञानां,' 'होता' होमनिष्पादकः, असि, यदा, यज्ञसम्बन्धिदेवाकारान्, भवसि। यस्मात् त्वं 'मानुषे जने' सम्बन्धिनि मनुष्ये, 'जने यजमाने, 'देवेभिः' देवैः, 'हितः' होतृत्वेन निहितः, असि॥१॥

३ प्रतिष्ठा नाम गायत्र्याश्चेदिति पुस्तकान्तरपाठः।

४ अष्टाक्षरः प्रथमः पादो द्वितीयः सप्ताक्षरः षडक्षरस्तृतीयस्तदा सैव वर्द्धमाना विपरीता सती प्रतिष्ठा नाम गायत्री भवति इति ख, चिह्नितपुस्तकपाठः।

५ ऋग्वेद प्रथममण्डल-पञ्चमानुवाक-त्रयोविंशसूक्तस्य एकविंशी ऋगियम्। इय-व्याख्या सायणाचार्यकृता व्याख्या। हे 'आपः,' 'मम,' 'तन्वे' शरीरार्थं, 'वरूथं' रोग निवारकं भेषजं औषधं, 'पृणीत' पूरयत। किञ्च 'ज्योक्' चिरं, 'सूर्यं,' 'दृशे' द्रष्टुं, नीरोगा वयं भवेमेति शेषः॥२१॥

(४७) तृतीयं द्विपाज्जागतगायत्राभ्याम् ॥२६॥

तृतीयशब्देनैतदध्यायसूत्रपाठक्रमापेक्षया विराजमाह। तथा-चोक्तम्, "विराजो दिशः (३।५)" इति। यदा द्वादशाक्षरोऽष्टाक्षरश्च पादः स्यात् ततस्ताभ्यां द्विपाद् विराड्नाम गायत्री भवति॥ तत्रोदाहरणम्।

"पश्वा न तायुं गुहा चतन्तं नमो युजानं नमो वहन्तं।
सजोषा धीराः पदैरनु ग्मन्नुप त्वा सीदन् विश्वे यजत्राः ॥ऋ०।१म०।१२अ०।६५सू०॥१॥ (१)

(४८) त्रिपात् त्रैष्टुभैः ॥२७॥

एकादशाक्षरैः पादैस्त्रिपाद् (१) विराड् नाम गायत्री भवति। तृतीयमित्यनुवर्त्तनीयं (२)। तत्रोदाहरणम्।

---

१ ऋग्वेद-प्रथममण्डल-द्वादशानुवाक-पञ्चषष्टितमसूक्तस्य प्रथमा ऋगियम्। इयं चास्य सायणाचार्यकृता व्याख्या। 'धीरा' मेधाविनो देवा, 'सजोषा' समानप्रीतय सन्त, हे अग्ने त्वां 'पदै' मार्गैः पादलक्षणैर्वाऽङ्कनै, 'अनुग्मन्' अन्वगमन्। कीदृशं, 'पश्वा' अपहृतेन पशुना सह, 'तायुं न' स्तेनमिव, 'गुहा चतन्तं' चत्र पायां गुहायां गच्छन्तं, 'नमो युजानं' हविर्लक्षणमन्नमात्मना संयुञ्जानं, 'नमो वहन्तं' देवेभ्यो हविर्वहन्तं। 'यजत्रा' यजनीया, 'विश्वे' सर्वे देवा, हे अग्ने 'त्वा' त्वां, 'उपसीदन्' समीपमप्राप्नुवन्, ददृशु, इत्यर्थः॥१॥

१ त्रिपाद् छन्द इति ख, चिह्नितपुस्तकपाठः।

२ तृतीयमित्यनुवर्त्तत इति ग, चिह्नितपुस्तकपाठः।

* दुहीयन्मित्रधितये युवाकु राये च नो मिमीतं वाजवत्यै।

इषे च नो मिमीतं धेनुमत्यै ॥ ऋ० । १म० । १७अ० । १२०सू ॥ ९ ॥ (१)

इति गायत्र्यधिकारः ॥

(अथ उष्णिगधिकारः ।)

(१९) उष्णिग् गायत्रौ जागतश्च ॥१८॥

यत्र गायत्रावष्टाक्षरौ (१)पादौ, जागतश्च द्वादशाक्षरः, एवं त्रिभिः पादैरुष्णिङ् नाम छन्दो भवति। अत्र च क्रमो न विवक्षितः। पादसङ्ख्यामात्रं विधीयते ॥

(२०)ककुम्मध्ये चेदन्त्यः ॥१९॥

गायत्र्यो.(२) पादयोर्मध्ये जागतश्चेत् पादो भवति, तदा सा उष्णिक् ककुप्सञ्ज्ञां लभते ॥ तत्रोदाहरणम्।

---

१ ऋग्वेद-प्रथममण्डलस्य सप्तदशानुवाक-विंशत्यधिकशततमसूक्तस्य नवमी ऋक्। इयञ्चास्या सायणाचार्यकृता व्याख्या। हे अश्विनौ 'युवाकु' युवां, कामयमाना स्तोतारः, 'मित्रधितये' सम्भजनरक्षणार्थं, 'दुहीयन्' दुःखत्वकारात् धनानि प्रापनुवन्ति। अत 'नः' अस्मान् अपि, 'वाजवत्यै' वाजयुक्ताय, 'च', 'राये' धनाय, 'मिमीत' कुरुतं। अस्मभ्य स्तोतृभ्यो बलयुक्तं धनं गोयुक्तमन्नञ्च प्रयच्छतमिति निष्कृष्टार्थः ॥ ९॥

१ यत्राष्टाक्षराविति ख, ग चिह्नितपुस्तकपाठः।

२ गायत्र्या इति ख, चिह्नितपुस्तकपाठः।

* सुदेवः समहाऽसति सुवीरो नरो मरुतः स मर्त्यः।
यं त्रायध्वे स्याम ते ॥ऋ०।५म०।४अ०।५४सू०।।१५॥ (१)

(११) पुरउष्णिक् पुरतः ॥२०॥

पुरतश्चेज्जागतः पादः स्यात्,(२) गायत्रौ च परतः, तदा सा पुरउष्णिक्संज्ञां लभते(३) ॥ तत्रोदाहरणम्।

* अप्स्वन्तरमृतमप्सु भेषजमपामुत प्रशस्तये।
देवा भवत वाजिनः ॥ऋ०।१म०।५अ०।२३सू०।।१९॥ (४)

---

१ ऋग्वेदे-पञ्चममण्डल चतुर्थानुवाक-चतुष्पञ्चाशत्तमसूक्तस्य पञ्चदशी ऋगियम्। इयञ्चास्य सायणाचार्यकृता व्याख्या। हे 'मरुतः' पूजित भवतां मध्ये, 'सुदेव' कल्याणदानशीलस्य ऋत्विग्भिरुपेतः, 'असति' भवति। हे 'नरः' नेतारो हे मरुतः, 'स', 'मर्त्य', 'सुवीरः' शोभनपुत्राद्युपेतश्च, 'असति' भवति। 'यं' मर्त्यं, 'त्रायध्वे' पालयध्वे, स एवं भवति 'ते' वयं, 'स्याम' युष्मदीया ॥१५॥

२ स एव आगतः पादः प्रथमश्चेद्भवतीति ख, चिह्नितपुस्तकपाठः।

३ पुरउष्णिक् नाम भवतीति ख, ग, चिह्नितपुस्तकपाठः। पुस्तकान्तरपाठश्च।

४ ऋग्वेदे प्रथममण्डल-पञ्चमानुवाक त्रयोविंशसूक्तस्य एकोनविंशी ऋगियम्। इयञ्चास्य सायणाचार्यकृता व्याख्या। 'अप्सु' जलेषु, 'अन्तः' मध्ये, 'अमृत' पीयूष, वर्त्तते। तथैव अप्सु 'भेषज' औषध वर्त्तते। 'उत' अपि च, आदरणीनां अपां देवतानां 'प्रशस्तये' प्रशंसार्थं, 'देवा' हे ऋत्विजादयो ब्राह्मणाः, 'वाजिन' वेगवन्तः, 'भवत' शीघ्र स्तुति कुरुत इत्यर्थः ॥१९॥

(२१) परोष्णिक् परः (१) ॥२१॥

जागतः (२) पादः परश्चेद् भवति, पूर्व्वौ च गायत्रौ, (३) तदा परोष्णिक् नाम भवति (४)। "उष्णिग्गायत्रौ जागतश्च" (३।१८) इत्यनेन गतार्थमेतत्, विशेषसञ्ज्ञा विधानार्थं पुनरुच्यते। प्रथमसूत्रे उष्णिग्ग्रहणमधिकारार्थम्॥ तत्रोदाहरणम्।

ॐ अग्ने॒ वाज॑स्य॒ गोम॑त॒ ईशा॑नः सहसो यहो।

अ॒स्मे धे॑हि जातवेदो॒ महि॒ श्रवः॑॥ ऋ०।१म०।१३अ०।

७९सू० ॥४॥ (५)

(२२) चतुष्पादृषिभिः ॥२२॥

समाक्षरैश्चतुर्भिः पादैरुष्णिगेव भवति॥ तत्रोदाहरणम्।

---

१ परत इति ख, ग, चिह्नितपुस्तकपाठः, पुस्तकान्तरपाठश्च।

२ जागतो द्वादशाक्षर इत्यर्थः।

३ गायत्रौ अष्टाक्षरावित्यर्थः।

४ यत्र जागतः पादः परतश्चेद्भवति, पूर्वौ च गायत्रौ, तदा परोष्णिक् नाम छन्दो भवति इति ख, ग, चिह्नितपुस्तकपाठः।

५ ऋग्वेद-प्रथममण्डल त्रयोदशानुवाकैकोनाशीतितमसूक्तस्य चतुर्थी ऋगियम्। इयञ्चास्या सायणाचार्यकृता व्याख्या। हे 'सहसो यहो' बलस्य पुत्र 'अग्ने,' 'गोमत' बहुभिर्गोभिर्युक्तस्य, 'वाजस्य' अन्नस्य 'ईशान' ईश्वर, भवसि। अत 'अस्मे' अस्मासु, हे 'जातवेद' जातधन, जातानां वेदित, वा, अग्ने 'महि' प्रभूत, 'श्रव' अन्न, धेहि स्थापय ॥ ४ ॥

※ नदं चतुर्दन्तीनां नदं यो युवतीनाम् ।
पतिं वो अघ्न्यानां धेनूनामिषुध्यसि ॥ (ऋ० ८।६९।२)

इत्युष्णिगधिकारः ॥

(अथानुष्टुबधिकारः ॥)

(२३) अनुष्टुब् गायत्रैः ॥२३॥

चतुष्पादित्यनुवर्त्तते । 'गायत्रैः' अष्टाक्षरैः पादैः, चतुष्पाच्छन्दः, अनुष्टुप्सञ्ज्ञं भवति । तस्योदाहरणम् ।

※ गायन्ति त्वा गायत्रिणोऽर्चन्त्यर्कमर्किणः ।
ब्रह्माणस्त्वा शतक्रत उद्वंशमिव येमिरे ॥ ऋ० । १म० । ३अ० । १०सू ॥ १ ॥[१]

(२४) त्रिपात् क्वचिज्जागताभ्याञ्च ॥२४॥

अनुष्टुबित्यनुवर्त्तते । गायत्रग्रहणञ्च । गायत्रेण[२] एकेन पादेन, द्वाभ्यां जागताभ्यां[३], क्वचित् त्रिपादनुष्टुबेव स्यात्[४] ॥

---

१ ऋग्वेद-प्रथममण्डल-तृतीयानुवाक दशमसूक्तस्य प्रथमा ऋगियम् । इयमस्या सायणाचार्यकृता व्याख्या । हे 'शतक्रतो' बहुकर्मन्, बहुप्रज्ञ, वा, इन्द्र त्वां 'गायत्रिण' उद्गातारः, 'गायन्ति' स्तुवन्ति । 'अर्किणः' अर्चनहेतुमन्त्रयुक्ता होतारः, 'अर्कं' अर्चनीयमिन्द्रं, 'अर्चन्ति' शस्त्रगतैर्मन्त्रैः शंसन्ति । 'ब्रह्माणः' ब्रह्मप्रभृतय इतरे ऋत्विजः, त्वां 'उद्येमिरे' उन्नतिं प्रापयन्ति । अत्र दृष्टान्तः । 'उद्वंशमिव' यथा वंशाग्रे नृत्यन्तः शिल्पिनः प्रौढं वंशमुन्नतं कुर्वन्ति, यथा वा सम्पत्तिमन्तः स्वकीय कुलमुन्नतं कुर्वन्ति, तद्वत् ॥ १ ॥

२ गायत्रेण अष्टाक्षरेणेत्यर्थः ।

३ जागताभ्यां द्वादशाक्षराभ्यामित्यर्थः ।

४ यथाक्रमं गायत्रछन्दसा गायत्रेणैकेन ततो द्वाभ्यां जागताभ्यां क्वचित् त्रिपादनुष्टुब् भवतीति घ, ङ, चिह्नितपुस्तकपाठः ।

(२१) मध्येऽन्ते च ॥२५॥

जागतयोः पादयोर्मध्येऽन्ते च यदा गायत्रः (१) पादो भवति, तदाप्यनुष्टुबेव स्यात्। मध्यपक्षे उदाहरणम्।

* प्रपूर्ण प्रधन्व वाजसातये।
पवित्राणि सचक्षणिः।
द्वियस्तरध्या ऋणया ईयसे ॥

अन्तपक्षे उदाहरणम्।

* मा कस्मैं धातमभ्यमित्रिणें नो मा कुत्रा नो गृहेभ्यों धेनवों गुः।
स्तनाभुजो अशिश्वीः ॥ ऋ०। १म०।१७अ०। १२० सू० ॥ [redacted] ॥(२)

इत्यनुष्टुबधिकार ॥

---

१ जागतयोर्द्वादशाक्षरयो गायत्रोष्टाक्षर इत्यर्थः।

२ ऋग्वेद प्रथममण्डल सप्तदशानुवाक विंशत्यधिकशततमसूक्तस्य अष्टमी ऋगियम्। इयमस्याः सायणाचार्यकृता व्याख्या। हे अश्विनौ 'अभिद्विषे' निन्दकायेत्य र्थम, 'कस्मैचिदपि जनाय न अस्मान्, माऽभिधात' आभिमुख्येन मा व्यवस्थापयत। अपि च 'न अस्माकं, 'गृहेभ्य', सकाशात, 'स्तनाभुज' स्तनैर्वत्सान मनुष्यांश्च पालयन्त्य, धेनव, 'अशिश्वी' शिशुना वत्सेन रहिता सत्य, 'कुत्र चित्' अस्माभिरगम्ये प्रदेशे, 'मा गु' मागच्छन्तु ॥ ८॥

कार्यविशेषान्तरावरुद्धतया निरवकाशात कतिपयानामृचां मण्डलनिर्देशादिकार्यं न जातम्। तदस्य पुनर्मुद्रणसमये तदर्थं सुधीभिर्यतनीयमिति विज्ञप्तिः।

(अथ बृहत्यधिकारः।)

(४७) बृहती जागतस्त्रयश्च गायत्राः ॥ २६ ॥

एको जागतः पादः, त्रयश्च गायत्राः(१), तदा बृहती नाम छन्दो भवति ॥

(४८) पथ्या पूर्वश्चेत्तृतीयः ॥ २७ ॥

बृहतीत्यनुवर्त्तते । पूर्वः पादो जागतो यदि तृतीयो भवति, अन्ये गायत्राः, तदा असौ बृहती पथ्या नाम छन्दो भवति ॥

(४९) न्यङ्कुसारिणी द्वितीयः ॥ २८ ॥

पूर्वश्चेदित्यनुवर्त्तते । पूर्वश्चेज्जागतः पादो द्वितीयो भवति, शेषाश्च गायत्राः, तदा न्यङ्कुसारिणीनाम्नी बृहती भवति ॥

(५०) स्कन्धोग्रीवी क्रौष्टुकेः ॥ २९ ॥

इयमेव न्यङ्कुसारिणी क्रौष्टुकेराचार्यस्य मतेन स्कन्धोग्रीवी नाम छन्दो भवति । आचार्यग्रहणं पूजार्थम् ॥

(५१) उरोबृहती यास्कस्य ॥ ३० ॥

इयमेव न्यङ्कुसारिणी यास्कस्याचार्यस्य मतेन उरोबृहती-नाम्नी (२) भवति ॥

---

१ जागतगायत्रशब्दाभ्यामत्र सर्वत्र द्वादशाष्टाक्षरयोः पादयोर्बोध्यम्।

२ उरोबृहती नामेति ख, ग, चिह्नितपुस्तकपाठः ।

(११) उपरिष्टाद् बृहत्यन्ते ॥ ३१ ॥

यदा जागतः (१) पादोऽन्ते भवति, शेषाश्च गायत्राः, तदा उपरिष्टाद्बृहती नाम भवति ॥ तत्रोदाहरणम्।

"सखायस्त्वा ववृमहे देवं मर्त्तास ऊतये।
अपां नपातं सुभगं सुदीदितिं सुप्रतूर्त्तिमनेहसं ॥ऋ०।३।१।१।

(१२) पुरस्ताद्बृहती पुरः ॥ ३२ ॥

स एव जागतः पादः पूर्वश्चेद्भवति, शेषाश्च गायत्राः, तदा पुरस्ताद्बृहती नाम भवति। "बृहती जागतस्त्रयश्च गायत्राः (३।२५)" इत्यनेनैव गतार्थमेतत् (२) सञ्ज्ञाविशेषदर्शनार्थं (३) पुनरुच्यते ॥

(१३) क्वचिन्नवकाश्चत्वारः ॥ ३३ ॥

क्वचिद् वेदे नवाक्षराश्चत्वारः पादा दृश्यन्ते, सापि बृहत्येव तत्रोदाहरणम्।

"तं त्वा वयं पितो वचोभिर्गावो न हव्या सुषूदिम।
देवेभ्यस्त्वा सधमादमस्मभ्यं त्वा सधमादम् ॥ ऋ०१। १८। ११।

१ एव जागत इति ख ग, चिह्नितपुस्तकपाठः।
२ गतार्थमादिति ख, चिह्नितपुस्तकपाठः।
३ सञ्ज्ञाविशेषप्रदर्शनार्थमिदमिति पुस्तकान्तरपाठः।

(१७) वैराजौ गायत्रौ च ॥ ३४ ॥

यत्र वैराजौ पादौ, पूर्वौ, दशाक्षरौ भवतः, ततो गायत्रौ, च सापि(१) बृहती ॥

(१९) त्रिभिर्जागतैर्महाबृहती ॥ ३५ ॥

त्रिभिर्जागतैः पादैश्छन्दो महाबृहतीनाम ॥

(२०) सतोबृहती ताण्डिनः ॥ ३६ ॥

इयमेव बृहती ताण्डिन आचार्यस्य मते सतोबृहती नाम भवति ॥

इति बृहत्यधिकारः ॥

(अथ पङ्क्त्यधिकारः ।)

(१८) पङ्क्तिर्जागतौ गायत्रौ च ॥ ३७ ॥

यदा द्वौ जागतौ पादौ, तथा गायत्रौ च, (२) तदा पङ्क्तिर्नाम छन्दः ॥

(१९) पूर्वौ चेदयुजौ सतःपङ्क्तिः ॥ ३८ ॥

यदा (३) पूर्वोद्दिष्टौ पादावयुजौ भवतः, प्रथमतृतीयौ पादौ जागतावित्यर्थः । द्वितीयचतुर्थौ च गायत्रौ, तच्छन्दः सतःपङ्क्तिर्नाम ॥

---

१ गायत्री चापीति ख, ग, चिह्नितपुस्तकपाठः । अत्र सर्वत्र वैराजगायत्र्यादिशब्दा दशाक्षराष्टाक्षरपादपरत्वेन बोध्याः ।

२ पादौ भवतस्तौ गायत्रौ चेति ख चिह्नितपुस्तकपाठः । पुस्तकान्तरपाठश्च ।

३ यदीति ख, चिह्नितपुस्तकपाठः, पुस्तकान्तरपाठश्च ।

(७०) विपरीतौ च ॥ ३९ ॥

यदा तावेव पादौ विपरीतौ भवतस्तदापि सत-पङ्क्तिरेव। अयमर्थः, प्रथमतृतीयौ पादौ गायत्रौ, द्वितीयचतुर्थौ जागतौ ॥

(७१) आस्तारपङ्क्तिः परतः ॥४०॥

यदा जागतौ पादौ, परौ भवतः[१], गायत्रौ च पूर्वौ, तदा आस्तारपङ्क्तिर्नाम ॥

(७२) प्रस्तारपङ्क्तिः पुरतः ॥ ४१ ॥

यदा जागतौ पादौ पूर्वौ भवतः, गायत्रौ च परतः, तदा प्रस्तारपङ्क्तिर्नाम ॥ "पङ्क्तिर्जागतौ गायत्रौ च (३।३७) इत्यनेन गतार्थमिदं, सञ्ज्ञाविशेषज्ञापनार्थं पुनरुच्यते ॥

(७३) विष्टारपङ्क्तिरन्तः ॥ ४२ ॥

यदा जागतौ पादौ मध्ये भवतः, आद्यन्तयोश्च गायत्रौ, तदा विष्टारपङ्क्तिर्नाम ॥

(७४) संस्तारपङ्क्तिर्बहिः ॥ ४३ ॥

यदा तावेव जागतौ पादौ बहिर्भवतः, मध्ये च गायत्रौ, तदा संस्तारपङ्क्तिर्नाम च्छन्दः ॥

---

१ परतो भवत इति ख, ग, चिह्नितपुस्तकपाठः। पुस्तकान्तरपाठश्च।

(७४) अक्षरपङ्क्तिः पञ्चकाश्चत्वारः ॥४४॥

पञ्चाक्षरैश्चतुर्भिः पादैरक्षरपङ्क्तिर्नाम च्छन्दः। ननु चत्वारिंशदक्षरा पङ्क्तिच्छन्दः, तत् कथं पञ्चकाश्चत्वार इत्युच्यते। तत्रोत्तरम्। "द्वावप्यल्पशः" (३।४५) इत्यस्मात् सिंहावलोकितन्यायेनाल्पग्रहणमनुवर्त्तते, तेन पङ्क्तेरल्पत्वं विशेषात् प्रतिपादितं भवति ॥

(७५) द्वावप्यल्पशः ॥४५॥

पञ्चग्रहणमनुवर्त्तते। पञ्चाक्षराभ्यां पादाभ्यां अल्पशः-पङ्क्तिर्नाम च्छन्दो भवति, क्वचिदेव वेदे न सर्वत्र ॥

(७६) पदपङ्क्तिः पञ्च ॥४६॥

पञ्चका इत्यनुवर्त्तते। यदा पञ्चाक्षराः पञ्च पादा भवन्ति, तदा पदपङ्क्तिर्नाम च्छन्दः ॥

(७७) चतुष्कषट्कौ त्रयश्च ॥४७॥

चकारः, पञ्चका इत्यनुकर्षणार्थः। यदा प्रथमश्चतुरक्षरः पादः, द्वितीयः षडक्षरः, ततस्त्रयः पञ्चाक्षराः, तदा पञ्चपदा पङ्क्तिरेव ॥

(७८) पथ्या पञ्चभिर्गायत्रैः ॥४८॥

पञ्चभिरष्टाक्षरैः पादैः पथ्या नाम पङ्क्तिर्भवति। पथ्योदाहरणम्।

अक्षन्नमीमदन्त ह्यवेति ॥ (ऋ० १।८२।२॥

इति पङ्क्त्यधिकारः ॥

(अथ त्रिष्टुब्जगत्यधिकारः ।)

(८) जगती षड्भिः ॥ ४९ ॥

गायत्रैरित्यनुवर्त्तते । गायत्रैः षड्भिः पादैर्जगतीनामच्छन्दो भवति ॥

(८१) एकेन त्रिष्टुब् ज्योतिष्मती ॥ ५० ॥

त्रिष्टुभः प्रस्तुतत्वात् प्रत्यासत्तेश्च तस्या एव सम्बन्धः । एकेन त्रैष्टुभेन पादेनाधिकाराच्चतुर्भिर्गायत्रैः पञ्चपात्त्रिष्टुब्, ज्योतिष्मती नाम(१) । त्रैष्टुभेन सह पञ्चभिर्गायत्रैरित्युक्ते चत्वार एव गायत्राः पादा लभ्यन्ते । यथोपाध्यायेन सह पञ्च शिष्या आगता इत्युक्ते उपाध्यायपञ्चमाः प्रतीयन्ते ॥

(८२) तथा जगती ॥ ५१ ॥

एकेन जागतेन, पादेन, चतुर्भिर्गायत्रैः, पञ्चपाज्जगती, ज्योतिष्मती नाम(२) ॥

---

१ एकेनेति "पञ्चापञ्चभिर्गायत्रैः (३।३१) इत्यतो गायत्रपदस्य प्रस्तुतत्वात् प्रत्यासत्तेश्च तस्यैव सम्बन्धः । गायत्रैरेकेन पादेनाधिकाराच्चिभिस्त्रैष्टुभैरनुष्यात त्रिष्टुब् ज्योतिष्मती नामेति च, चिह्नितपुस्तकपाठः ।

२ एकेन गायत्रेण पादेन त्रिभिर्जागतैश्चतुष्पज्ज्योतिर्नाम जगती भवति इति च, चिह्नितपुस्तकपाठः । अ,चिह्नितपुस्तकपाठे ज्योतिष्मतीत्यस्य विशेषः ।

(८३) पुरस्ताज्ज्योतिः प्रथमेन ॥ ५२ ॥

प्रथमेन त्रैष्टुभेन पादेन, शेषैश्च गायत्रैः, पुरस्ताज्ज्योतिर्नाम त्रिष्टुब् भवति। पूर्वेणैव गतार्थत्वाद् विशेषसञ्ज्ञाज्ञापनार्थमिदम्। तथा जगतीत्यनुवर्त्तनीयम्। तेनाद्येन जागतेन पादेन, चतुर्भिश्च गायत्रैः, पुरस्ताज्ज्योतिर्नाम जगती भवति[१] ॥

(८४) मध्येज्योतिर्मध्यमेन ॥ ५३ ॥

यदा मध्यमस्त्रैष्टुभः पादो भवति, उभयतश्च द्वौ द्वौ गायत्रौ, तदा मध्येज्योतिर्नाम त्रिष्टुब् भवति। मध्येज्योतिरित्यलुक्-समासः। तथा जगतीत्यनुवर्त्तनीयं। तेन मध्यमेन जागतेन उभयतश्च द्वौ द्वौ गायत्रौ (२) तदा मध्येज्योतिर्नाम जगती भवति(२) ॥

(८५) उपरिष्टाज्ज्योतिरन्तेन ॥ ५४ ॥

यदा चत्वारो गायत्राः पादा भवन्ति, अन्त्ये च त्रैष्टुभः, तदा

१ प्रथमेन त्रायष्टुभेन पादेन शेषैश्च गायत्रैस्त्रिभिः पुरस्ताज्ज्योतिस्त्रिष्टुप् नाम भवति। पूर्वेणैव गतार्थत्वाद्विशेषसञ्ज्ञाज्ञापनार्थमिदम्। तथा जगतीत्यनुवर्त्तनीयम्। तेनाद्येन जागतेन पादेन त्रिभिर्गायत्रैः पुरस्ताज्ज्योतिर्नाम जगती इति च लिखितपुस्तकपाठः।

उपरिष्टाज्ज्योतिर्नाम त्रिष्टुब् भवति। तथा जगतीत्यनुवर्त्तनीयम्। तेनान्त्येन जागतेन, शेषैश्च गायत्रैश्चतुर्भिः, उपरिष्टाज्ज्योतिर्नाम जगती भवति(१)॥

(८९) एकस्मिन् पञ्चके छन्दः शङ्कुमती॥ ५५॥

यद्येकः पञ्चाक्षरः पादो भवति, अन्यश्च षडक्षराः, तदा शङ्कुमती नाम गायत्री(२)। छन्दोग्रहणे प्रकृते, पुनश्छन्दोग्रहणं छन्दोमात्रप्रतिपत्त्यर्थं। तेन सर्वेषु छन्दःसु पञ्चाक्षरैकपादलक्षिता शङ्कुमती भवति। इतरथा ह्यनन्तरं सम्प्रत्ययः स्यात्(३)॥

(८०) षट्के ककुम्मती(४)॥ ५६॥

एकस्मिन् षडक्षरे पादे, अन्येषु यथालक्षणमुपात्तेषु, छन्दोमात्रं ककुम्मती नाम(५) भवति॥

(८८) त्रिपादणिष्ठमध्या पिपीलिकमध्या॥ ५७॥

यदाद्यन्तौ पादौ बह्वक्षरौ, मध्यमोऽल्पतराक्षरः(६), तदाऽणिष्ठमध्या सती पिपीलिकमध्या नाम भवति। अयमर्थः,

---

१ यदा त्रयस्त्रैष्टुभा पादा भवन्ति, अन्ते च गायत्रस्तदोपरिष्टाज्ज्योतिस्त्रिष्टुब् नाम भवति। तथा जगतीत्यनुवर्त्तनीयम्। तेनान्त्येन गायत्रेण शेषैश्च जागतैस्त्रिभिरुपरिष्टाज्ज्योतिर्जगती नाम भवति इति ख, चिह्नितपुस्तकपाठः।

२ यद्येकः पञ्चाक्षरः पादो भवति अन्यश्च द्वादशाक्षरास्तदा शङ्कुमती जगती नाम छन्दो भवति इति ख, चिह्नितपुस्तकपाठः।

३ ह्यनन्तरमेव मतुप्प्रत्ययः स्यात् इति ख, ग, चिह्नितपुस्तकपाठः।

४ ककुम्मती इति ग, चिह्नितपुस्तकपाठः। पुस्तकान्तरपाठश्च।

५ छन्दोमात्रे तु ककुम्मती नाम जगती इति ख, ग, चिह्नितपुस्तकपाठः।

६ मध्यमोऽल्पतमाक्षर इति ख, ग, चिह्नितपुस्तकपाठः।

आद्यन्तौ पादौ अष्टाक्षरौ (१), मध्यमस्त्र्यक्षरः, एवं त्रिपाद् गायत्री पिपीलिकमध्या नाम भवति (२)। एवं चतुरक्षरे पञ्चाक्षरेऽपि मध्यमे पादे पिपीलिकमध्या सिद्ध्यति। यत् किञ्चित्त्रिपाच्छन्दः (३), लघुमध्यमपादं, तत्सर्वं पिपीलिकमध्यमुच्यते॥

(८९) विपरीता यवमध्या॥ ५८॥

आद्यन्तौ पादौ लघ्वक्षरौ, मध्यमश्च बह्वक्षरः, सा गायत्री यवमध्या नाम भवति। एवमुष्णिगादिष्वपि योज्यम्॥

(९०) ऊनाधिकेनैकेन (४) निचृद्भुरिजौ॥ ५९॥

चतुर्विंशत्यक्षरा गायत्री, एकेनाक्षरेण न्यूनेन, सा निचृदिति विशेषसञ्ज्ञां लभते। एकेनाधिकेन भुरिगिति। एवमुष्णिगादिष्वपि द्रष्टव्यम्॥

(९१) द्वाभ्यां विराट्स्वराजौ॥ ६०॥

ऊनाधिकग्रहणमनुवर्त्तते (५)। द्वाभ्यामक्षराभ्यां ऊनाधिकाभ्यां (६) गायत्री यथाक्रमं विराटस्वराट्-सञ्ज्ञा भवति(७)।

---

१ पादौ षडक्षरौ इति पुस्तकान्तरपाठः।

२ आद्यन्तौ पादौ एकादशाक्षरौ मध्यमः षडक्षरः, एवं त्रिपादुष्णिक् पिपीलिकमध्येत्यर्थः इति क, ग, चिह्नितपुस्तकपाठः।

३ यत् किञ्चिच्छन्द इति ग, चिह्नितपुस्तकपाठः।

४ न्यूनाधिकेनैकेनेति पुस्तकान्तरपाठः।

५ न्यूनाधिकग्रहणमनुवर्त्तते इति क, चिह्नितपुस्तकपाठः।

६ न्यूनाधिकाभ्यामिति ग, चिह्नितपुस्तकपाठः।

७ गायत्र्यादीनि यथाक्रमेण विराट्स्वराट्संज्ञानि भवन्तीति पुस्तकान्तरपाठः।

(९२) आदित. सन्दिग्धे ॥ ६१ ॥

यदा षड्विंशत्यक्षरं छन्दो भवति, तदा किं प्रतिपत्तव्यं, किं गायत्री स्वराट्, उत[१] उष्णिग्विराडिति । एवं सन्दिग्धे सति छन्दसि आदिभूतात् पादात् निर्णयः कर्त्तव्यः । यदि प्रथमः पादो गायत्रस्तदा[२] गायत्र्येवासौ । अथोष्णिहस्तदोष्णिगिति । एवं सर्वत्र ॥

(९३) देवतादितश्च ॥ ६२ ॥

इदमपरं निर्णयनिमित्तमुच्यते । सन्दिग्धे छन्दसि देवतादेश्च निर्णयः कर्त्तव्यः । 'आदि'ग्रहणं स्वरादिपरिग्रहार्थम् । कस्य छन्दसः का देवता यया निर्णयः कर्त्तव्यः । इत्यपेक्षायामिदमुच्यते ।

(९४) अग्निः सविता सोमो वृहस्पतिर्वरुण इन्द्रो-विश्वेदेवाः[३] ॥ ६३ ॥

गायत्र्यादीनां जगतीपर्य्यन्तानां यथाक्रममग्न्यादयो देवता वेदितव्याः । तत्र सन्दिग्धे छन्दसि, यदाऽऽग्नेयं तदा गायत्री, यदि सावित्रं तदौष्णिक् । एवं सर्व्वत्र । वैदिकेष्वेव छन्दःसु निह-

---

१ उताहो इति पुस्तकान्तरपाठः ।

२ यदि प्रथमः पादो गायत्र्यास्तदा इति ख, ग, चिह्नितपुस्तकपाठः । यदा प्रथमः पादो गायत्र्यास्तदेति पुस्तकान्तरपाठः ।

३ मित्रावरुणा इन्द्रो विश्वेदेवा देवता इति ख, चिह्नितपुस्तकपाठः ।

भुरिजौ, तथा विराट्स्वराजौ दृश्येते, न लौकिकेषु। अतो लौकिकेषु(१) सन्देहाभावान्निर्णयनिमित्तभूता देवताद्यो नेष्यन्ते।

(६५) स्वराः षड्जादयः॥ ६४॥

षड्जर्षभ-गान्धार-मध्यम-पञ्चम-धैवत-निषादाः स्वरा गायत्र्यादिषु क्रमेण द्रष्टव्याः॥

(६६)सित-सारङ्ग-पिशङ्ग-कृष्ण-नील-लोहित-गौरा वर्णाः॥६५॥

गायत्र्यादिषु क्रमेण वर्णा वर्णनिर्णयनिमित्तमभिधीयन्ते॥

(६७) आग्निवेश्य-काश्यप-गौतमाङ्गिरस-भार्गव-कौशिक-वासिष्ठानि गोत्राणि इति॥ ६६॥

गायत्र्यादीनां क्रमेणैतानि गोत्राणि, भवन्तीति वाक्यशेषः। ध्यामान्यतिछन्दांसि, रोचनामाः सप्तयः(२), इत्येवमधीयतेऽतिछान्दसाः(३)। तन्नोपपद्यते। अतीनामतिच्छन्दसाञ्च निचृद्भुरिजोर्विराट्स्वराजोश्च प्रदेशाभावात् कथमिवास्ति संशयः।

---

१ अतो लौकिकग्रन्थे इति क, ख, चिह्नितपुस्तकपाठः। यतो लौकिकग्रन्थे इति मुद्रितपुस्तकपाठः।

२ अथ [illegible] श्यामान्यतिच्छन्दांसीति क, चिह्नितपुस्तकपाठः।

३ इत्येवमादिकमर्थपदं नाध्येयम् इति क, ख, चिह्नितपुस्तकपाठः।

यस्य निर्णयनिमित्तं वर्णविन्यासः क्रियते, (१) तदपि ऋषि-देवता स्वर-वर्णानां ज्ञानान्निःश्रेयसमिच्छन्ति छान्दसाः (२) ॥

इति भट्टहलायुधकृतौ छन्दोवृत्तौ (३) तृतीयोऽध्यायः ॥ ३ ॥

(अथ चतुर्थोऽध्यायः।)

(९७) चतुःशतमुत्कृतिः ॥ १ ॥

चतुरधिकं शतं चतुःशतं। मध्यमपदलोपी समासः। अथवा चत्वारि च, शतञ्च चतुःशतं। द्वन्द्व-समासः। कर्मधारयपक्षन्तु(४) नेष्यते। तत्र चतुःशतानीति प्राप्नोति। यत्र चतुःशतमक्षराणां सङ्ख्या भवति, तत्, उत्कृतिर्नाम च्छन्दः॥

(९८) चतुरश्चतुरस्त्यजेदुत्कृतेः ॥ २ ॥

चतुःशताक्षरात् छन्दसः क्रमेण चतुरश्चतुरः सङ्ख्याविशेषान् त्यजेत्। एतदुक्तंभवति, उत्कृतेरारभ्य चतुर्भिश्चतुर्भिरक्षरै-र्न्यूनानि छन्दांसि अन्यानि स्थापयेत्, अष्टचत्वारिंशदक्षरं यावत् ॥

(१००) तान्यभिसंव्याप्नेभ्यः कृतिः ॥ ३ ॥

'तानि' उत्कृतेरनन्तराणि छन्दांसि, [illegible]

इत्येतेभ्यः पराणि कृतिसंज्ञानि भवन्ति। तत्र शताक्षरं छन्दोऽभिकृतिः। षण्णवत्यक्षरं, संस्कृतिः। द्वानवत्यक्षरं, विकृतिः। अष्टाशीत्यक्षरम्, आकृतिः। चतुरशीत्यक्षरं, प्रकृतिः॥

(१०१) प्रकृत्या च ॥ ४॥

उपसर्गवर्जितः शुद्धः कृतिशब्दः प्रकृत्या स्वरूपेणैवावतिष्ठते। तेनैतदुक्तं भवति, अशीत्यक्षरं, कृतिः (१)॥

(१०२) धृत्यष्टि-शक्करी (२) जगत्यः ॥ ५॥

कृतेरधस्ताद्धृति अष्टि शक्करी जगती इत्येते शब्दाः क्रमेण व्यवस्थापनीयाः॥

(१०३) पृथक् पृथक् पूर्वत एतान्येवैषाम् ॥ ६॥

'एषां' धृत्यादीनां, 'पूर्वतः पृथक् पृथक्', 'एतान्येव' शब्दरूपाणि, विन्यसेत्। पृथक् पृथग्-ग्रहणं प्रत्येकं पूर्वत्वज्ञापनार्थम्। अन्यथा हि समुदायपूर्ववृत्तित्वमेषां (३) स्यात्। तेनायमर्थः, धृतिशब्दात् पूर्वं धृतिशब्दः, अष्टिशब्दात् पूर्वमष्टिशब्दः, शक्करीशब्दात् पूर्वं शक्करीशब्दः, जगतीशब्दात् पूर्वं जगतीशब्दः॥

---

१ अशीत्यक्षरं छन्दः कृतिसंज्ञमिति ख, ग चिह्नितपुस्तकपाठः। पुस्तकान्तर पाठश्च।

२ शक्करीति क, ख, चिह्नितपुस्तकपाठः। शक्वरीति पुस्तकान्तरपाठः। एवं सर्वत्र शक्करीशब्दपाठान्तरं ज्ञेयम्।

३ समुदायपूर्वत्वमेषामिति क, ख, चिह्नितपुस्तकपाठः। पुस्तकान्तरपाठश्च।

(१०४) द्वितीयं द्वितीयमतितः ॥ ७ ॥

अत्र द्वितीयं द्वितीयं शब्दरूपम् (१) अतिशब्दात् परतः प्रयोक्तव्यम्। एवं सत्युत्तरेषां छन्दसामेताः सञ्ज्ञाः क्रमेण भवन्ति। तत्र षट्सप्तत्यक्षरम्, अतिधृतिः(२)। द्वासप्तत्यक्षरं, धृतिः। अष्टषष्ट्यक्षरम्, अत्यष्टिः। चतुःषष्ट्यक्षरम्, अष्टिः। षष्ट्यक्षरम्, अतिशक्करी। षट्पञ्चाशदक्षरं, शक्करी। द्वापञ्चाशदक्षरम्, अतिजगती। अष्टाचत्वारिंशदक्षरं, जगती॥

(१०५) अत्र (३) लौकिकम् ॥ ८ ॥

अधिकारोऽयमाशास्त्रपरिसमाप्तेः। पूर्वेषां छन्दसां वैदिकत्वमेव। इतः प्रभृत्यार्य्यादीनां चूलिकापर्य्यन्तानां लौकिकत्वमेव। समान्यादीनामुत्कृतिपर्य्यन्तानां वैदिकत्वं लौकिकत्वञ्च। 'अत्र' वैदिकच्छन्दसां प्रस्तावे, प्रसङ्गात् वेदवद्व्यासादिमुनिपारम्पर्य्यागतं स्मृतिपुराणेतिहासादिषु दृश्यमानमार्य्यादिदण्डकपर्य्यन्तं 'लौकिक'च्छन्दोजातमधिक्रियते। तन्मूलत्वात् काव्यस्य। काव्यञ्च कीर्त्तिरूपत्वादानन्दहेतुत्वाच्च पुरुषार्थः॥

(१०६) आत्रैष्टुभाच्च यदार्षम् ॥ ९ ॥

आङभिविधौ। त्रिष्टुबेव त्रैष्टुभं, स्वार्थे तद्धितः। गायत्र्यादि-

१ शब्दस्वरूपमतित इति ग, चिह्नितपुस्तकपाठः।

२ षट्सप्तत्यक्षरं छन्दोतिधृतिरिति ख, ग, चिह्नितपुस्तकपाठः। पुस्तकान्तरपाठश्च।

३ अथेति ख, ग, चिह्नितपुस्तकपाठः।

त्रिष्टुप्पर्य्यन्तं यदार्षं छन्दोजातं, वैदिके व्याख्यातं, लौकिके च तत्, तथैव द्रष्टव्यं। किं तदार्षं ? चतुर्विंशत्यक्षरा गायत्री। अष्टाविंशत्यक्षरोष्णिक्। द्वात्रिंशदक्षराऽनुष्टुप्। षट्त्रिंशदक्षरा बृहती। चत्वारिंशदक्षरा पङ्क्तिः। चतुश्चत्वारिंशदक्षरा त्रिष्टुप्। 'चः' समुच्चये॥

(१०७) पादश्चतुर्भागः (१)॥ १०॥

'चतुर्भागः' (२) चतुर्विंशत्यक्षराया गायत्र्याश्चतुर्थो भागः, पादसञ्ज्ञां लभते। गायत्र्याः षडक्षरः पादः। एवमुष्णिगादिष्वपि द्रष्टव्यम् (३)। समवृत्तविषयमेतत्॥

(१०८) यथावृत्तसमाप्तिर्वा॥ ११॥

यस्य वृत्तस्य यादृशैः पादैर्न्यूनाक्षरैरधिकाक्षरैर्वा समाप्तिर्दृश्यते, तस्य तादृशा एव पादा ग्रहीतव्याः। 'वा'शब्दो व्यवस्थितविभाषा। उद्गतादिषु विषमवृत्तेषु चतुर्भागातिक्रमेणापि पादव्यवस्थादर्शनात्॥

> आदौ तावद् गणच्छन्दो मात्राच्छन्दस्ततः परम्।
> तृतीयमक्षरच्छन्दः (४) छन्दस्त्रेधा तु लौकिकम्॥

---

१ पादश्चतुर्थभाग इति पुस्तकान्तरपाठः।

२ [illegible] चतुर्थभाग इति पुस्तकान्तरपाठः।

३ [illegible] इति पुस्तकान्तरपाठः।

४ तृतीयमक्षरं छन्द इति ख, ग, चिह्नितपुस्तकपाठः।

आर्य्याद्युद्गीतिपर्यन्तं गणच्छन्दः समीरितम्।
वैतान्यादि चूलिकान्तं मात्राच्छन्दः प्रकीर्त्तितम्॥
समान्याद्युत्कृतिं यावदक्षरच्छन्द एव च (१)।

तत्रादौ तावदार्य्यालक्षणसिद्ध्यर्थं गणसञ्ज्ञां करोति।

(१०९) लः समुद्रा गणः॥ १२॥

ल इत्येकमात्रिकस्याक्षरस्य ग्रहणम्। समुद्रा इति चतुःसङ्ख्योपलक्षणार्थम्। चतुर्णां लकाराणां, गणः, इत्येषा सञ्ज्ञा विधीयते।

(११०) गौ गन्तमध्यादिर्ल्लश्च॥ १३॥

अनेन गणस्य विन्यासभेदं दर्शयति। स हि गणः कदाचिद्गुरुद्वयेन भवति, कदाचिदन्तेनैकेन गुरुणा, कदाचिन्मध्यमेन, कदाचिदाद्येन, कदाचिच्चतुर्भिर्लघुभिः। षष्ठस्य भेदस्याभावात्(२) विस्पष्टार्थमिदं सूत्रम्। अन्तमध्यादिरिति प्रथमं द्वन्द्वसमासं कृत्वा पश्चाद् गकारेण बहुव्रीहिः। द्वन्द्वात्परो यः श्रूयते, लभतेऽसौ प्रत्येकाभिसम्बन्धम्। द्वौ गकारौ, चत्वारो लघवो भवन्ति,

---

१ आर्य्याद्युद्गीतिपर्यन्तं गणच्छन्दः। वैतालीयादिचूलिकापर्यन्तं मात्राच्छन्दः। समान्यादिकमुत्कृतिपर्यन्तमक्षरं छन्द इति ग, चिह्नितपुस्तकपाठः। पुस्तकान्तरपाठश्च।

२ द्विगुरुकस्य (ऽऽ) अस्य गणस्य मात्राप्रस्तारनियमेन प्रस्तारे क्रियमाणे सर्वगुर्वादि सर्वलघ्वन्ता पञ्चैव भेदा भवन्ति। ते च भेदा द्विगुरुकात्प्रभृति क्रमशः ऽऽ, ।।ऽ, ।ऽ।, ऽ।।, ।।।।, एते पञ्च गणा जायन्ते। सूत्रेऽपि प्रस्तारक्रमेण पञ्चैव वर्णिताः। अतोऽत्र षष्ठभेदस्या-

स एको गण (ऽऽ)। गकारोऽन्ते यस्य स गन्तो द्वितीयो गणः(॥ऽ)। गकारो मध्ये यस्य स गमध्यस्तृतीयो गणः (।ऽ।)। गकार आदिर्यस्य (१) स गादिश्चतुर्थो गणः(ऽ॥)। नकारलकारौ मिलितौ चत्वारो लघवो भवन्ति, स पञ्चमो गणः(॥॥)। एवं गणेषु सिद्धेषु इदानीमार्य्यालक्षणं करोति ॥

(अथार्याधिकारः।)

(१११) स्वरा अर्द्धञ्चार्य्यार्द्धम् ॥ १४ ॥

गणग्रहणमनुवर्त्तते। स्वरा इति सप्तानां सञ्ज्ञा। यत्र प्रस्तारे गणाः सप्त भवन्ति, अर्द्धञ्च गणस्य, तदार्य्यार्द्धं निष्पद्यते। द्वितीयमप्यर्द्धं तादृशमेव। समप्रविभागेऽर्द्धशब्दः। [यद्येवम्, अर्द्धशब्दस्य अर्द्धं न पुंसकम् इत्यनेनैकदेशिसमासे सति पूर्वनिपातः प्राप्नोति।] यथा, अर्द्धाटकम्, अर्द्धपलम्, अर्द्धखारी, इति। नैष दोषः। सत्यपि समप्रविभागत्वे सम्बध्यमानस्याविवक्षितत्वात् समप्रविभागस्यार्द्धशब्दस्यैकदेशिसमासव्यभिचारदर्शनात्। यथा, तुलार्द्धेन गां क्रीणाति (२)।

पणार्द्धक्रीतताम्बूलचर्वणाद् गर्विताननाः।
घनश्यासाद् गलल्लाला यान्त्येते वारयाचिकाः॥

तथा च समप्रविभागत्वेऽप्यर्द्धशब्दस्यैकदेशिसमासदर्शनाच्च।

---

१ मकार आदौ यस्येति पुस्तकान्तरपाठः।

२ यथा द्रुमार्द्धेन मां क्रीणाति। यथार्द्धमर्द्धेन क्रीणातीति च, लिखितपुस्तक पाठ।

अर्द्धचन्द्रं दधन्मूर्ध्नि पातु वः पार्व्वतीपतिः ।
कालकूटविषं हन्तुं सङ्गृहीतमिवामृतम् ॥

तथाच ।

तुल्यार्थं तुल्यसामर्थ्यं मर्म्मज्ञं व्यवसायिनम् ।
अर्द्धराज्यहरं भृत्यं यो न हन्यात् स हन्यते ॥

अत्रार्द्धस्य लक्षणं कुर्व्वाण एवं ज्ञापयत्याचार्य्यः, यदार्य्याया-मवान्तरपादव्यवस्था नास्ति । तेन द्वीपादन्यस्मादित्यादौ गण-त्रयस्यान्ते गुरुत्वं (१) न स्यात् ॥

द्वीपादन्यस्मादपि मध्यादपि जलनिधेर्दिशोऽप्यन्तात् ।
आनीय झटिति घटयति विधिरभिमतमभिमुखीभूतः ॥

(११९) अत्रायुङ् न ज् ॥ १५ ॥

'अत्र' आर्य्याच्छन्दसि, 'अयुग्' गणः, प्रथमस्तृतीयः पञ्चमः सप्तमश्च, 'न जगणः' मध्यगुरुर्न (२) कर्त्तव्यः । शेषास्तु कामतोऽत्र भवन्ति ॥

(१२०) षष्ठो ज् ॥ १६ ॥

आर्य्याच्छन्दसि षष्ठो गणो मध्यगुरुरेव (३) भवति । अत्रोदा-हरणम् ।

---

१ अन्यस्मादपि, घटयति, इत्युभयत्र ऌकारस्य मति पादान्तत्वे, 'गन्ते' (१।१०) इति गुरुत्वं भवेदिति भाव ।

२ मध्ये गुरुर्नेति ख, ग, चिह्नितपुस्तकपाठ ।

३ अत्रार्य्याच्छन्दसि षष्ठो गणो मध्ये गुरुरेवेति ख, चिह्नितपुस्तकपाठ ।

भ० १ स० २ द्वि० ३ द्वि० ४ स० ५ ज० ६ सर्व० ७ गु०

ऽ ऽ ऽ ऽ ऽ ऽ ऽ ऽ ऽ

सा जयति जगत्याद्या देवी दिवमुत्पतिष्णु रतिरुचिरा(१)।

द्वि० १ ज० २ स० ३ भ० ४ द्वि० ५ ज० ६ ए० ७ गु०

ऽऽ ऽ ऽ ऽ ऽ ऽ ऽ ऽ

याद्दश्यतेऽम्बरतले (२) कंसवधोत्पातविद्युदिव (३) ॥

(१२४) न्लौ वा ॥ १७ ॥

षष्ठ इत्यनुवर्तते। आर्यायाः षष्ठो गणः (IIII) सर्वलघुर्वा भवति ॥ तस्योदाहरणम्।

---

१ सामुत्पतिष्णुरतिरुचिरेति क, चिह्नितपुस्तकपाठः।

२ या दृश्यते गगनतले इति पुस्तकान्तरपाठः।

३ सा जयतीत्यस्य गणविभागदर्शनं यथा, 'सा जय' इति आदिगुर्वात्मको भ (ऽII) गण एकः १। 'तिजग' इति अन्त्यगुरुमान् स (IIऽ) गणो द्वितीयः २। 'त्याद्या' इति द्विगुरुको (ऽऽ) गणस्तृतीयः ३। 'देवी' इति च द्विगुरुको (ऽऽ) गणश्चतुर्थः ४। 'दिवमु' इति अन्त्यगुरुक स (IIऽ) गणः पञ्चमः ५। 'त्पतिष्णु' इति मध्यगुरुको ज (ऽI) गणः षष्ठः ६। 'रतिरुचि' इति चतुर्लघुरूपो (IIII) गणः सप्तमः ७। 'रा' इति एको गुरुः। एवमार्याया प्रथमेऽर्द्धे गुरुरूपेण सप्त गणा भवन्ति। तत्र षष्ठो जगणः कर्त्तव्यः। अन्येषु यथेच्छाचारः। 'याद्द' इति द्विगुरुको (ऽऽ) गण एकः १। 'श्यतेऽम्' इति मध्यगुरुको (IऽI) गणो द्वितीयः २। 'बरतले' इति अन्त्यगुरुमान् स (IIऽ) गणस्तृतीयः ३। 'कंसव' इति आदिगुरुर्भ (ऽII) गणश्चतुर्थः ४। 'धोत्पा' इति द्विगुरुरूपो (ऽऽ) गणः पञ्चमः ५। 'तविद्यु' इति मध्यगुरुमान् ज (ऽI) गणः षष्ठः ६। 'दि' इति एकलघुरूपो (I) गणः सप्तमः ७। 'व' इति एको (ऽ) गुरुः, पादान्तस्थस्य गुरुत्वनिर्देशात्।

द्वि०१ ज०२ द्वि०३ द्वि०४ द्वि०५ सर्व० ६ सर्व०७ गु०

ऽ ऽ ऽ ऽ ऽ ऽ ऽ ऽ ऽ ऽ

रूपान्तरेण देवीं तामेव स्तौमि, संपदि किल मंहिपः (१)।

द्वि०१ भ०२ भ०३ भ०४ न०५ ए०६द्वि०७ गु०

ऽ ऽ ऽ ऽ ऽ ऽ ऽ ऽ ऽ ऽ

पादस्पर्शसुखादिव मीलितनयनोऽभवद्यस्याः (२) ॥

(११४) न्लौ चेत् पदं द्वितीयादि । १८ ॥

षष्ठो गणः सर्वलघुश्चेद् भवति, तदा द्वितीयादक्षरादारभ्य पदं प्रवर्त्तते (३)। पूर्वमेवोदाहरणम् ।

---

१ मिपमत्विप इति ख, ग, चिह्नितपुस्तकपाठः। पुस्तकान्तरपाठश्च।

२ रूपान्तरेणेत्यस्या गणविभागव्याख्याप्रदर्शनं यथा, 'रूपा' इति द्विगुरुक (ऽऽ)श्चैको गण१। 'न्तरेण' इति ज (।ऽ।) गणो द्वितीय२। 'देवी' इति द्विगुरुक (ऽऽ) गणस्तृतीय३। 'तामे' इति च द्विगुरुक (ऽऽ)गणश्चतुर्थ४। 'व स्तौ' इति च द्विगुरुक (ऽऽ) गण पञ्चम५। 'मि सपदि' इति सर्वलघुमान्(।।।।)गण षष्ठ६। 'किल मधि' इति चपर सर्वलघुमान् (।।।।) गण सप्तम ७। 'प' इति एको गुरु (ऽ)। एवमस्या प्रथमेऽर्द्धे गुरुयुक्ता सप्त गणा भवन्ति। 'पाद' इति द्विगुरुक (ऽऽ)गण प्रथम१। 'स्पर्शसु' इति भ (ऽ।।) गणो द्वितीय २। 'खादिव' इति च भ (ऽ।।) गणस्तृतीय ३। 'मीलित' इति पुनर्भ (ऽ।।) गणश्चतुर्थ ४। 'नयनो' इति न (।।।) गण पञ्चम५। 'भ' इति एकलघुरूपो (।) गण षष्ठ६। 'वद्य' इति द्विगुरुरूपो(ऽऽ) गण सप्तम ७। 'स्या' इति एको गुरु ॥ इत्थमस्या उत्तरदलेऽपि गणैस्ता सप्तगणा जायन्ते। अस्या उभयदले एव षष्ठो गण६ सर्वलघुरेवास्ति, अत सर्वलघुमतो द्युमपराधः वेदितव्य।

एवं सर्वमार्याच्छन्दःसु वक्ष्यमाणेषु आर्योदाहरणेष्वपरिन्यस्त मात्रिकगणानां विभागो यथासम्भव व्याख्येय। विस्तारभयात्र तत्र तत्रैतादृशगणविभागो दर्शित, दर्शित केवल [illegible]।

३ षष्ठगणस्य चतुर्लघुरूपस्योदाहरणभूतानां चतुर्णामक्षराणां मध्ये द्वितीयादक्षरादारभ्य सुबन्तादि पदं प्रवर्त्तते इति सूत्रार्थ। यथा, 'मि सपदि' इति सर्वलघुरूपस्य

(११) सप्तमः प्रथमादि ॥ १९ ॥

षष्ठे गणे मध्यगुरौ (।ऽ।) सर्वलघौ वा (।।।।) जाते सप्तमो गणः सर्व-लघुश्चेत् भवति, तदा प्रथमाक्षरादारभ्य पदं प्रवर्त्तते [१]। तत्रो-दाहरणम् (२)।

द्वि०१ भ०२ द्वि०३ ज०४ द्वि०५ ज०६ सर्व०७ गु०

ऽऽ ऽ।। ऽऽ ।ऽ। ऽऽ ।ऽ। ।।।। ऽ

ब्रह्मक्षत्रकुलीनः प्रलीनसामन्तचक्रनुत चरणः ।

सर्व०१ ज०२ द्वि०३ द्वि०४ द्वि०५ ज०६ स०७ गु०

।।।। ।ऽ। ऽऽ ऽऽ ऽऽ ।ऽ। । ऽ

सकलसुकृतैकपुञ्जः श्रीमान् मुञ्जश्चिरञ्जयति (१२) ॥

सर्व०१ ज०२ द्वि०३ द्वि०४ सर्व०५ सर्व०६ सर्व०७ गु०

।।।। ।ऽ। ऽऽ ऽऽ ।।।। ।।।। ।।।। ऽ

जयतिभुवनैकवीरः सीरायुध तुलित विपुल बलविभवः ।

षष्ठगणस्य 'भि' कारं प्रथमाक्षरं परित्यज्य सप्तदीप्तस्य सकारात् द्वितीयाक्षरात् पद-प्रवृत्तिर्जाता । अत्र रचनाद्वा अपि रूपान्तरेके ति पूर्वपक्तिसमेतोदाहरणं बोध्यम् ।

१ सप्तमगणस्य प्रथमाक्षरादारभ्य सुकृताद्विपदं प्रवर्त्तते अत्र तत्र प्रथमाक्षर-स्यविरामार्थं पूर्वमाहृतम् इति सूत्रार्थः । यथास्य उदाहरणे 'सकल' इति षष्ठगणस्य मध्यगुरौस्दाहरणार्थेऽत्र सद्भूतानां सप्तमगणस्योदाहरणभूताना 'सुकृत' इति चतुर्थां मात्राणां प्रथमात 'सु' इत्यक्षरात् सुकृताद्विपदप्रवृत्तिर्जाता । अत्र तदक्षर गण-विभागनियमार्थं पूर्वमाहृतम् ।

२ षष्ठमध्यगुरुगणात् परत सप्तमसर्वलघुगणस्यार्थोदाहरणं [ब्रह्म चयेति । षष्ठसर्वलघुगणात् परत सप्तमसर्वलघुगणस्याथोदाहरणं जयतीति । उभयोर्गणप्रभेद-दर्शनकलोकाना समकोऽपि अर्ध वर्तते । तत् पूर्ववद् व्याख्येयम् ।

सर्व० १ ज०२ सर्व० ३ भ०४ द्वि०५ र०६ द्वि०७ गु०

। । । । । ऽ । । । । । ऽ । । ऽ ऽ । ऽ ऽ ऽ

अनवरतवित्त-वितरण निर्जित-चम्पाधिपो मुञ्जः ॥

(११७) अन्त्ये पञ्चमः ॥ २० ॥

अन्ते भवमन्त्यं, दिगादित्वाद् यत्। अन्त्ये द्वितीयेऽर्द्धे पञ्चमश्चेद् गणः (।।।।) सर्वलघुर्भवति, तदा प्रथमादि पदं प्रवर्त्तते। तत्रोदाहरणम्।

सर्व० १ भ० २ द्वि०३ भ०४ भ०५ ज०६ भ०७ गु०

। । । । ऽ । । ऽ ऽ । । ऽ । । ऽ । ऽ । ऽ । । ऽ

स जयति वाक्पतिराजः सकलार्थिमनोरथैक-कल्पतरुः।

द्वि०१ ज०२ भ०३ द्वि०४ सर्व०५ र०६ भ०७ गु०

ऽ ऽ । ऽ । ऽ । । ऽ ऽ । । । । । ऽ । । ऽ

प्रत्यर्थिभूत-पार्थिव-लक्ष्मीहठहरण-दुर्ललितः (१) ॥

(११८) षष्ठश्च ल् ॥ २१ ॥

अन्त्य इत्यनुवर्त्तते। 'अन्त्ये' द्वितीयेऽर्द्धे, मध्यगुरौ (।ऽ।) सर्वलघौ (।।।।) वा षष्ठे गणे प्राप्ते, तदपवादो लकारो विधीयते। पूर्वमेवोदाहरणम् ॥

---

१ अत्र उत्तरार्द्धे षष्ठहरेति पञ्चमस्य सर्वलघुत्वम् प्रथमादक्षरात् लकारात् आरभ्य पदोत्पत्ति, न तु चतुर्थस्याव्ययीभूमादक्षरात्। अत प्रथमादिपद-प्रभिमतो आर्येयम्।

(११९) त्रिषु गणेषु पादः पथ्यायै च ॥ २२ ॥

चकारोऽन्य इत्यनुकर्षणार्थः । यस्या आर्याया अर्द्धयोर्द्वे आये च त्रिषु गणेषु पादः समाप्यते, सा आर्या पथ्या नाम भवति । तद्यथा,

द्वि०१ द्वि०२ द्वि०३ भ०४ द्वि०५ ज०६ द्वि०७ गु०

ऽ ऽ ऽ ऽ ऽ ऽ ऽ । । ऽ ऽ । ऽ । ऽ ऽ ऽ

पथ्याशी व्यायामी स्त्रीषु जितात्मा नरो न रोगी स्यात् ।

सर्व०१ भ०२ द्वि०३ भ०४ द्वि०५ ल०६ द्वि०७ गु०

। । । । ऽ । । ऽ ऽ ऽ । । ऽ ऽ । ऽ ऽ ऽ

यदि वचसा मनसा वा द्रुह्यति नित्यं न भूतेभ्य. (१) ॥

पादग्रहणं यत्युपलक्षणार्थम् ॥

(१२०) विपुलाऽन्या ॥ २३ ॥

यस्या आर्याया अर्द्धयोर्द्वे आये वा उभयोर्वा त्रिषु गणेषु पादो न विश्राम्यति, सा आर्या विपुला नाम । सा चाद्यन्तोभय पूर्व्वकत्वात् त्रिधा भवति । सामान्येन विधानमेतत् । तत्रादि-विपुला ।

द्वि०१ द्वि०२ द्वि०३ भ०४ द्वि०५ सर्व०६ द्वि०७ गु०

ऽ ऽ ऽ ऽ ऽ ऽ । ऽ । ऽ ऽ । । । । ऽ ऽ ऽ

स्निग्धच्छाया-लावण्य लेपिनी किञ्चिदवनतघ्राणा ।

---

१ अस्या उभयदले गणत्रयेषु पादसमाप्तिरत एव पथ्या नामार्या ।

सर्व० १ द्वि०२ द्वि०३ म०४ द्वि०५ ए०६ द्वि०७ गु०

I I I I S S S S I I S S S I S S S

मुखविपुला सौभाग्यं लभते स्तोत्याद्द माण्डव्यः (१) ॥

अन्तविपुला ।

द्वि०१ ज०२ म०३ म०४ द्वि०५ ज०६ द्वि०७ गु०

S S I S I I I S S I I S S I S I S S S

चित्तं हरन्ति हरिणीदीर्घदृशः कामिनां कलालापैः ।

द्वि०१ ज०२ द्वि०३ सर्व०४ म०५ ए०६ सर्व०७ गु०

S S I S I S S I I I I I I S I I I I S

नीवीविमोचनव्याजकथितजघना जघनविपुला(१)॥

उभयविपुला ।

द्वि० १ सर्व०२ म०३ ज०४ द्वि०५ ज०६ म०७ गु०

S S I I I I I I S I S I S S I S I S I I S

या स्त्री कुचकलसनितम्बमण्डले जायते महाविपुला ।

द्वि०१ ज०२ म० ३ ज०४ भ०५ ए०६ भ०७ गु०

S S I S I I I S I S I S I I I S I I S

गम्भीरनाभिरतिदीर्घलोचना भवति सा सुभगा (१) ॥

---

१ अत्र मुखे आद्यदले 'स्निग्ध' 'च्छाया' 'भाग' इति [illegible] शब्दपर्यन्त पादौ विरामयति, अत एव मुखविपुला भवति [illegible]। [illegible] मुखप्रान्तलावती रमणी च मुखविपुला कथ्यते।

अत्रोच्यते। पथ्याविपुलालक्षणयोः सहानवस्थानलक्षण-विरोधस्तेन मिश्रीभावो नास्ति। य एवांशो विपुलया स्पृष्टस्तेनैव पथ्यात्वं नष्टं भवति। उभयाश्रयत्वात् पथ्यालक्षणस्य विपुलायास्तदंशेनापि प्रवेशो दुर्लभः। ततश्च पथ्यालक्षणैकांशवैकल्येऽपि तदन्यमात्रविषयत्वाद् विपुला भवत्येव। पथ्याचपलयोश्च विरोधाभावाद् बाध्यबाधकभावो नास्ति। तत्रायं सङ्ग्रहः।

एवैवं भवति पथ्या विपुलास्तिस्रस्तत स्तस्ताः (१)।
चपलाभेदैस्त्रिभिरपि भिन्ना इति षोडशार्याः स्युः ॥
गीतिचतुष्टयमित्थं प्रत्येकं षोडशप्रकारं स्यात्।
सङ्कलनेनार्याणामशीतिरेव भेदाः स्युः (२)।

'रमाभि' 'रजिह्रो' इत्यत्र च पादो न भिनत्त्यति, अत इयं महाविपुला नाम आर्या। कुचादिमत्त्वादिलक्षणयुक्ता ध्रौपिव महाविपुला उच्यते।

१ तिस्रोऽविपुलाश्चतस्त्र एवैता इति ख, ग चिह्नितपुस्तकपाठ। तिस्रो विपुला-श्चपलश्चतस्रा इति पुस्तकान्तरपाठ।

२ अशीतिरेव विकल्पाः स्युरिति ख, ग, चिह्नितपुस्तकपाठ। पुस्तकान्तरपाठश्च। एका पथ्या, तिस्रो विपुलाः, मिलिता एताः, चतस्रो जाताः। पुनरेता, चपला-भेदत्रयैः प्रत्येकं विशेषिताः सत्यो द्वादशान्या आर्या जायन्ते। एताश्च सर्वा मिलिताः षोडशार्याः भवन्ति। एवं गीतिउपगीतिउद्गीतिआर्यागीतिविशेषाय पूर्वोक्तषोडश-भेदैर्विभिन्नाः सत्यः प्रत्येकं षोडशषोडशप्रकाराः आर्याः जायन्ते। सर्वास्त्वेताः पञ्चषोडशसङ्ख्यात्मिका आर्याः मिलिता अशीतिप्रकारा जायन्ते। पुनरेता अशीति राशीः सुधियोऽधर्ममर्थाय क्रमेण मात्रोल्लेखेनापि विन्यसन्ते। यथा,

पथ्यार्या १। आदिविपुलार्या २। अन्तविपुलार्या ३। उभयविपुलार्या ४। मुखचपलापथ्यार्या ५। मुखचपलादिविपुलार्या ६। मुखचपलान्तविपुलार्या ७। मुखचपलोभयविपुलार्या ८। जघनचपलापथ्यार्या ९। जघनचपलादिविपुलार्या १०।

तेषामनुक्तोदाहरणान्यूह्यानि ॥

जघनचपलान्तविपुलार्यां ११। जघनचपलोभयविपुलार्यां १२। महाचपलापथ्यार्यां १३। महाचपलादिविपुलार्यां १४। महाचपलान्तविपुलार्यां १५। महाचपलोभयविपुलार्यां १६। गीतिपथ्यार्यां १७। गीत्यादिविपुलार्यां १८। गीत्यन्तविपुलार्यां १९। गीत्युभयविपुलार्यां २०। मुखचपलागीतिपथ्यार्यां २१। मुखचपलागीत्यादिविपुलार्यां २२। मुखचपलागीत्यन्तविपुलार्यां २३। मुखचपलागीत्युभयविपुलार्यां २४। जघनचपलागीतिपथ्यार्यां २५। जघनचपलागीत्यादिविपुलार्यां २६। जघनचपलागीत्यन्तविपुलार्यां २७। जघनचपलागीत्युभयविपुलार्यां २८। महाचपलागीतिपथ्यार्यां २९। महाचपलागीत्यादिविपुलार्यां ३०। महाचपलागीत्यन्तविपुलार्यां ३१। महाचपलागीत्युभयविपुलार्यां ३२। उपगीतिपथ्यार्यां ३३। उपगीत्यादिविपुलार्यां ३४। उपगीत्यन्तविपुलार्यां ३५। उपगीत्युभयविपुलार्यां ३६। मुखचपलोपगीतिपथ्यार्यां ३७। मुखचपलोपगीत्यादिविपुलार्यां ३८। मुखचपलोपगीत्यन्तविपुलार्यां ३९। मुखचपलोपगीत्युभयविपुलार्यां ४०। जघनचपलोपगीतिपथ्यार्यां ४१। जघनचपलोपगीत्यादिविपुलार्यां ४२। जघनचपलोपगीत्यन्तविपुलार्यां ४३। जघनचपलोपगीत्युभयविपुलार्यां ४४। महाचपलोपगीतिपथ्यार्यां ४५। महाचपलोपगीत्यादिविपुलार्यां ४६। महाचपलोपगीत्यन्तविपुलार्यां ४७। महाचपलोपगीत्युभयविपुलार्यां ४८। उद्गीतिपथ्यार्यां ४९। उद्गीत्यादिविपुलार्यां ५०। उद्गीत्यन्तविपुलार्यां ५१। उद्गीत्युभयविपुलार्यां ५२। मुखचपलोद्गीतिपथ्यार्यां ५३। मुखचपलोद्गीत्यादिविपुलार्यां ५४। मुखचपलोद्गीत्यन्तविपुलार्यां ५५। मुखचपलोद्गीत्युभयविपुलार्यां ५६। जघनचपलोद्गीतिपथ्यार्यां ५७। जघनचपलोद्गीत्यादिविपुलार्यां ५८। जघनचपलोद्गीत्यन्तविपुलार्यां ५९। जघनचपलोद्गीत्युभयविपुलार्यां ६०। महाचपलोद्गीतिपथ्यार्यां ६१। महाचपलोद्गीत्यादिविपुलार्यां ६२। महाचपलोद्गीत्यन्तविपुलार्यां ६३। महाचपलोद्गीत्युभयविपुलार्यां ६४। आर्यागीतिपथ्यार्यां ६५। आर्यागीत्यादिविपुलार्यां ६६। आर्यागीत्यन्तविपुलार्यां ६७। आर्यागीत्युभयविपुलार्यां ६८। मुखचपलार्यागीतिपथ्यार्यां ६९। मुखचपलार्यागीत्यादिविपुलार्यां ७०। मुखचपलार्यागीत्यन्तविपुलार्यां ७१। मुखचपलार्यागीत्युभयविपुलार्यां ७२। जघनचपलार्यागीतिपथ्यार्यां ७३। जघनचपलार्यागीत्यादिविपुलार्यां ७४। जघनचपलार्यागीत्यन्तविपुलार्यां ७५। *जघनचपलार्यागीत्युभयविपुलार्यां ७६। महाचपला

(१११) चपला द्वितीयचतुर्थौ गमध्ये जौ (१) ॥ २४ ॥

अधिकारोऽयम्। द्वितीयचतुर्थौ गणौ मध्यगुरू(।ऽ।)भवतः, प्रथमश्चान्तगुरुः(।।ऽ), तृतीयो द्विगुरुः(ऽऽ),पञ्चम आदिगुरुः(ऽ।।), शेषं यथाप्राप्तं। एवं गकारयोर्मध्ये द्वितीयचतुर्थौ जकारौ भवतः, सार्या चपला नाम। उदाहरणमग्रतः॥

(११२) पूर्वे मुखपूर्वा ॥ २५ ॥

पूर्वेऽर्द्धे चपलालक्षणञ्चेद् भवति, तदासौ मुखचपला आर्या (१)। यथापूर्वं मुखचपलोदाहरणम्।

गु० १	ज० २	द्वि० ३	ज० ४	द्वि० ५	ज० ६	म० ७	गु०
। । ऽ	। ऽ ।	ऽ ऽ	। ऽ ।	ऽ ऽ	। ऽ ।	ऽ । ।	ऽ

अतिदारुणा द्विजिह्वा परस्य मर्मानुसारिणी(२)कुटिला।

यौगोतिपथ्यार्या ७७। महाचपलायौगीत्यादिविपुलार्या ७८। महाचपलायौगीत्यन्त्यविपुलार्या ७९। महाचपलायौगीत्युभयविपुलार्या ८० इति। एतासामुदाहरणानि नामाद्यक्षरसूचानि। अप्रसिद्धिहेतोर्न तानि ग्रन्थेऽस्मिन् प्रदर्शितानि। अत्र मुखजघनशब्दयोः क्रमेण पूर्वमुत्तरमर्थः। यथा शरीरस्य मुखं पूर्वं जघनञ्चोत्तरमतोऽपि छन्दःशास्त्रे आर्यापूर्वोत्तरार्द्धयोर्मुखजघनलक्षणा। विपुलाचपलाशब्दयोरपि पूर्वोक्तलक्षणातिक्रमरूपोऽर्थः। यथा वैपुल्यचापल्ययोर्न नियमस्तिष्ठति नियमातिक्रम एव भवति। अतोऽत्रापि तयोः पूर्वोक्तलक्षणातिक्रमरूपार्थे व्यवहारः। आर्योदाहरणेषु मुखजघनादिशब्दानां पक्षे प्रकृतार्थोऽपि परिस्फुरति।

१ उभयदलयोर्गमध्यगौ जगणौ चेच्चपला स्यात् इति सिद्धान्ति, एवमेवैतत्पिङ्गलच्छन्दोमञ्जरीरत्नाकरादिषु प्रतिपादितम्। यत्तु हलायुधेन प्रथमश्चान्तगुरुरित्युक्तं, तच्चिन्त्यम्। सर्वत्र चपलोदाहरणेषु प्रथमस्यान्तगुरोः पञ्चमस्यादिगुरोश्च दर्शनात्।

२ मुखचपला नामेति ख, चिह्नितपुस्तकपाठः।

३ परस्य रन्ध्रानुसारिणीति ग, चिह्नितपुस्तकपाठः। एकमात्राऽन्तरपाठः।

द्वि०१ सर्व०२ द्वि०३ द्वि०४ द्वि०५ र०६ सर्व०७ गु०

ऽ ऽ । । । । ऽ ऽ ऽ ऽ ऽ ऽ । । । । ऽ

दूरात् परिहरणीया नारी नागीव मुखचपला (१) ॥

आदिविपुलापूर्वकं(२)मुखचपलोदाहरणम्।

द्वि०१ ज०२ द्वि०३ ज०४ द्वि०५ ज०६ द्वि०७ गु०

ऽ ऽ । ऽ । ऽ ऽ । ऽ । ऽ ऽ । ऽ । ऽ ऽ

यस्याश्च लोचने(३)पिङ्गले भ्रुवौ सङ्गते मुखं दीर्घम्।

म०१ ज०२ द्वि०३ द्वि०४ म०५ र०६ सर्व०७ गु०

। । ऽ । ऽ । ऽ ऽ ऽ ऽ ऽ । । । । । । । ऽ

विपुलोऽन्नतास्य दन्ताः कान्ताऽसौ भवति मुखचपला(४) ॥

उभयविपुलापूर्वं (५)मुखचपलोदाहरणम्।

---

१ अत्र उभयोर्दलयोस्त्रिषु गणेषु पादो विश्राम्यति, पुनः पूर्वार्द्धे 'दूराद्धि' इति द्वितीयः 'परिह' इतिचतुर्थश्च जगणः, पतिदेति [illegible] प्रथमः, 'नीया' इति तृतीयो द्विगुरुगणः, [illegible], एतेनैव मुखे पूर्वार्द्धे चपलालक्षणयुक्ता भवति, अतः पथ्यापूर्विका मुखचपला नाम आर्य्येयम्। 'मुखे' आस्ये, चापल्यवती उक्तलक्षणा नारी च मुखचपला नामेत्यपरोर्थः।

२ विपुलापूर्वकामिति क,चिह्नितपुस्तकपाठः।

३ यस्या विलोचने इति ख, ग,चिह्नितपुस्तकपाठः। पुस्तकान्तरपाठश्च।

४ अत्र मुखे पूर्वार्द्धे आदिविपुलावत् 'नेपि' इति तृतीयगणान्ते पादो न विश्राम्यति, अथ द्वितीयार्द्धे तु 'दन्ता' इति तृतीयगणान्ते पादः पथ्यावत् विश्राम्यति, द्वितीयचतुर्थौ च जगणौ स्तः, अत इदमादिविपुलापूर्विका मुखचपलानामार्या। पिङ्गललोचनादिलक्षणसम्पन्ना मुखे वाक्चापल्यवती नारी च मुखचपलेत्युच्यते।

५ उभयविपुलापूर्वकमिति ख, चिह्नितपुस्तकपाठः, पुस्तकान्तरपाठश्च।

स०१ ज०२ द्वि०३ ज०४ द्वि०५ ज०६ द्वि०७ गु०

I I ऽ I ऽ I ऽ ऽ I ऽ I ऽ ऽ I ऽ I ऽ ऽ ऽ

विपुलाभिजातवंशोद्भवापि रूपातिरेकरम्यापि।

द्वि०१ ज०२ द्वि०३ ज०४ सर्व०५ ए०६ सर्व०७ गु०

ऽ ऽ I ऽ I ऽ ऽ I ऽ I I I I I I I I I I ऽ

निःसार्य्यते गृहादसभापि यदि भवति मुखचपला (१)॥

(१२२) जघनपूर्व्वेतरश्च ॥ २६ ॥

द्वितीयेऽर्द्धे चपलालक्षणञ्चेद् भवति, सा आर्य्या जघनचपला नाम।

तत्र पथ्यापूर्व्वकं जघनचपलोदाहरणम्।

द्वि०१ भ०२ द्वि०३ भ०४ स०५ ज०६ द्वि०७ गु०

ऽ ऽ ऽ I I ऽ ऽ ऽ I I I I ऽ I ऽ I ऽ ऽ ऽ

यत्पादस्य कनिष्ठा, न स्पृशति महीमनामिका वापि।

द्वि०१ ज०२ द्वि०३ ज०४ द्वि०५ ए०६ सर्व०७ गु०

ऽ ऽ I ऽ I ऽ ऽ I ऽ I ऽ ऽ I I I I I ऽ

सा सर्व्वधूर्त्तभोग्या, भवेदवश्यं जघनचपला (२)॥

अन्तविपुलापूर्व्वकं जघनचपलोदाहरणम्।

---

१ अस्या उभयदले गणत्रयान्ते पादो न विरमति, पुनः द्वितीयचतुर्थौ जगणौ, प्रथमो मगण, तृतीयो द्विगुरुः वर्त्तते, अत एवमुभयविपुलापूर्व्विका मुखचपला नाम आर्य्या। उक्तलक्षणा मुखे चार्व्वी वाक्चापल्यवती च नारी मुखचपलेत्युच्यते।

२ अस्याः पूर्व्वार्द्धे 'यत्पा' 'दस्य' 'निष्ठा' इति गणत्रयान्ते पाद समाप्यते, 'जघने' उत्तरार्द्धे द्वितीय, चतुर्थस्य जगणौ वर्त्तते, अत एवं पथ्यापूर्व्विका जघनचपलानामार्य्या बोध्या। एतदर्थोलक्षणा जघनयोश्चापल्यवती नारी च जघनचपलेत्युच्यते।

द्वि०१ द्वि०२ द्वि०३ ज०४ द्वि०५ ज०६ द्वि०७ गु०

ऽ ऽ ऽ ऽ ऽ ऽ । ऽ । ऽ ऽ । ऽ । ऽ ऽ ऽ

यस्याः पादाङ्गुष्ठं व्यतीत्य याति प्रदेशिनी दीर्घा।

स०१ ज०२ द्वि०३ ज०४ स०५ ल०६ स०७ गु०

। । ऽ । ऽ । ऽ ऽ । ऽ । ऽ । । । । । ऽ ऽ

विपुले कुले प्रसूतापि सा ध्रुवं जघनचपला स्यात् (१)॥

महाविपुलापूर्व्वकं जघनचपलोदाहरणम्।

स०१ स०२ स०३ ज०४ स०५ ज०६ द्वि०७ गु०

। । ऽ । । ऽ । । ऽ । ऽ । ऽ । । । ऽ । ऽ ऽ ऽ

मकरध्वजसद्मनि दृश्यते स्फुट तिलकस्याञ्चलं यस्याः।

स०१ ज०२ द्वि०३ ज०४ स०५ ल०६ स०७ गु०

। । ऽ । ऽ । ऽ ऽ । ऽ । ऽ । । । । । ऽ ऽ

विपुलान्वयाभिजातापि जायते जघनचपलासौ (२)॥

(१२४) उभयोर्महाचपला ॥ ३७ ॥

यस्या उभयोरर्द्धयोश्चपलालक्षणं भवति, सा आर्य्या महाचपला नाम। तत्र पथ्यापूर्व्वकं महाचपलोदाहरणम्।

प०१ ज०२ द्वि०३ ज०४ द्वि०५ ज०६ द्वि०७ गु०
। । ऽ । ऽ । । ऽ ऽ । ऽ । ऽ ऽ । ऽ । ऽ ऽ ऽ
हृदयं हरन्ति नार्य्यो मुनेरपि भ्रूकटाक्षविक्षेपैः।

द्वि०१ ज०२ द्वि०३ ज०४ द्वि०५ र०६ स०७ गु०
ऽ ऽ । ऽ । ऽ ऽ । ऽ । ऽ ऽ । ऽ । । ऽ
दोर्मूलनाभिदेशं निदर्शयन्त्यो महाचपलाः (१)॥

विपुलापूर्व्वकं महाचपलोदाहरणम्।

प०१ ज०२ द्वि०३ ज०४ द्वि०५ ज०६ द्वि०७ गु०
। । ऽ । ऽ । ऽ ऽ । ऽ । ऽ ऽ ऽ । ऽ । ऽ ऽ ऽ
चिबुके कपोलदेशेऽपि कूपिका दृश्यते स्मिते यस्याः।

कामिनी जघनचपलोच्यते। मकरध्वजस्य यत्रापि भवति स्फुटमिलनलालसम् यस्या इति क, खिलितपुस्तकपाठः। परन्त्वेतादृशपाठे महाविपुलालक्षणं न घटते। अत्र तु मयुरीलाय गणत्रयान्ते पादविरामो जायते, अतस्तु नैव बाधकम्। एवमादौ प्रथमे विपुलान्वयजाताऽपि इति, विपुलान्वयजाताऽपि इति, विपुले कुले प्रजाताऽपीति च पुस्तकत्रयपाठः।

१ यस्या यथावदुभयत्र गणत्रयात् पादो विरमति, पुनश्च चपलावत् गणभङ्गौ जगणौ द्वितीयचतुर्थौ, द्विगुरुमध्यौ, वर्तेते, सा इयं पथ्यापूर्व्विका महाचपला नामार्या। एतदार्योक्तलक्षणा महाचापल्यविशिष्टा सुन्दरी च महाचपलोच्यते।

स०१ ज०२ द्वि०३ ज०४ द्वि०५ ह०६म०७ गु०

I I S I S I S S I S I S S I S I I S

विपुलान्वयप्रसूतापि जायते सा महाचपला (१) ॥

(१३) आद्यर्द्धसमा गीतिः ॥२८॥

आद्येनार्द्धेन सममन्त्यं यस्याः (२) सा आद्यर्द्धसमा, मध्यपद-लोपी समासः (३)। एतदुक्तं भवति द्वितीयेऽप्यर्द्धे षष्ठो गणो जकारो न्लौ वा कर्त्तव्यः। तत्र पथ्यागीत्युदाहरणम्।

स०१ द्वि०२ स०३ भ०४ स०५ ज०६ द्वि०७ गु०

I I S S I I S S I I I S I S I S S S

मधुरं वीणारणितं पञ्चमसुभगश्च कोकिलालापः।

द्वि०१ भ०२ द्वि०३ स०४ स०५ ज०६ भ०७ गु०

S S S I I S S I I S I I S I S I S I I S

गीतिः पौरवधूनामधुना कुसुमायुधं प्रबोधयति (४) ॥

आदिविपुलागीत्युदाहरणम्।

---

१ यस्या विपुलावदुभयत्र गणत्रयान्ते पादो न विश्राम्यति, पुनस्तत्र महाचपला-वत् गमध्यगौ जगणौ द्वितीयचतुर्थौ, द्विगुरुस्तृतीय, वर्त्तते, सा इव विपुला पूर्विका महाचपला नामार्या वेदितव्या। उक्तलक्षणा महाचापल्यवती च नार्य्या महाचपलेत्युच्यते।

२ आद्यर्द्धेन सममन्त्यमर्द्धं यस्या इति ख, ग, चिह्नितपुस्तकपाठः। आद्येन सममन्त्यमर्द्धं यस्याः, आद्यार्द्धेन सममन्त्यं यस्या इति च पुस्तकान्तरपाठः।

३ अन्त्यपदलोपी समास इति ख, ग, चिह्नितपुस्तकपाठः।

४ पौरवधूनां सुप्तं कुसुमायुधं प्रबोधयतीति ख, ग, चिह्नितपुस्तकपाठः। यस्याः पथ्यावदुभयत्र गणत्रयान्ते पादो विश्राम्यति, पुनरस्या उभयार्द्धे षष्ठजगणयुक्तत्वात्

सर्व०१ भ०२ द्वि०३ ज०४ द्वि०५ ज०६ भ०७ गु०

I I I I ऽ I I ऽ ऽ I ऽ I ऽ ऽ I ऽ I I I ऽ ऽ

इयमपरा विपुलागीतिरुच्यते सर्व्वलोकहितहेतोः ।

स०१ ज०२ द्वि०३ ज०४ भ०५ ज०६ द्वि०७ गु०

I I ऽ I ऽ I ऽ ऽ I ऽ I I I ऽ I ऽ I ऽ ऽ ऽ

यदनिष्टमात्मनस्तत्परेषु भवतापि मा क्वचित् कारि (१)॥

पथ्यामहाचपलागीत्युदाहरणम् ।

द्वि०१ ज०२ द्वि०३ ज०४ द्वि०५ ज०६ स०७ गु०

ऽ ऽ I ऽ I ऽ ऽ I ऽ I ऽ ऽ I ऽ I I I ऽ ऽ

कामस्त्वकास्ति गीतिर्म्मृगीदृशां सीधुपान-चपलानाम् ।

स०१ ज०२ द्वि०३ ज०४ द्वि०५ सर्व०६ स०७ गु०

I I ऽ I ऽ I ऽ ऽ I ऽ I ऽ ऽ I I I I I I ऽ ऽ

सुरतञ्च मुक्तलज्जं निरर्गलालापमखिलरमणीयम् (२)॥

महाचपलामहाविपुलागीत्युदाहरणम् ।

समाप्ते वर्त्तते, अत इयमार्य्याप्रथमार्द्धलक्षणवती पथ्यापूर्व्विका गीतिर्नामार्य्या ज्ञातव्या। स्वराणामालापश्च गीतिरुच्यते।

१ अस्या विपुलावत् पूर्व्वार्द्धे गणत्रयेषु पादो न विरंस्यति, उत्तरार्द्धे नाम विरंस्यति, पुनरुभे दले षष्ठजगणवत्वात्माने वर्त्तेते, अत इयमादिविपुलापूर्व्विकार्द्धं प्रथमार्द्धलक्षणवती गीतिर्नामार्य्या। विपुलोद्द्योषश्च विपुला गीतिरुच्यते।

२ निरर्गलालापभणितरमणीयमिति पुस्तकान्तरपाठः। निरर्गलालापभणितरमणीयमिति ख, चिह्नितपुस्तकपाठ। निरर्गलालापभणितरमणीयमिति ग, चिह्नितपुस्तकपाठः। अस्या पथ्यावदुभयत्र गणत्रयान्ते पादो विरंस्यति, पुन

द्वि०१ ज०२ द्वि०३ ज०४ द्वि०५ सर्व०६ सर्व०७ गु०

ऽ ऽ । ऽ । ऽ ऽ । ऽ । ऽ ऽ । । । । । । । । ऽ

पञ्चेषुवल्लभः पञ्चमध्वनिस्तत्र भवति यदि विपुलः।

स०१ ज०२ द्वि०३ ज०४ द्वि०५ ज०६ द्वि०७ गु०

। । ऽ । ऽ । ऽ ऽ । ऽ । ऽ ऽ । ऽ । ऽ ऽ ऽ

चपलं करोति कामाकुलं मनः कामिनामसौ गीतिः (१)॥

(१२९) अन्त्येनोपगीतिः ॥२९॥

अन्त्येनार्द्धेन सममाद्यमर्द्धं यस्याः, सा आर्य्या उपगीतिर्नाम।

तत्र पथ्योपगीत्युदाहरणम्।

द्वि०१ भ०२ भ०३ द्वि०४ द्वि०५ स०६ज०७ गु०

ऽ ऽ ऽ । । ऽ । । ऽ ऽ ऽ ऽ । ऽ । ऽ ऽ

गान्धर्वं मकरध्वजदेवस्यास्त्रं जगद्विजयि।

प्रथमेऽर्द्धे षष्ठो जगणः, द्वितीयेऽर्द्धे षष्ठो नलघुरूपः सर्वलघुर्गणोऽस्ति, महाचपलावत् उभयत्र द्वितीयतुर्य्यौ गमध्ये जौ, तृतीयो द्विगुरुः, वर्त्तते, अत इयं पथ्यामहाचपला पूर्विका गीतिर्नामार्य्या।

१ अस्यां महाचपलावत् दलद्वये द्वितीयतुर्य्यौ गमध्यगौ जौ, तृतीयो द्विगुरुश्चास्ति, पुनरुभयार्द्धे महाविपुलावत् गणत्रयान्ते पादो न विश्राम्यति, प्रथमार्द्धे पुनः षष्ठो नलघुरूपः सर्वलघुर्गणः द्वितीयार्द्धे षष्ठो जगणो वर्त्तते, अत इयं महाचपला महाविपुलापूर्विका गीतिर्नामार्य्या। इत्थायुधमते गीतिलक्षणे षष्ठो जगणो नलघु-रूपेण गणेन विकल्प्यते, अत एतदुदाहरणद्वये प्रथमार्द्धे द्वितीयार्द्धे च षष्ठो नलघुरूपो गणो दृश्यते।

सर्व०१ भ०२ भ०३ स०४ द्वि०५ ए०६द्वि०७ गु०

I I I I S I I S I I I I S S S I S S S

इति समवेक्ष्य मुमुक्षुभिरुपगीतिस्त्यज्यते देशः(१) ॥

महाविपुलोपगीत्युदाहरणम्(२)।

स०१ ज०२ द्वि०३ सर्व०४ भ०५ ए०६द्वि०७ गु०

I I S I S I S S I I I I I I I I S S S

विपुलोपगीतिझङ्कारमुखरिते भ्रमरमालानाम्।

द्वि०१ ज०२ द्वि०३ स०४ स०५ ए०६द्वि०७गु०

S S I S I S S I S I I I S I S S S

रेवातपोवने वञ्जुलोऽस्तु सततं मम प्रीतिः (३) ॥

पथ्यामहाचपलोपगीत्युदाहरणम्।

स०१ ज०२ द्वि०३ ज०४ द्वि०५ ए०६स०७ गु०

I I S I S I S S I S I S S I S I I S

विषयामिषाभिलाषं करोति चित्तं सदा चपलम्।

---

१ यस्याः प्रथमयोः पादे पथ्यावद् विरमति, पुनरपरार्धे षष्ठे लघुगणमध्यात् गणमध्यम वर्तते, सा इयमार्याभेदसन्निवेशवती पथ्यापूर्विकोपगीतिर्नामार्या। विपरीतभावप्रभावतोपगीतिरुच्यते।

२ पथ्याविपुलोपगीत्युदाहरणमिति क, लिखितपुस्तकपाठो न सङ्गतः।

३ वञ्जुलप्रसवं दिशे प्रीतिरिति ख, लिखितपुस्तकपाठः। पुस्तकान्तरपाठश्च। यस्या उभयदलयोरपि प्रथमे पादे न विरामयति, एवं षष्ठे लघुगणमध्ये द्वितीयदलस्यापि मध्यमे वर्तते, सा इयं नामाद्युपलक्षणतया महाविपुला-पूर्विकोपगीतिर्नामार्या। अनुक्तेनापि विपुलोपगीतिः कथ्यते।

द्वि॰१ ज॰२ द्वि॰३ ज॰४ द्वि॰५ ल॰६द्वि॰७ गु॰

ऽ ऽ । ऽ । ऽ ऽ । ऽ । ऽ ऽ । ऽ ऽ ऽ

वैराग्यभावनानां तथोपगीत्या भवेत् स्वस्थम्(१)॥

महाचपला महाविपुलोपगीत्युदाहरणम्(२)।

म॰१ ज॰२ द्वि॰३ ज॰४ म॰५ ल॰६द्वि॰ गु॰

। । ऽ । ऽ । ऽ ऽ । ऽ । ऽ । । । ऽ ऽ ऽ

विपुलोपगीति सन्त्यज्यतामिदं स्तत्वकं भिद्यो(३)।

म॰१ ज॰२ द्वि॰३ ज॰४ द्वि॰५ ल॰६द्वि॰७ गु॰

। । ऽ । ऽ । ऽ ऽ । ऽ । ऽ ऽ । ऽ ऽ ऽ

विषयाभिलाषदोषेण बाध्यते चञ्चलं चित्तम्(४)॥

(१९०) उत्क्रमेणोद्गीतिः॥ ३०॥

पूर्वोक्तात् क्रमाद् विपरीतक्रम उत्क्रमः। अयमर्थः, आद्य-

---

१ यस्या उभयत्र गणत्रयेण पादो विश्राम्यति, पुनः षष्ठैकलघुमध्यवदार्धद्वितीयदलवद्दलद्वयमस्ति, द्वितीयतुर्यौ जगणौ वा, उभयत्र द्विगुरुः तृतीयः, वर्तते, अत एव नामानुरूपलक्षणाक्रान्ता पथ्यामहाचपलापूर्विकोपगीतिर्नामार्या।

२ महाविपुलामहाचपलोपगीत्युदाहरणमिति ख, ग, चिह्नितपुस्तकपाठः।

३ इदं स्थाने भिद्यो इति ख, ग, चिह्नितपुस्तकपाठः। पुस्तकान्तरपाठश्च।

४ बध्यते चञ्चलं चेत इति ख ग, चिह्नितपुस्तकपाठः। पुस्तकान्तरपाठश्च। यस्या उभयार्द्धे प्रथमः मगणः, द्वितीयचतुर्थौ जगणौ, तृतीयो द्विगुरुः, महाविपुलावत् पुनरुभयत्र गणत्रयान्ते पादो न विश्राम्यति, उपगीतिवत् षष्ठैकलघुमध्यवदार्धाद्दलद्वयं च वर्तते, अत एव नामत्रयानुरूपलक्षणाक्रान्ता महाचपलामहाविपुला पूर्विकोपगीतिर्नामार्या।

मन्त्यं (१) भवत्यर्द्धमन्त्यमादौ, सा उद्गीतिर्नामार्या। तत्र पथ्योद्गीत्युदाहरणम्।

भ०१ द्वि०२ स०३ भ०४ द्वि०५ ए०६ भ०७ गु०

S | | S S | | S | | S S S | S | | S

व्याध इवोद्गीतिरवैः प्रथमं तावन्मनो चरसि।

भ०१ भ०२ भ०३ द्वि०४ द्वि०५ ज०६ द्वि०७ गु०

S | | | | S S | | S S S S | S | S S S

दुर्नयकर विश्राम्यसि पश्चात् प्राणेषु विप्रियैः शल्यैः (२) ॥

महाविपुलोद्गीत्युदाहरणम्।

द्वि०१ ज०२ द्वि०३ ज०४ स०५ ए०६भ०७ गु०

S S | S | S S | S | | | S | S | | S

एषा तवापरोद्गीतिरत्र विपुला परिभ्रमति (३)।

द्वि०१ ज०२ द्वि ३ सर्व०४ द्वि०५ ज०६ स०७ गु०

S S | S | S S | | | | S S | S | | | S S

त्वद्दत्तभाविघत् कीर्त्तिरखिलदिक्पालपार्श्वमुपयाति(४)॥

पथ्यामहाचपल द्गीत्युदाहरणम्।

---

१ आद्यमन्ते इति ख, ग, चिह्नितपुस्तकपाठ।

२ विप्रियै र्व्वैरिति ग चिह्नितपुस्तकपाठ। अस्या पथ्यावदुभयच गणत्रये पादो विश्राम्यति पुन षष्ठैकलघुमत्त्वदार्याया अन्त्यमर्द्धमनादौ, षष्ठजगणवदाद्यमर्द्धं चान्ते वर्त्तते, अत एव पथ्यापूर्व्विकोद्गीतिर्नामार्या।

३ उद्गीति मवत परिभ्रमतीतिपाठ क, चिह्नितपुस्तकेऽस्ति। परन्तु एतादृश पाठे उद्गीतिलक्षणमन्वयो न भवति। प्रथमार्द्धे षष्ठैकलघुगणस्याभावात्।

४ अस्या उभयदले महाविपुलावद्गणत्रये पादो न विश्राम्यति, पुनरार्याया षष्ठ

द्वि॰१ ज॰२ द्वि॰३ ज॰४ द्वि॰५ र॰६ म॰७ गु॰

ऽ ऽ ।ऽ। ऽ ऽ ।ऽ। ऽ ऽ ।।। ऽ ऽ

उद्गीतिरत्र नित्यं प्रवर्त्तते कामचपलानाम्।

द्वि॰१ ज॰२ द्वि॰३ ज॰४ द्वि॰५ ज॰६ द्वि॰७ गु॰

ऽ ऽ ।ऽ। ऽ ऽ ।ऽ। ऽ ऽ ।ऽ। ऽ ऽ ऽ

तस्मान् मुने विमुञ्च प्रदेशमेतं समेतमेताभिः(¹)॥

महाविपुलामहाचपलोद्गीत्युदाहरणम्।

स॰१ ज॰२ द्वि॰३ ज॰४ द्वि॰५ र॰६ स॰७ गु॰

।।ऽ ।ऽ।ऽऽ ।ऽ।ऽ ऽ।ऽ।।ऽ

विपुला पयोधरश्रोणिमण्डले चक्षुषोश्चपला।

द्वि॰१ ज॰२ द्वि॰३ ज॰४ द्वि॰५ ज॰६ स॰७ गु॰

ऽ ऽ ।ऽ।ऽऽ ।ऽ। ऽ ऽ ।ऽ।ऽ।।ऽ

उद्गीतिशालिनी कामिनी च मा वालिनी मनो हरति(²)॥

लघुगणवद् द्वितीयार्द्धमाद्य, महाचपलावत् प्रथमार्द्धमन्त्यं वर्त्तते, अत इयं लक्ष्यलक्षणाक्रान्ता महाविपुलापूर्व्विकोद्गीतिर्नामार्या। महत्युद्घोषणा ■ विपुलोद्गीतिरुच्यते।

१ प्रदेशमेन समेतैमेताभिरिति ख, चिह्नितपुस्तकपाठः, पुस्तकान्तरपाठश्च। अस्या पथ्यावद् दलद्वये त्रिषु गणेषु पादो विश्राम्यति, पुनरुत्तरार्द्धे महाचपलावद् द्वितीयचतुर्थौ जगणौ गुरुमध्यगतौ च, द्विगुरुश्च तृतीयो वर्त्तते, पुनरुद्गीतिवदार्य्योभयार्द्धे विपरीते वर्त्तेते, अत इयं लक्ष्यलक्षणाक्रान्ता पथ्यामहाचपला-पूर्व्विकोद्गीतिर्नामार्या।

२ चालिनी मनो हरतीति ख, चिह्नितपुस्तकपाठः, पुस्तकान्तरपाठश्च। अस्या दलद्वये महाविपुलावद्गणत्रये पादो न विश्राम्यति, पुनर्महाचपलावदुभयार्द्धे

(१२८) अर्द्धे वसुंगण आर्य्यागीतिः ॥ ३१ ॥

अष्टगणे प्रथमार्द्धे, सा (१) आर्य्यागीतिर्नामार्या । अष्टमोऽपि गणश्चतुर्मात्रको(२) भवतीत्यर्थः । विशेषाभावाद्द्वितीयमप्यर्द्धं तादृशमेव । अत्रापि षष्ठो गणो द्विविकल्प एव नलकारः । अर्द्धे इति वर्त्तमाने पुनरर्द्धग्रहणात् गणग्रहणाच्च इयमपि पथ्यादिलक्षणपूर्व्विका आर्य्यागीतिः । पथ्यार्य्यागीत्युदाहरणम् ।

सर्व॰१ सर्व॰२ द्वि॰३ द्वि॰४ द्वि॰५ ज॰६ द्वि॰७ स॰८

I I I I I I I I S S S S S S I S I S S I I S

अजमजरममरमेकं प्रत्यक् चैतन्यमीश्वरं ब्रह्मपरम् ।

द्वि॰१ द्वि॰२ स॰३ स॰४ द्वि॰५ ज॰६ द्वि॰७ द्वि॰८

S S S S I I S I I S S S I S I S S I S

आत्मान भावयती भवमुक्तिः स्यादितीयमार्य्यागीतिः (१)॥

महाविपुलार्य्यागीत्युदाहरणम् ।

द्वितीयचतुर्थौ गुरुमध्यगौ जगणौ, द्विगुरुश्च तृतीयोऽस्ति, पुनरुद्गीतिवदार्धे भयार्द्धे विपरीते वर्त्तेते, अत इयं महाविपुलासम्बाधमलापूर्व्विकोद्गीतिर्नामार्या ।

१ अष्टगणाः प्रथमार्द्धे यस्या भवन्ति सा इति ग, चिह्नितपुस्तकपाठः ।

२ चतुर्मात्रिक इति ख, ग चिह्नितपुस्तकपाठः, पुस्तकान्तरपाठश्च । चतुर्मात्रिक एव इति ग, चिह्नितपुस्तकपाठः ।

१ अस्याः पथ्यावत् त्रिषु गणेषु पादो विश्राम्यति, पुनरुभयदलयोरष्टगणाः सन्ति । षष्ठश्च जगणो वर्त्तते अत इयं पथ्यापूर्व्विकार्य्यागीतिर्नामार्या । पार्थजनामा सामन्नाद्गीतिरार्य्यागीति कथ्यते ।

स०१ ज०२ स०३ ज०४

। । ऽ । ऽ । । । ऽ । ऽ ।

विषयाभिलाषमृगतृष्णिका भु

स०५ सर्व०६ सर्व०७ गु०८

ऽ । । । । । । । । । । । । ऽ

वं हरति हरिणमिव हतहृदयम्।

स०१ ज०२ स०३ ज०४

। । ऽ । ऽ । । । ऽ । ऽ ।

विपुलात्ममोक्षसुखकाङ्क्षिभिस्त-

द्वि०५ ज०६ सर्व०७ द्वि०८

ऽ ऽ । ऽ । । । । । ऽ ऽ

स्त्यज्यते विषयरससङ्गः (१)॥

मध्याजघनचपलार्य्यागीत्युदाहरणम्।

द्वि०१ ज०२ द्वि०३ स०४ द्वि०५ सर्व०६ स०७ स०८

ऽ ऽ । ऽ । ऽ ऽ । । ऽ ऽ ऽ । । । । । । । ऽ । । ऽ

वाताहतोर्म्मिमालाचपलं सम्प्रेक्ष्य विषयसुखमत्यन्तरम्।

---

१ विपुलात्मभिरत्नो मोक्षकाङ्क्षिभिस्त्यज्यते विषयसुखसङ्ग इति ग, चिह्नित-पुस्तकपाठः। अस्या महाविपुलावद्दलद्वये त्रिषु गणेषु पादे न विश्राम्यति, पुनरुभयदलयोरष्टगणा सन्ति। षष्ठो गणः सर्वलघुर्मध्यगुरुश्च वर्त्तते। अत इयं महाविपुलापूर्विकार्य्यागीतिर्नार्या।

द्वि०१ ज०२ द्वि०३ भ०४ द्वि०५ ज०६ द्वि०७ गु०८

ऽ ऽ । ऽ । ऽ ऽ । ऽ । ऽ ऽ । ऽ । ऽ ऽ । । ऽ

मुक्त्वा समस्तसङ्गं तपोवनान्याश्रयन्ति तेनात्मविदः (१) ॥

महाविपुलामहाचपलार्यागीत्युदाहरणम् ।

स०१ ज०२ द्वि०३ ज०४ द्वि०५

। । ऽ । ऽ । ऽ ऽ । ऽ । ऽ ऽ

चपलानि चक्षुरादीनि चित्तहारि

ज०६ सर्व०७ गु०८

। ऽ । । । । । । । ऽ

च घ्नन्ति सततविषयगणः ।

द्वि०१ ज०२ द्वि०३ ज०४ स० ५

ऽ ऽ । ऽ । ऽ ऽ । ऽ । ऽ । ।

एकान्तशीलिनां (२) योगिनामतो भव

सर्व०६ स०७ द्वि०८

। । । । । । ऽ ऽ ऽ

ति परमसुखसम्प्राप्तिः (३) ॥

इत्यार्याधिकारः ॥

---

१ अत्र पथ्यार्यागीत्योरुभयत्रसम्भवोऽस्ति, पुनः, जघनचपलावत्परमेतद् द्वितीयचतुर्थौ गुरुमध्यमौ भगणौ, द्विगुणश्च तृतीयोऽस्ति। अत इयं पथ्याजघनचपला पूर्वकार्यागीतिर्ज्ञातव्या।

२ एकान्तशीलिनामिति च, लिखितपुस्तकपाठः, पुस्तकान्तरपाठश्च।

३ अस्याः महाविपुलात्वदर्शनाय पादो न विभाज्यते। पूर्वापरदलयोरष्टमः,

(अथ वैतालीयाधिकारः।)

(९९)वैतालीय द्विःस्वरा अयुक्पादे युग्वसवोऽन्ते ल्र्गाः॥३२॥

ल इत्यनुवर्त्तते। यत्र 'अयुक्पादे' प्रथमे तृतीये च, 'द्विःस्वराः' चतुर्दशलकारा भवन्ति, 'युक्पादे च द्वितीये चतुर्थे च, 'युग्वसवः' षोडशलकाराः, तद् वैतालीयं नाम च्छन्दः। तेषां लां मध्ये उभयोरपि (१) पादयोरन्ते रेफलकारगकाराः कर्त्तव्याः। आद्ये पादे षड्लकाराः पश्चादवशिष्यन्ते, द्वितीये चाष्टौ। एवं वैतालीयार्द्धं सिद्ध्यति। द्वितीयमप्यर्द्धं तादृशमेव। तत्रोदाहरणम्।

रगण ल० गु०

१।२ ३।४ ५ ६ ७।८ ९ १०।११ १२ १३।१४ १।२ ३।४ ५।६ ७
स्तुत् त्तो ण श री र स ञ्च या व्य क्तौ भू त-

रगण ल० गु०

८ ९।१० ११ १२।१३ १४ १५।१६
गि रा ऽस्थि प ञ्ज राः।

तत्र षष्ठो लघो मध्यगुरु पर्वत्रय वर्जिते, युग्मपादे [illegible], द्वितीय चतुर्थौ [illegible], गुरुमध्यतो, द्विगुरु [illegible]। [illegible]
मसादयसम्पूर्विकार्थोमितिनोकार्थः।

१ दयोरपीति घ म, [illegible]। [illegible]।

रगण　लं० गु०

१२ ३।४ ५ ६ ७।८ ९ १०।११ १२ १३।१४ १।२ ३।४ ५।६ ०

के शैः प रु पै स्त वा र यो वै ता ली यं

रगण　लं० गु०

८ ९।१० ११ १२।१३ १४ १५।१६

त नुं वि त न्व ते (१)॥

अपिच।

तव तन्वि कटाक्षवीचिभिः प्रचरद्भिः (२)श्रवणान्तगोचरैः।
विशिखैरिव तीक्ष्णकोटिभिः प्रहतः प्राणिति दुष्करं गतः(३)॥

अपिच।

श्रवशोणितपङ्कराञ्जितं (४) पुरुपान्त्रग्रथितोर्ध्वमूर्द्धजम्।

---

१ अस्य प्रथमतृतीययोः पादयोश्चतुर्दशमात्रा, द्वितीयचतुर्थयोः षोडशमात्रा सन्ति, पुनरयुक्पादे षट्, युक्पादे चाष्टौ मात्रास्ततः परतः क्रमेण रगणो लघुर्गुरुश्च पतितोऽस्ति। पुनरयुक्पादे द्वितीयातृतीययोश्चतुर्थीपञ्चम्योश्च मात्रयोरेकस्मिन् गुरुवर्णेऽवस्थितिर्नास्ति। युक्पादे षष्ठीसप्तम्योश्च मात्रयोर्नैकत्रावस्थितिर्वर्त्तते। अत एव वैतालीयनाम छन्दो बोध्यम्।

२ प्रचरद्भिरिति ख, चिह्नितपुस्तकपाठः, पुस्तकान्तरपाठश्च। प्रसरद्भिरिति ग, चिह्नितपुस्तकपाठः।

३ दुष्कृतं भर इति ख, ग, चिह्नितपुस्तकपाठः, पुस्तकान्तरपाठश्च।

४ पङ्कराञ्जितमिति ख, चिह्नितपुस्तकपाठः, पुस्तकान्तरपाठश्च। पङ्कचर्चितमिति ग, चिह्नितपुस्तकपाठः।

वपुरन्तरवह्निदीपितं (१) वैतालीयमिदं विलोक्यताम् (२)॥

वैतालीयमिति वैतालशब्दात् कृशाश्वादेराकृतिगणत्वाच्छण्-प्रत्ययश्चातुरर्थिकः । अत्र पादग्रहणमिदं ज्ञापयति, यदार्य्यादीनां (३) पादचतुर्भाग इति व्यवस्था नास्ति ॥

(१०) औपच्छन्दसकम् ॥ ३३ ॥

अस्मिन् वैतालीये (४) छन्दस्यन्ते रकारयेद् अधिको भवति, तदौपच्छन्दसकं (५) नाम च्छन्दः । तस्योदाहरणम् ।

रगण ल० गु० गु०
१।२ ३ ४ ५ ६ ७।८ ९ १०।११ १२ १३ १४ १५।१६ १।२ ३।४ ५।६
वा क्यै र्म धु रैः प्र ता र्य्य पू र्वं यः प श्चा-

रगण ल० गु० गु०
७ ८ ९।१० ११ १२।१३ १४ १५।१६ १७।१८
द भि स न्द धा ति मि त्रम् ।

---

१ वपुरातपवह्निदीपितमिति ख, ग, चिह्नितपुस्तकपाठः, पुस्तकान्तरपाठश्च ।

२ अत्र तन्मीत्यादुदाहरणद्वयमपि वैतालीयलक्षणाक्रान्तमेव । केवलमत्र पादमुखस्थितमात्राविन्यासभेदो वर्त्तते ।

३ आर्य्यायामिति ख, चिह्नितपुस्तकपाठः, पुस्तकान्तरपाठश्च ।

४ तस्मिन्नेव वैतालीये इति ख, ग चिह्नितपुस्तकपाठः, पुस्तकान्तरपाठश्च ।

५ औपच्छन्दसिकमिति सर्व्वत्र ग, चिह्नितपुस्तके पाठः ।

रगण लघु० गु० गु०

१।२ ३।४ ५ ६ ७।८ ९ १०।११ १२ १३।१४ १५।१६ १।२ ३।४
तं दु ष्ट म ति वि शि ष्ट गो ष्ठ्यां मौ प

रगण लघु० गु० गु०

५।६ ७ ८ ९।१० ११ १२।१३ १४ १५।१६ १७।१८
च्छ न्द स कं व द न्ति वा ह्यम् (१)॥

अपिच।

परमर्मनिरीक्षणानुरक्तं स्वयमत्यन्तनिगूढचित्तवृत्तिम्।
अनवस्थितमर्थलुब्धमारादौपच्छन्दसकं जहीहि मित्रम्(२)॥

उपच्छन्दः शब्दादर्हणादिपाठाचातुरर्थिको वुञ्प्रत्ययः॥

(१११) आपातलिका भ्गौ ग्॥ ३४॥

रेफलकारगकाराणामपवादः। द्विःस्वरा अयुक्पादे, युग्वसवोऽन्ते, इत्यनुवर्त्तते। पूर्वलक्षणयोरन्ते भकारो गकारद्वयञ्च (३) भवतः, तद्वैतालीयमापातलिकानाम लभते। तस्योदाहरणम्।

---

१ अस्य प्रथमतृतीययोः पादयोः षोडशमात्राः, द्वितीयचतुर्थयोरष्टादशमात्राः सन्ति। पुनरयुक्पादे द्वितीयातृतीययोश्चतुर्थीपञ्चम्योः, युक्पादे षष्ठीसप्तम्योश्च मात्रयोरेकस्मिन् गुर्वक्षरे अवस्थितिर्नास्ति, पुनः षष्ठाष्टमीमात्राभ्यां परतः क्रमेण षट्स्वक्षरेषु रगणो लघुर्गुरुर्गुरुश्च पतितोऽस्ति, अत इदं वैतालीयपूर्वकमौपच्छन्दसकं नाम छन्दो बोध्यम्।

२ अत्र पादयुक्तानां षडष्टमात्राणां पूर्वोदाहरणतो विन्यासप्रभेदादिदमपरं मकारकमौपच्छन्दसकोदाहरणं ज्ञातव्यम्।

३ भकारो रकारो चेति ख, ग, चिह्नितपुस्तकपाठः; पुस्तकान्तरपाठश्च।

भगण गु० गु०

१।२ ३ ४ ५।६ ७।८ ९ १० ११।१२ १३।१४ १५ १६।१७ १८

पि ङ्ग ल के शो क पि ला क्षो वा चा टा

भगण गु० गु०

७, ८ ९ १० ११ १२ १३।१४ १५।१६

वि क टो न्न त द न्ती।

भगण गु० गु०

१।२ ३।४ ५ ६ ७।८ ९ १० ११।१२ १३।१४ १ २ ३

आ पा त लि का पु न रे पा नू प ति

भगण गु० गु०

४ ५।६ ७ ८ ९।१० ११ १२ १३।१४ १५।१६

कु ले ऽपि न भा ग्य मु पै ति (१) ॥

आपातलिका अस्थिरा इत्यर्थः ॥

(१११) शेषे परेण युङ् न साकम् ॥ ३५ ॥

अत्र वैतालीयाधिकारे येषां लकाराणां नियम उक्तस्तद्व्यतिरिक्तो यो लकारवर्गः, सः 'शेषः,' तस्मिन् नियमः क्रियते, 'युग्' लकारः 'परेण साकं न', मिश्रीकार्य्यः, द्वितीयस्तृतीयेन,

१ अस्य प्रथमतृतीययोः पादयोश्चतुर्दशमात्रा, द्वितीयचतुर्थयोः, षोडशमात्रा सन्ति, पुनरप्येकपादे द्वितीयातृतीययोश्चतुर्थीपञ्चम्योः, षष्ठपादे सप्तमीअष्टम्योश्च मात्रयोरेकस्मिन् गुर्व्वक्षरे स्थितिर्नास्ति पुनः षष्ठाष्टममात्राभ्यां परतः क्रमेण भगणमक्षरद्वयं गुरुद्वयं च पतितोऽस्ति, अत इदं वैतालीयप्रभेदमापातलिकानामकं छन्दो ज्ञेयम्।

चतुर्थः पञ्चमेन, युक्पादे षष्ठश्च सप्तमेन। एवं वदता शेषाणां मिश्रीभावोऽभ्यनुज्ञातः। तत्रोदाहरणं पूर्वमेव(१)॥

(१११) षट् चामिश्रा युजि॥३६॥

अथ द्वितीयचतुर्थयोः पादयोः षड् लकारा अमिश्रा न कर्त्तव्याः, पृथक् पृथक् न प्रयोक्तव्या इत्यर्थः। प्रथमतृतीययोश्च पादयोः स्वरुचिः। तत्रोदाहरणं वैतालीये तावत्।

समरशिरसि सञ्चरते द्विषां नवनिशितायुधदृष्टिरयतः।
कुवलयदलदीर्घचक्षुषां प्रमदानां न कटाक्षवीक्षितम्॥

औपच्छन्दसकोदाहरणम्।

परयुवतिषु पुत्रभावमादौ कृत्वा प्रार्थयते(२) पुनः पतित्वम्।
इदमपरमिहोच्यते विशेषादौपच्छन्दसकं खलस्य वृत्तम्॥

आपातलिकोदाहरणम्।

अभिरमयति किन्नरकण्ठी हंसगतिः श्रवणायतनेत्रा। विशदकमलकोमलगात्री(३) युवतिरियं हृदयं तरुणानाम्(४)॥

---

१ यथोदाहरणं पूर्वोक्तमिति ख, चिह्नितपुस्तकपाठः, पुस्तकान्तरपाठश्च।

२ प्रार्थयते इति ख चिह्नितपुस्तकपाठः, पुस्तकान्तरपाठश्च।

३ विमलकमलदलकोमलगात्रीति पुस्तकान्तरपाठः।

४ समरशिरसि, परयुवतिषु इदमपरमित्युदाहरणत्रय वैतालीयादिलक्षणमात्रामभेद। केवलमयुक्पादस्यषवत्तिन्य षट्कला पृथक् पृथक् पृथुन्ना सन्ति, युक्पादे तु तथाभोक्तिमात्रं न प्रवर्तीव विशेष।

(११४) पञ्चमेन पूर्वः साकं प्राच्यवृत्तिः ॥ ३७ ॥

इदानीं विशेषलक्षणमाह। शेषे परेण युङ् न साक-मित्यनेन(१) पञ्चमचतुर्थयोरेकीभावो निषिद्धः। सोऽनेन विधीयते। युजीत्यनुवर्त्तते। यदा युक्पादे 'पञ्चमेन' लकारेण, 'पूर्व्वः', सङ्गच्छते, तदा प्राच्यवृत्तिर्नाम वैतालीयं भवति। शेषं यथाप्राप्तम्। तत्रोदाहरणम्।

रगण ल० गु०
१ २ ३।४ ५ ६ ७।८ ९ १०।११ १२ १३।१४ १।२ ३
वि पु ला र्थ सु वा च का द राः क स्य

रगण ल० गु०
४।५ ६ ७ ८ ९।१० ११ १२।१३ १४ १५।१६
ना म न ह र न्ति मा न सम्।

रगण ल० गु०
१ २ ३।४ ५ ६ ७।८ ९ १०।११ १२ १३।१४ १।२ ३ ४।५
र स भा व वि शे ष पे श लाः प्रा च्य वृ-

रगण ल० गु०
६ ७ ८ ९।१० ११ १२।१३ १४ १५।१६
त्ति क वि का व्य सं स्य दः(२) ॥

---

१ साकमित्यमेति ख. ग. लिखितपुस्तकपाठः. पुस्तकान्तरपाठश्च।

२ अत्र युक्पादे चतुर्थपञ्चममात्रयोरेकतापत्तिरस्ति, अन्यासामेव वैतालीयलक्षणतोऽत्र विशेषः।

(१५) अयुक् तृतीयेनोदीच्यवृत्तिः ॥ ३८ ॥

पूर्व्वैः साकमित्यनुवर्त्तते। 'अयुक्पादे' 'तृतीयेन' लकारेण, यदि पूर्व्वैः सङ्गच्छते, तदा उदीच्यवृत्तिर्नाम वैतालीयं। शेषं यथाप्राप्तमेव। तत्रोदाहरणम्।

रगण॰ ल॰ गु॰
१ २।३ ४ ५ ६ ७।८ ९ १०।११ १२ १३।१४ १ २
अ वा च क म नू र्जि ता क्ष रं श्रु ति-

रगण ल॰ गु॰
३।४ ५।६ ७ ८ ९।१० ११ १२।१३ १४ १५।१६
दु ष्टं श्रु ति क ष्ट म क्र मम् (१)।

रगण ल॰ गु॰
१ २।३ ४ ५ ६ ७।८ ९ १०।११ १२ १३।१४ १ २
प्र सा द र हि त ञ्च ने ष्य ते क वि-

रगण ल॰ गु॰
३।४ ५।६ ७ ८ ९।१० ११ १२।१३ १४ १५।१६
भिः का व्य मु दी च्य वृ त्ति भिः (२) ॥

१ यतिकष्टमक्रममिति ख, ग, चिह्नितपुस्तकपाठः, पुस्तकान्तरपाठश्च।

२ अत्र वैतालीयलक्षणं यथावन्न घटते। पुनरयुक्पादे द्वितीयतृतीयमात्रयोरेकस्मिन् गुर्वक्षरे स्थितिर्भाति। अत्र इदमुदीच्यवृत्तिर्नाम वैतालीयं छन्दो

(११) आभ्यां युगपत् प्रवृत्तकम् ॥ ३८ ॥

'आभ्यां' पूर्वोक्तलक्षणाभ्यां, युगपत्प्रयुक्ताभ्यां, प्रवृत्तकं नाम वैतानीयम् । एकस्मिन् पदे पूर्वः प्रयुज्यते(१), अपरस्मिन् पदे यतोऽपि द्वितीयः स्वरः । अस्योदाहरणम् (२) ।

इ दं भ र त य श भू भू तां(३) ऋ य ता

यु नि म नो र मा य नम् ।

प वि त्रं म धि कं गु ओ ट यं त्या म-

य ऋ क थि तं प्र वृ त्त कम्(४)॥

(१२७) अयुक् चारुहासिनी ॥ ४० ॥

यस्य सर्वे पादाः 'अयुग्'लक्षणयुक्ता, तद् वैतालीयं, चारुहासिनी नाम। किं तल्लक्षणं, चतुर्दशमात्रत्वं, तृतीयेन पूर्वस्य योगः। तत्रोदाहरणम्।

रगण ल० गु०
१ २।३ ४ ५ ६ ७।८ ९ १०।११ १२ १३।१४ १ २।३
म नाक् प्र स त द न्त दी धि तिः स्म रो-

रगण ल० गु०
४ ५ ६ ७।८ ९ १०।११ १२ १३।१४
स्म सि त ग ण्ड म ण्ड ला।

रगण ल० गु०
१ २।३ ४ ५ ६ ७।८ ९ १०।११ १२ १३।१४ १
क टा क्ष ल लि ता तु का मि नी (१) म

रगण ल० गु०
२।३ ४ ५ ६ ७।८ ९ १०।११ १२ १३।१४
नो ह र ति चा रु हा सि नी (२)॥

---

१ कटाक्षललिता च कामिनामिति पुस्तकान्तरपाठः। कटाक्षललिता च कामिनीति च, चिह्नितपुस्तकपाठः। कटाक्षललितेन कामिनीति ग, चिह्नितपुस्तकपाठः।

२ अथ षोडशमात्राविशिष्टवैतालीयलक्षणं वर्णने, पुनः पादचतुष्टये द्वितीयतृतीयमात्रयोरेकत्र गुर्वक्षरे स्थितिरस्ति। अत इदं वैतालीयपूर्वकं चारुहासिनी नामकं छन्दो बोध्यम्।

(१९८) युगपरान्तिका ॥ ४१ ॥

युग्मलक्षणयुक्ते चतुर्भि: पादैः 'अपरान्तिका', नाम वैतालीयम्। किन्त्वत्र लक्षणं, षोड़शमात्रत्वं पञ्चमेन पूर्वस्य योग: (१), षष्ठां मिश्रायां प्रयोगश्च। तत्रोदाहरणम्।

रगण ल० गु०
१ २ ३ ४।५ ६ ७ ८ ९।१० ११ १२।१३ १४ १५।१६
स्थि र वि ला स न त मौ क्ति का व ली(२)

रगण ल० गु०
१ २ ३ ४।५ ६ ७।८ ९।१० ११ १२।१३ १४ १५।१६
क म ल को म ला ङ्गी मृ गे क्ष णा।

रगण ल० गु०
१ २ ३ ४।५ ६ ७ ८ ९।१० ११ १२।१३ १४ १५।१६
ह र ति क स्य हृ द यं न का मि नः

रगण ल० गु०
१ २ ३ ४।५ ६ ७ ८ ९।१० ११ १२।१३ १४ १५।१६
सु र त के लि कु श ला प रा न्ति का (३) ॥

इति वैतालीयाधिकारः ॥

---

१ पूर्वयोग इति च, चिह्नितपुस्तकपाठ, पुस्तकान्तरपाठश्च।

२ स्थिरविलासनयनोक्षिपेत्खलति च, चिह्नितपुस्तकपाठ, पुस्तकान्तरपाठश्च। स्मितविलासभरमोक्षिपेत्खलति च, चिह्नितपुस्तकपाठ।

३ अत्र चतुर्दशमात्रात्मक वैतालीयलक्षणं प्रवर्त्तते। पुन सर्वत्र चतुर्थपञ्चमयोरेकगुर्वक्षरेणस्थानमस्ति, अत इद वैतालीयपूर्वकमपरान्तिकानामक छन्दो बोध्यम्।

(अथ मात्रासमकाधिकारः)

(११९) गन्ता द्विर्वसवो मात्रासमकं नरमः ॥४२॥

वैतालीयमित्यादिसूत्रात् (१) समस्यन्तं पादग्रहणमनुवर्त्तते। ल इति सहाधिकारः(२)। तेनायमर्थः, यत्र पादे 'गन्ताः', सन्तः षोड़शलकारा भवन्ति, तन्मात्रासमकं नाम च्छन्दः (३)। अन्ते द्वाभ्यामेको गुरुः कर्त्तव्यः। नवमश्च लकार एव। 'द्विर्वसवः' इति द्विगुणिता वसवः, लकाराः षोड़श इत्यर्थः। शेषे परेण युङ् न साकमित्यनुवर्त्तनीयम्। तत्रोदाहरणम्।

१।२ ३।४ ५ ६ ७।८ ९ १०।११ १२ १३।१४ १५।१६ १।२ ३।४
अ य म श्रु मु खो वि र लै र्द न्तै र्ग म्भी-

५।६ ७।८ ९ १० ११।१२ १३ १४ १५।१६
रा चो मि त ना सा ग्रः (४)।

---

१ वैतालीयमितिसूत्रादिति ख।

२ ल इति च सहाधिकार इति क।

३ यस्य चतुर्षु पादेषु षोडशमात्रा भवन्ति, पुनः प्रतिपादान्ते एको द्विकलो गुरुस्तिष्ठति, न लेकको मध्ये त्वनिर्दिष्टो गुरुः। द्वितीयतृतीययोश्चतुर्थी-पञ्चम्योर्मात्रयोरेकस्मादमत्वम्, एकपादे पञ्चमषष्ठ्योर्मात्रयोश्च नैकयार्थमिति। सर्वत्र नवमी लघुरूपा मात्रा भवति, तन्मात्रासमकं छन्दः। अथ मात्रासमकाधिकारे लक्षणमेतत् सामान्यतः सर्वत्र बोध्यम्। अथ पञ्चमषष्ठ्यादिलघुगुरुमात्राप्रभेदेन मात्रासमकप्रभेदाः, सोऽस्त्वथ वक्ष्यति। तत्प्रभेदज्ञापनाय मात्रासमकाद्युदा-हरणोपरिविन्यस्तमात्राङ्कानत्र द्रष्टव्या। अङ्कदर्शनेन च लघुगुरुमात्रा स्पष्टं ज्ञेया।

पाठ इति ग, चिह्नितपुस्तकपाठ, पुस्तकान्तरपाठश्च

लु॰ गु॰

१।२ ३।४ ५ ६ ७।८ ९ १० ११।१२ १३।१४ १५।१६ १७ १८

नि र्म्मां स द नुः स्फु टि नैः के शै र्मां ग-

लु॰ गु॰

५ ६ ७।८ ९ १० ११।१२ १३।१४ १५।१६

स म कं ल भ ते दुः खम्॥

गल इत्यनेनैवान्तस्य गुरुत्वे सिद्धे पुनर्गन्त[illegible] ऐच्छिकगुरुत्वनिवृत्त्यर्थम्। तेनात्र द्वौ [illegible] विको गुरुः क्रियत इति वाक्यशेषः॥

(४०) द्वादशस्य वानवासिका। ४३।

ल॰ ल॰ गु॰

१ २ ३।४ ४।६ ७।८ ९ १० ११ १२ १३।१४ १४।१६ १।२ ३ ४
य न था स स्तो स्व नि त वि शे षः क स्य न

ल॰ ल॰ गु॰

४।६ ७।८ ९ १० ११ १२ १३।१४ १४।१६
चि त्त र म य ति पुं सः ॥

(१३१) विश्लोकः पञ्चमाष्टमौ ॥ ४४ ॥

द्वादशग्रहणं नवमग्रहणाच्च निवृत्तम्। यत्र चतुष्पादेषु(१) पञ्चमाष्टमौ लकारौ निहतः, शेषं यथाप्राप्तं, तन्मात्रासमकं विश्लोको नाम। तत्रोदाहरणम्।

ल॰ ल॰ गु॰

१।२ ३।४ ५ ६ ७ ८ ९।१० ११।१२ १३।१४ १४।१६ १।२ ३
भ्रा त गुं ण र चि तं वि श्लो कं दु र्ण

ल॰ ल॰ गु॰

४ ५ ६ ७ ८ ९।१० ११ १२ १३।१४ १४।१६
य क र ण क द र्थि त लो कम्।

ल॰ ल॰ गु॰

१।२ ३।४ ५ ६ ७ ८ ९।१० ११ १२ १३।१४ १४।१६
जा नं म चि त स्तु ले(२) ऽप्य वि नी तं

१ यत्र पादेषु इति ख। यत्र चतुर्षु पादेष्विति ग।

२ मनसि कुर्वित्यर्थः । तमितोऽमिषि ख, दव।

ल॰ ल॰ गु॰

१।२ ३।४ ५ ६ ७ ८ ९।१० ११ १२ १३।१४ १५।१६
मि त्रं प रि ह र सा धु वि गी तम्॥

(१४१) चित्रा नवमश्च॥४५॥

यस्य 'नवमः' लकार एवावतिष्ठते, 'च'कारात् पञ्चमाष्टमौ च, तन्मात्रासमकं चित्रा नाम। तत्रोदाहरणम्।

ल॰ ल॰ ल॰ गु॰

१ २ ३।४ ५ ६ ७ ८ ९ १० ११।१२ १३।१४ १५।१६
य दि वा च्छ सि प र प द मा रो ढुं

ल॰ ल॰ ल॰ गु॰

१।२ ३।४ ५ ६ ७ ८ ९ १० ११ १२ १३।१४ १५।१६
मै त्रीं प रि ह र स ह व नि ता भिः (१)।

ल॰ ल॰ ल॰ गु॰

१।२ ३ ४ ५ ६ ७ ८ ९ १० ११।१२ १३।१४ १५।१६ १।२
मु ह्य ति मु नि र पि वि प या स ङ्गा चि-

ल॰ ल॰ ल॰ गु॰

३।४ ५ ६ ७ ८ ९ १० ११।१२ १३।१४ १५।१६
त्ता भ व ति ह्वि म न.सो वृ त्तिः॥

नवम इत्यनुवर्त्तमानेऽपि (२) पुनर्नवमग्रहणमुपचित्राप्रतिप्रसवार्थम्॥

---

१ सह नारीभिरिति ख, ग, पुस्तकान्तरेषु।

२ नवम इत्यनुवर्त्तमाने इति ख।

(१९१) परयुक्तेनोपचित्रा ॥ ४६ ॥

'परयुक्तेन' दशमेन सहैकीभूतेन नवमेन, उपचित्रा नाम भवति। पूर्वं लघुनियमेन लक्षणं प्रोक्तं। इदन्तु गुरुनियमेनोच्यते (१)। तत्रोदाहरणम्।

गु०
१।२ ३।४ ५।६ ७ ८ ९।१० ११ १२ १३।१४ १५।१६ १।२
य च्चि त्तं गु रु स क्त मु दा रं (२) वि-

गु०
३।४ ५।६ ७ ८ ९।१० ११ १२ १३।१४ १५।१६
द्या भ्या स म हा व्य स नं च्च।

गु०
१।२ ३।४ ५।६ ७ ८ ९।१० ११ १२ १३।१४ १५।१६ १।२ ३
पृ थ्वी त स्य गु णौ रु प चि त्रा च न्द्र

गु०
४ ५।६ ७ ८ ९।१० ११ १२ १३।१४ १५।१६
म री चि नि भि र्भ व ती यम् ॥

(१९२) एभिः पादाकुलकम् ॥४७॥

एषां पद्यानां मध्ये यैः कैश्चिदपि चतुर्भिः पादैः, पादा-

---

१ गुरुनियमेनेति ग०।

२ गुरुसक्तमुदारमिति ग।

कुलकं (१) नाम। मात्रासमक(२)विश्लोकवानवासिकोपचित्राणां पादैरुदाहरणम्।

ल० गु०

१ २ ३।४ ५।६ ७ ८ ९ १० ११ १२ १३।१४ १५।१६ १।२
अ लि वा चा लि त वि क सि त चू ते का

ल० ल० गु०

३।४ ५ ६ ७ ८ ९।१० ११ १२ १३।१४ १५।१६
ले म द न स मा ग म दू ते।

ल० ल० गु०

१।२ ३।४ ५।६ ७।८ ९ १० ११ १२ १३।१४ १५।१६ १।२ ३ ४ ५
स्मृ त्वा का न्तां प रि हृ त सा र्थः पा दा कु-

गु०

६ ७।८ ९।१० ११ १२ १३।१४ १५।१६
ल कं धा व ति पा न्थः(३) ॥

तथा विश्लोकोपचित्रामात्रासमकोपचित्राणां पादैः, पादाकुलकम्।

तत्रोदाहरणम्।

---

१ पादैर्मात्रासमक पादाकुलकमिति ग।

२ अथ मात्रासमकेति ख, पुस्तकान्तरे। तत्र मात्रासमकेति ग।

३ अस्य चतुर्षु पादेषु षोडशमात्रा सन्ते सुखदालि, पुनरेषां प्रथम पादो नवममात्राया लघुत्वात् मात्रासमकलक्षणाक्रान्तो भवति, द्वितीय, पञ्चमाष्टममात्रयोर्लघुत्वाद्विश्लोकलक्षणवान् पाद, तृतीय, नवमद्वादशमात्रयोर्लघुत्वाद्वानवासिकालक्षणयुक्त पाद। चतुर्थ, नवमदशममात्रयोरेकत्र गुरुवर्णविस्थिततयोपचित्रालक्षणसमन्वित पादो भवति। एताद्दशविभिन्नलक्षणाक्रान्तैश्चतुर्भि पादैरुपमोभित छन्द पादाकुलकनामक भवति।

ल० ल० गु०

१।२ ३।४ ५ ६ ७ ८ ९।१० ११ १२ १३।१४ १५।१६ १।२ ३ ४
पुं स्को कि ल कृ त शो भ न गी ते(१)ऽपि च

गु०

५ ६ ७।८ ९।१० ११ १२ १३।१४ १५।१६
प व न प्रे रि त शी ते।

ल० गु०

१ २ ३ ४।५।६ ७।८ ९ १० ११।१२ १३।१४ १५।१६ १।२ ३।४
म धु स म ये ऽस्मिन् ह त वि शो कः पा दा-

गु०

५ ६ ७।८ ९।१० ११ १२ १३।१४ १५।१६
कु ल कं नृ त्य ति लो कः(२)॥

मात्रासमकस्यैकेन पादेन, द्वाभ्यामुपचित्रायाः, विश्लोकस्यैकेन, पादाकुलकम्। तत्रोदाहरणम्।

ल० गु०

१।२ ३।४ ५।६ ७।८ ९ १० ११।१२ १३।१४ १५।१६ १।२ ३।४ ५ ६ ७।८
चि त्तं भ्रा म्य त्य न व स्था नं पा दा कु ल क-

---

१ कृतपदसमगीते इति ग।

२ अस्य चत्वारः पादाः पूर्ववत् षोडशमात्रात्मका सन्ति पुनः अत्र प्रथमः पादो विश्लोकलक्षणम्, द्वितीय, उपचित्रालक्षणयुक्त, तृतीय, मात्रासमकलक्षणसम्पन्न, चतुर्थ, पुनरपि विश्लोकलक्षणम् पादोऽस्ति। एतादृशविभिन्नलक्षणैः पादैरुक्तमिदमपि पद्यम् पादाकुलकनामकं भवति। तथान्येनाप्यनेन प्रकारेणापि ज्ञातव्यम्।

गु॰

८।९० ११ १२ १३।१४ १५।१६
श्लो क स मा नम्।

गु॰

१।२ ३।४ ५।६ ७ ८ ९।१० ११ १२ १३।१४ १५।१६ १ २
का यः का य ति शा य ति(१)श क्ति स्त द्-

ल॰ ल॰ गु॰

३ ४ ५ ६ ७ ८ ९।१० ११।१२ १३ १४ १५।१६
पि न म म प र लो के भ क्तिः(२)॥

यथा पादाकुलकनाम्नः श्लोकस्य पादेष्वस्थिरता तथेत्यर्थः।

उपचित्रापादेनैकेन, वानवासिकापादेन, पुनरुपचित्रापादाभ्यां, पादाकुलकं। तत्रोदाहरणम्।

गु॰

१ २ ३ ४ ५।६ ७ ८ ९।१० ११ १२ १३।१४ १५।१६ १ २
प रि हृ त स र्व्व प रि ग्र ह लो कः प्र ति-

ल॰ ल॰ गु॰

३ ४ ५।६ ७ ८ ९ १० ११ १२ १३।१४ १५।१६
दि न व र्द्धि त गु रु त र शो कः।

---

१ प्रीयतीति पुस्तकान्तरे पाठः।

२ अस्य चत्वारः पादा गुर्वन्ता षोडशमात्रात्मका सन्ति। तत्र प्रथमः, नवमलघुमान् मात्रासमकपादः, द्वितीयतृतीयौ, नवमदशममात्रयोरेकत्वावस्थितियुक्तौ उपचित्रापादौ, चतुर्थः, पञ्चमाष्टमलघुमात्रावान् विश्लोकपादोऽस्ति। एतादृशविलक्षणपादैः विमिश्रमपि छन्दः पादाकुलकनामकं भवति।

मु०

१।२ ३ ४ ५ ६ ७।८ ९।१० ११ १२ १३।१४ १५।१६ १।२ ३।४
दुः ख वि व र्ज्जि त लो च न वा रिः(१) पा दा-

मु०

५ ६।७ ८ ९।१० ११ १२ १३।१४ १५।१६
कु ल कं या ति त वा रिः (२) ॥

इति मात्रासमकाधिकारः ॥

---

(१४४) गीत्यार्या लः ॥ ४८ ॥

यत्र पादे द्विर्वसवः, षोडशलकाराः, भवन्ति, सा गीत्यार्या नाम जातिः। ल इत्यनुवर्त्तमाने पुनर्लग्रहणं द्विमात्रिकनिवृत्त्यर्थम् ॥ तत्रोदाहरणम् ॥

१ २ ३ ४ ५ ६ ७ ८ ९ १० ११ १२ १३ १४ १५ १६
भ्र म द लि क ल र व मु ख रि णि
म द क ल ख ग कु ल क ल र व मु ख रि णि

१ २ ३ ४ ५ ६ ७ ८ ९ १० ११ १२ १३ १४ १५ १६
वि क सि त स र सि ज प रि म ल सु र भि णि।

१ दुःखविवर्जितलोचनवारिरिति पुस्तकान्तरे पाठः।

२ यातु मधारिरिति च, पुस्तकान्तरे। अस्य चत्वारः पादा गुर्वन्ता षोडशमात्रका भवन्ति। तत्र प्रथमतृतीयचतुर्थाः, नवमदशममात्रयोरैक्यमात्रविश्लेषितयत्र उपचित्रापादाः, द्वितीयः, नवमादारभ्यलघुमात्राविशिष्टो वानवासिकापादो वर्तते। एतादृग्विभिन्नलक्षणस्य द्वैपद्योभिन्नमपि छन्द पादाकुलकमेवकं भवति।

१ २ ३ ४ ५ ६ ७ ८ ९ १० ११ १२ १३ १४ १५ १६
गि रि व र प रि स र स र सि म ह ति ख लु (१)

१ २ ३ ४ ५ ६ ७ ८ ९ १० ११ १२ १३ १४ १५ १६
र ति र ति श य मि ह म म ह दि वि ल स ति॥

सर्व्वलघुच्छन्दसि (२) गीत्यार्य्यामन्दस्य प्रवेशयितुमशक्यत्वात्तन्नाम नोक्तम्॥

(१४६) शिखा विपर्य्यस्तार्द्धा ॥ ४९ ॥

सैव गीत्यार्य्या 'विपर्य्यस्तार्द्धा', यदा भवति तदा शिखाख्यां लभते। अयमर्थः। यत्रार्द्धं सर्व्वलघु भवति, अर्द्धञ्च सर्व्वगुर्व्विति। एवं तस्या एव विन्यासभेदेन सञ्ज्ञाद्वयमाह।

(१४७) लः पूर्व्वश्चेज्ज्योतिः ॥ ५० ॥

'पूर्व्वश्चेत्' अर्द्धभागः, सर्व्वलघुर्द्वात्रिंशल्लकारो भवति, उत्तरश्च सर्व्वगुरुः, षोडशगकारः, तदा ज्योतिर्नाम शिखा भवति। तत्रोदाहरणम्।

१ २ ३ ४ ५ ६ ७ ८ ९ १० ११ १२ १३ १४ १५ १६
य दि सु ख म नु प म म प र म भि ल प सि

१७ १८ १९ २० २१ २२ २३ २४ २५ २६ २७ २८ २९ ३० ३१ ३२
प रि ह र यु व ति पु र ति म ति श य मि ह।

---

१ भवति मतीति ख, पुस्तकान्तरञ्च।

२ सर्व्वलघुनि च्छन्दसीति ख, ग, पुस्तकान्तरञ्च।

१ २ ३ ४ ५ ६ ७ ८
आ त्म ज्यो ति र्यो गा भ्या सात्
९ १० ११ १२ १३ १४ १५ १६
हृ ष्ट्वा दुः ख च्छे दं कु र्याः (१५)॥

(१४८) गस्त्वेत् सौम्या ॥ ४१ ॥

तस्या एव शिखायाः पूर्व्वार्द्धभागः (१) सर्व्वगुरु षोड़शगकारश्चेद् भवति, उत्तरश्च द्वात्रिंशल्लकार एव, तदा सौम्या नाम शिखा भवति। तस्योदाहरणम्।

१ २ ३ ४ ५ ६ ७ ८
सौ म्यां दृ ष्टिं दे हि त्वे हाद्
९ १० ११ १२ १३ १४ १५ १६
दे हे सा कं मा न मु क्ता।
१ २ ३ ४ ५ ६ ७ ८ ९ १० ११ १२ १३ १४ १५ १६
श्र श्र ध र मु खि मु ख मु प न य(२)म म द दि
१७ १८ १९ २० २१ २२ २३ २४ २५ २६ २७ २८ २९ ३० ३१ ३२
म न सि ज रु ज म प ह र ल घु त र मि ह॥

(१४९) चूलिकैकोनत्रिंशदेकत्रिंशदन्ते ग्.(३) ॥ ४२ ॥

अर्द्धग्रहणमनुवर्त्तते। यत्र प्रथमेऽर्द्धे 'एकोनत्रिंशल्लकारा भवन्ति, द्वितीये चार्द्धे' 'एकत्रिंशत्,' तयोश्च 'अन्ते', द्वौ लकारावुन्मूल्य

१ पूर्व्वार्द्धभाग इति च।

२ सुपमुपमवेति च, ग. पुस्तकान्तरे।

प्रत्येकमेको गुरुः क्रियते, तच्चूलिका नाम च्छन्दः। अन्ते गिति विशेषोपादानसामर्थ्यादन्येषां लघुत्वमुक्तं भवति। तेनाद्ये सप्तविंशतिर्लघवोऽन्ते (¹) गुरुरेको भवति। द्वितीयेऽप्येकोनत्रिंशल्लघवोऽन्ते गुरुश्चैकः (²)॥ तत्रोदाहरणम्।

१ २ ३ ४ ५ ६ ७ ८ ९ १० ११ १२ १३ १४
र ति क र म ल य म रु ति ग्रु भ ग्र ग्र

गु॰१
१५ १६ १७ १८ १९ २० २१ २२ २३ २४ २५ २६ २७ २८।२९
म भि च त(³)च्छि म म च सि म धु स म ये।

१ २ ३ ४ ५ ६ ७ ८ ९ १० ११ १२ १३ १४ १५ १६
प्र व स सि प थि क वि र च्छि त क य मि च तु

गु॰२
१७ १८ १९ २० २१ २२ २३ २४ २५ २६ २७ २८ २९ ३०।३१
प रि च त(⁴)यु व ति र ति च प ल त या (⁵)॥

अन्यैः पुनरन्यथैवेदं सूत्रमधीयते (⁶), चूलिकार्थैकोन त्रिंशदन्ते गिति। तेषामुभयोश्चाप्यर्धयोरेकोनत्रिंशन्मात्रा गुर्वन्ता भवन्ति। तत्रोदाहरणम्।

---

१ लघवोऽन्तेचेति ख ग, पुस्तकान्तरञ्च।

२ एकोनत्रिंशन्मात्रा गुर्वन्ता भवन्तीति ख, पुस्तकान्तरञ्च।

३ सुचिरप्रभृति च्छलेति ख, पुस्तकान्तरञ्च।

४ पथिक रतकरण कथमिदमपह्नुतेति ख,

५ युवतिरनिरपि मयतामिति ख, पुस्तकान्तरञ्च। युवतिरनिरनलमभिति ग।

६ अन्ये पुनरन्यथेदं सूत्रमभिदधतीति ख, पुस्तकान्तरञ्च।

१ २ ३ ४ ५ ६ ७ ८ ९ १० ११ १२ १३ १४
घ न प रि म ल मि ल द लि कु ल मु ख

गु०१
१५ १६ १७ १८ १९ २० २१ २२ २३ २४ २५ २६ २७ २८।२९
रि त नि खि ल क म ल म ल य प व ने(१)।

१ २ ३ ४ ५ ६ ७ ८ ९ १० ११ १२ १३
ज न य ति म न सि(२)ज शि मु खि मु द-

गु०१
१४ १५ १६ १७ १८ १९ २० २१ २२ २३ २४ २५ २६ २७ २८।२९
म ति श य मि द म म म धु र य म धु ना॥

अर्धग्रहणादत्र पादव्यवस्था नास्ति ॥

इदानीं गणमात्राच्छन्दसां गुरुलघुसङ्ख्यापरिज्ञापनार्थमिदमाह ।

(५०) गा येन न समा लां ग्ल इति ॥ ४३ ॥

'गा' गुरुसङ्ख्या, वेदितव्या, 'येन' यावद्भिरक्षरैः, 'लां' लघूनां मात्राणां, 'समाः' समसङ्ख्याः, 'ग्लः', 'न', स्युः, अपितु न्यूनसङ्ख्या एव । 'ग्लः', इत्यक्षराण्यभिधीयन्ते, तेषां गुरुलघुसद्भावात्(३)। अयमभिप्रायः, आर्यादिषु शास्त्रे यावत्यो मात्रा उपदिष्टास्तावन्त्यक्षराणि यथासङ्ख्यं न पूर्यन्ते, सा तत्र गुरु-

१ ममरमधुपमदवने इति ख, पुस्तकान्तरं च ।
२ रुचदर्शन इदानीं ग ।
३ गुरुलघुसद्भावादिति ख, पुस्तकान्तरं च ।

सङ्ख्या वेदितव्या, अवशिष्टा लघुसङ्ख्या। तत्रायमुपयोगः, कदाचित् पृच्छति, चत्वारिंशदक्षरायामार्य्यायां कति गुरवः सम्पद्यन्ते, कति वा लघव इति। तदा सप्तपञ्चाशन्मात्रोपदिष्टायामार्य्यायां मात्रासङ्ख्यायां चत्वारिंशदक्षरसङ्ख्यामपनीय(१) तत्र येऽवशिष्यन्ते, तान् गुरूनुपदिशेत्। ते च सप्तदशैव। शेषांस्तु त्रयोविंशतिलघूनुपदिशेत् (२)। तद्यथा,

१	२	३	४	५।६	७।८	९।१०	११।१२	१३	१४।१५	१६	१७	१८
।	।	।	।	ऽ	ऽ	ऽ	ऽ	।	ऽ	।	।	।
स्त	न	यु	ग	म	श्रु	स्ना	तं	स	मी	प	त	र-
१	२	३	४	५	६	७	८	९	१०	११	१२	१३

१९।२०	२१	२२	२३	२४	२५।२६	२७।२८	२९।३०
ऽ	।	।	।	।	ऽ	ऽ	ऽ
व	र्त्ति	ह्र	द	य	शो	का	ग्नेः।
१४	१५	१६	१७	१८	१९	२०	२१

३१	३२	३३	३४	३५।३६	३७।३८	३९।४०	४१।४२	४३	४४	४५	४६	४७
।	।	।	।	ऽ	ऽ	ऽ	ऽ	।	।	।	।	।
च	र	ति	वि	मु	क्ता	हा	रं	व्र	त	मि	व	भ-
२२	२३	२४	२५	२६	२७	२८	२९	३०	३१	३२	३३	३४

---

१ सङ्ख्यामपकर्षेदिति ख. पुस्तकान्तरे।

२ अस्याभिप्रायः स्पष्टमुच्यते, अस्यामार्यायां कति गुरवो लघवश्च सन्तीति पृष्टे प्रथमं तावत्तामार्यां लिखित्वा तस्याः सर्वासां मात्राणां गणनां कृत्वा तन्मात्रासङ्ख्यापिण्डं पत्रादौ क्वचित् संस्थापनीयम्, पुनस्तस्या एवाक्षराणि गणयित्वा तदक्षरसङ्ख्यापिण्डं मात्रासङ्ख्याया अधः स्थापनीयम्। ततो मात्रासङ्ख्यातोऽक्षरसङ्ख्यामपनयेत्। तत्र येऽङ्का अवशिष्यन्ते तावत्सङ्ख्याकास्तत्रार्यायां गुरवो भवन्ति। पुनरक्षरसङ्ख्यात एतदवशिष्टगुरुसङ्ख्यामपनयेत्। तत्र येऽङ्का अवशिष्यन्ते तावत्सङ्ख्याकास्तत्र लघवो भवन्ति, एतत्प्रक्रियया आर्यागीत्यादिविषममात्राछन्दसां गुरुलघुपरिज्ञानं जायते।

४८ ४९।५० ५१ ५२५३ ५४।५५ ५६।५७
| ऽ | ऽ ऽ ऽ
व तो रि पु स्त्री णाम् (१) ॥ कादम्बरी ।
६५ ६६ ६७ ६८ ६९ ७०

इति भट्टहलायुधकृतायां पिङ्गलच्छन्दोवृत्तौ
चतुर्थोऽध्यायः ॥ ४ ॥

(अथ पञ्चमोऽध्यायः ।)

(१५१) वृत्तम् ॥ १ ॥

अधिकारोऽयमाशास्त्रपरिसमाप्तेः । यदित ऊर्ध्वमनुक्रमिष्यामस्तद्वृत्तं वेदितव्यम् । तेन प्राक्तनं लौकिकं छन्दोजातं जातिरित्युच्यते । इत उत्तरस्य वृत्तम् । तथा चोक्तम् "पद्यं चतुष्पदं तच्च वृत्तं जातिरिति द्विधा ।" गायत्र्यादौ छन्दसि

---

१ [illegible] यत्र [illegible]-[illegible] विरामो [illegible], [illegible] इति [illegible] । [illegible] [illegible] इति निर्दिश्यते । [illegible] [illegible] [illegible] । [illegible] । यथा,
पार्श्वाङ्क १०, [illegible] । पार्श्वाङ्क ३०, [illegible] ।
पार्श्वाङ्क ३० [illegible] । पार्श्वाङ्क १७ [illegible] ।
पृष्ठ ६ १० [illegible] । पृष्ठ ६ १९, [illegible] ।

वर्त्तत इति 'वृत्तम्'। तत्र स्थिरगुरुलघुचरविन्यासमिष्यते(१)। पादेन सयोगात् पद्यं। यथा आर्य्यादिच्छन्दःस्वपि पाद-व्यवस्था नास्तीति पादौ संयुक्तौ, वृत्ते पुनः पृथक् भवत इत्यर्थः। संयोगाभावात् (२) तथाचोक्तम्। "एकदेशस्थिता जातिर्वृत्तं गुरुलघुस्थितम्" इति॥

(१२१) समर्द्धसमं विषमञ्च॥ २॥

समसर्व्वावयवत्वात् 'समं'। यस्य चत्वारः पादा एकलक्षण-युक्तास्तत् समं वृत्तम्(३)। शेषञ्च(४) स्वसंज्ञानुरूपमेव। तत्रार्द्धे समे(५) यस्य तत् 'अर्द्धसमं'। सर्व्वावयवेभ्योऽर्द्धाभ्याञ्च विगतं समं यस्य तत् 'विषमम्'। एवं त्रिप्रकारमपि वृत्तजातमुक्तम्॥

(१२२) समं तावत्कृत्वःकृतमर्द्धसमम्॥ ३॥

'समम्' इति समवृत्तसङ्ख्योच्यते। तयैव गुणितं(६)तावत्कृत्वः-कृतं', उच्यते। एतदुक्तं भवति, समवृत्तसङ्ख्यागुणिते समवृत्त-सङ्ख्यायाः पिण्डे या सङ्ख्या निष्पद्यते, तावत्सङ्ख्यमर्द्ध-समं वेदितव्यं। तत्र गायत्रे छन्दसि समवृत्तसङ्ख्या चतुः-

---

१ पादनियतमिति पाठान्तरम्, कयोर्मयोरभावात् यथेति म। पादयो नयोर्मी मयोर्विरोधापेति ख।

२ पादसयोगयोरभावादिति ख, मथ।

३ समवृत्तमिति पुस्तकान्तरम्।

४ शेषमिति ख।

५ तयार्द्धं समिति ख,।

६ तावद्दर्गुणितमिति गं।

पष्टिरष्टमध्यायसिद्धा। तस्यां चतुःषष्टिसङ्ख्यागुणितायामर्द्ध समवृत्तसङ्ख्या सम्पद्यते। चत्वारि सहस्राणि, षण्णवतिश्च वृत्तानि(१)। अङ्कतोऽपि ४,०९६ ॥

(१४) विषमञ्च ॥ ४ ॥

अर्द्धसमं तावत्कृत्वःकृतं 'विषमं' भवति। एतदुक्तं भवति, अर्द्धसमवृत्तसङ्ख्या अर्द्धसमवृत्तसङ्ख्ययैव गुणिता विषमवृत्त सङ्ख्या सम्पद्यते। एका कोटिः, सप्तषष्टिर्लक्षाणि, सप्तसप्ततिसहस्राणि, द्वे शते षोडशोत्तरे। अङ्कतोऽपि १,६७,७७,२१६। समसमार्द्धसमोपचितं, अर्द्धसमं विषमञ्च यथाक्रमं समोपचितं समार्द्धसमाभ्याञ्च उपचितं वेदितव्यम्(२) ॥

---

१ चतुर्विंशत्यक्षरात्मकस्य गायत्रीच्छन्दसश्चतुष्पादस्यैव एकस्यां पादाक्षराणि षडेव भवन्ति तेषां वर्णप्रस्तारनियमेन प्रस्तारे क्रियमाणे सर्वगुर्वादिसर्वलघ्वन्ताश्चतुःषष्टिरेव भेदा जायन्ते। तेषां मध्यात् क्रमव्युत्क्रमप्रकारेण कश्चिदपि भेदद्वयमादायार्द्धसमवृत्ते कर्त्तव्ये चतुःषष्टिसङ्ख्यायाश्चतुःषष्टिवारमावृत्तिः कृता भवति। एवं क्रियमाणे चतुःषष्टिसङ्ख्ययैवैषा गुणिता भवति। तथा सति कत्यर्द्धसमवृत्तानि जाता इति तत्सङ्ख्यापरिज्ञानार्थं तद्गुणनप्रकार एव प्रदर्श्यते। यथा,

६४ गुण्याङ्कौ

६४, गुणकाङ्कौ तत्र

२५६, चतुर्भिश्चतुःषष्ट्यां गुणितायां जाताङ्कः।

३८४ पुनः षड्भिस्तस्यां गुणितायां जाताङ्कः।

४०९६ सङ्कलनया जाताङ्कः।

२ पुनः चतुःसहस्रषण्णवतिसङ्ख्याकानामर्द्धसमवृत्तभेदानां मध्यादितरभिन्नसवर्णद्वयमुपचय भेदद्वयं वा पूर्वपूर्वकभेदत्यागक्रमेणादाय विषमवृत्ते क्रियमाणे तत्सङ्ख्यायास्तावद्वारमावृत्तिः कृता भवति, एवं क्रियमाणे तत्सङ्ख्ययैव मार्गिता भवति, तथा सति कति विषमवृत्तभेदा जायन्ते इति तत्सङ्ख्याबोधाय

BIBLIOTHECA INDICA:

A

COLLECTION OF ORIENTAL WORKS

PUBLISHED BY THE

ASIATIC SOCIETY OF BENGAL.

NEW SERIES, No. [illegible]



पिङ्गलच्छन्दःसूत्रम् ।

CHHANDAH SUTRA

OF

PINGALA ACHARYA

WITH THE

COMMENTARY OF HALAYUDHA

[illegible]

PANDITA VISVANATHA SASTRI.

FASCICULUS II.

CALCUTTA:

PRINTED AT THE [illegible]

(११५) राश्यूनम्॥ ५॥

तद्विषमं वृत्तम्(१) अर्द्धसमं वा 'राश्यूनं' कर्त्तव्यम्। मूलराशिः समुदायादपनेतव्य इति(२)। कोटिरेका, सप्तषष्टिर्लक्षाणि, त्रिसप्ततिसहस्राणि, विंशत्युत्तरं शतं, शुद्धविषमवृत्तस्य सङ्ख्या।

गुणनप्रकारोऽपि प्रदर्श्यते, यथा—

४०९६	गुण्याङ्का
४०९६	गुणकाङ्का।
२४५७६	षड्भिर्गुणिताङ्का
३६८६४	नवभिर्गुणिताङ्का
०	शून्येन गुणनाभावात् स्थाप्यते
१६३८४	चतुर्भिर्गुणिताङ्का।
१,६७,७७,२१६	सङ्कलनया जाताङ्का

१ तद्विषमवृत्तमिति ख०, पुस्तकान्तरपाठः।

२ अपनेतव्यमितीति पुस्तकान्तरम्। इदं गुणिताङ्कसमुदायात् मूलसमुदायोऽपनेतव्य इत्यर्थः। तत्प्रकारो यथा—

१,६७,७७,२१६	एतस्माद् गुणिताङ्कसमुदायात्
४०९६	एतद् गुण्याङ्कसमुदायेऽपगते
१,६७,७३,१२०	एतेऽङ्का अवशिष्यन्ते।

एते अर्द्धसमवृत्तसङ्ख्याविरहिता शुद्धविषमवृत्तसङ्ख्याज्ञापका भवन्ति।

पुनः ४०९६	एतस्माद् गुणिताङ्कसमुदायात्
६४	एतद् गुण्याङ्कसमुदायेऽपगते
४०३२	एतेऽङ्का अवशिष्यन्ते।

एते हि समवृत्तसङ्ख्याविरहिता शुद्धार्द्धसमवृत्तसङ्ख्याबोधका भवन्ति।

अङ्कतः(१)१,६७,७३,१२०। चत्वारि सहस्राणि, द्वात्रिंशच्चेति युग्मार्धसमसङ्ख्या (२) ४०३२। उभययोगोऽयं राश्यूनमिति।

(१४९) ग्लिति समानी ॥ ६ ॥

गकारलकाराभ्यां यद्वृत्तं समाप्येत(३) तत् समानी नाम। पादस्यानुष्टुब्वक्त्रमित्यतः (५।८) सूत्रात् सिंहावलोकितन्यायेनानुष्टुब्ग्रहणमनुवर्त्तते। तेनाष्टाक्षरः पादो यावद्भिर्गकारलकारैः पूर्य्यते, तावतामेव ग्रहणम्। तस्योदाहरणम् (४)।

S I S I S I S I S I S I S I S I
वासवोऽपि विक्रमेण यत्समानतां न याति।
२ ८(१०१)१२ ११८

S I S I S I S I S I S I S I S I
तस्य वल्लभेश्वरस्य केन तुल्यता क्रियेत (५) ॥

---

१ वासवोऽपीति ख०।

२ वासवोऽपीति ग०, चिह्नितपुस्तकेऽधिक पाठोऽस्ति।

३ समाप्यते इति ख०, ग०, पुस्तकान्तरपाठश्च।

४ यथोदाहरणमिति पुस्तकान्तरम्।

५ अत्र ग्लिति समानीत्यनेन बाधात्पादान्तस्य लघोर्गन्ते इति गुरुत्वं न भवति।

अनुष्टुप्छन्दसः पादघटकीभूतानामष्टाक्षराणां वर्णप्रस्तारनियमेन प्रस्तारे क्रियमाणे सर्वगुर्वादिसर्वलघ्वन्ताः षट्पञ्चाशदधिकद्विशतभेदा जायन्ते, तेषां कतिपयप्रसिद्धभेदानामत्र ग्रन्थेऽस्मिन्, अत्र यो भेदो यत्र समायास्यति, तत्सङ्ख्यापरिज्ञानार्थं पादस्थितलघ्वक्षराधोऽङ्कविन्यासं करिष्यामि। तत्र एकं दत्वा एकोत्तरेषु लघ्वङ्केषु दत्ताङ्कान् निधास्यामि, सैव सङ्ख्या वेदयित्री भविष्यति। एतन्नियमानुसारेणात्र लघुसमष्टौ कृते वासवोऽपीति श्लोके प्रस्तारस्थानस्य एकनवत्युत्तरशततमभेदो भवतीति ज्ञायते। एवं सर्वत्रानुसन्धेयं प्रस्तारभेदः प्रत्नेन।

अपिच।

ओं नमो जनार्दनाय पापसङ्घमोचनाय[१]।

दुष्टदैत्यमर्दनाय पुण्डरीकलोचनाय॥

(११७) लिगनि प्रमाणी॥७॥

लकारगकाराभ्यां यद्वृत्तं समाप्येत[२] तत् 'प्रमाणी' नाम। नाराचमित्यपरे[३]। तत्रोदाहरणम्।

। ऽ । ऽ । ऽ । ऽ । ऽ । ऽ । ऽ । ऽ
सरोजयोनिरम्बरे रसातले तथाच्युतः।
१ ॥ (८६)११ ६॥

। ऽ । ऽ । ऽ । ऽ । ऽ । ऽ । ऽ । ऽ
तव प्रमाणमीक्षितुं क्षमौ न तौ बभूवतुः[४]॥

(११८) वितानमन्यत्॥८॥

आभ्यां समानीप्रमाणीभ्यां 'अन्यत्' अष्टाक्षरपादं छन्दो 'वितानं' नाम[५]। अत्रोदाहरणम्।

---

१ पापबन्धमोचनायेति ख०, ग०, पुस्तकान्तरपाठः।

२ समाप्यते इति ख०, ग० पुस्तकान्तरपाठः।

३ अत्र पादाष्टाक्षरयोः गुरोरनन्तरं लघुसंयोगेऽनन्तरं गुरुः, [illegible] विन्यासद्वयभेदेन समानीप्रमाण्योर्लक्षणमुक्तम्। यदि सैवेव मर्यादाभावनिरपेक्षेण तयोर्लक्षणं क्रियते तदा द्वौ मगणौ रगणो गुरुरेको लघुश्च सम्पद्यते। एवमेव प्रकारमवलम्ब्य छन्दो-मञ्जरीरत्नाकरकाराभ्यां तयोर्लक्षणमुक्तम् ग्लौ रजौ समानिका गु इति (छ०), समानिका रजौ ग इति (र०) प्रमाणिका जरौ लगाविति (छ० र०)।

४ नाराचपदसारस्य वक्ष्यतीतिप्रोय भेदः।

५ पूर्वमेकस्य गुरोरनन्तरमेको लघु, पुनरेकस्य लघोरनन्तरमेको गुरु, एवं क्रमेण

ऽ ऽ । । ऽ ऽ । । ऽ ऽ । । ऽ ऽ । ।
तृष्णां त्यज धर्मं भज पापे हृदयं मा कुरु।
४ ८ (२०४) ६४ १६८

ऽ ऽ । । ऽ ऽ । । ऽ ऽ । । ऽ ऽ । ।
इष्टा यदि लक्ष्मीस्तव शिष्टाननिशं संश्रय(१)॥

द्वितीयश्च।

। । ऽ ऽ । । ऽ ऽ । । ऽ ऽ । । ऽ ऽ
हृदयं यस्य विशालं गगनाभोगसमानम्।
१ २ ११ ११(५०)

। । ऽ ऽ । । ऽ ऽ । । ऽ ऽ । । ऽ ऽ
लभतेऽसौ मणिचित्रं नृपतिर्मूर्ध्नि वितानम्(२)॥

अन्यच्च।

ऽ ऽ । ऽ । ऽ । ऽ ऽ ऽ । ऽ । ऽ । ऽ
कङ्कालमालभारिणं(३)कन्दर्पदर्पहारिणम्।
४ ११ (८४) ६४

ऽ ऽ । ऽ । ऽ । ऽ ऽ ऽ । ऽ । ऽ । ऽ
संसारबन्धमोचनं वन्दामहे त्रिलोचनम्(४)॥

नयणद्वयमुक्तम्। इदानीम् द्वयोर्गुर्वोरनन्तरं द्वौ लघू, द्वयोर्लघ्वोरनन्तरं द्वौ गुरू, इत्यादि क्रमेण लक्षणमुच्यते, अत इदं समानीप्रमाणीभ्यामन्यदेव जातमिति भावः।

१ षष्ठाक्षरप्रस्तारस्य पञ्चोनविंशतितमोऽयं भेदः। वितानलक्षणेन बाधाभावान्ते इति पादान्तस्य लघोर्गुरुत्वं भवति।

२ द्वयोर्गुर्वोरनन्तरं द्वौ लघू, द्वयोर्लघ्वोरनन्तरं द्वौ गुरू, इत्येव क्रमेण गुरुलघुविन्यासयुक्तं वितानमुक्तम्, इदन्तु तद्विपरीतलक्षणविशिष्टं द्वितीयप्रकारकं वितानं बोध्यम्। अष्टाक्षरप्रस्तारस्य द्विपञ्चाशत्तमोऽयं भेदः। पूर्वश्लोकेऽप्यस्ति वितानमिति ल्येनच्छन्दोन्तराभाव निर्देशितम्।

३ कङ्कालमालधारिणमिति स०।

४ अत्र पादे प्रथमं द्वौ गुरू, तत एकलघोरनन्तरमेको गुरुर्वर्तते, अत इदमप्यन्-

अपि च।

तस्याः स्मरामि सुन्दरं चन्द्रोपमानमाननम्।
कन्दर्पचापभङ्गुरभ्रूविभ्रमोपशोभितम्॥

ऽ । । ऽ । । ऽ ऽ ऽ । । ऽ । । ऽ ऽ
अन्यदतो हि वितान मेनपटेन यदुक्तम्।
२ ४५४) १८ २१

। । । ऽ । । ऽ ऽ ऽ । । ऽ । । ऽ ऽ
चित्रपदापि च भोगौ तेन गतार्यमिवैतत्(१)॥

किञ्च वितानमन्यदिति ब्रुवन् सूत्रकारो वितानस्यानेकप्रकारतां (२) दर्शयति। अन्यथा वितान भोगो इत्येव विदध्यात् (३)॥

प्रकारकं वितानं ज्ञेयम्। अष्टाक्षरप्रस्तारस्य पञ्चाशीतितमोऽयं भेदः। तस्याः स्मरामीति इत्यमप्येतादृगेव।

१ भौगिति चित्रपदाया इति हलरत्नाकरम्। चित्रपदा यदि भौगाविति छन्दोमञ्जरी। अष्टाक्षरप्रस्तारस्य पञ्चपञ्चाशत्तमोऽयं भेदः। पूर्वोक्तैर्विभिन्नलक्षणमिदमप्यपरप्रकारकं वितानं बोध्यम्।

२ अनेकतामिति पुस्तकान्तरपाठः। अष्टाक्षरप्रस्तारस्य यावन्तो भेदा भवन्ति, तेषां यं कमपि भेदमादाय क्रियमाणं समानीप्रमाणीभ्यामन्यद्वृत्तं वितानसामकं विज्ञेयम्। तच्च चतुः पञ्चाशोत्तरद्विशतसङ्ख्यापरिमितं भवत्यत एवास्यानेकप्रकारता सूत्रकारेण दर्शिता। केचिदस्य कतिपया प्रसिद्धभेदा नामान्तरेण व्यवहृता अपि वितानभेदा एव ते भवन्तीति बोध्यम्। यतः सूत्रकारेण स[illegible]नैव व्यवहृता।

३ भोगौ इति प्रथमादिति ख॰ पुस्तकान्तरपाठः।

(१५९)पादस्यानुष्टुब् वक्त्रम् ॥ ९ ॥

पादस्येत्ययमधिकार आसप्तमाध्यायसमाप्तेः(१)। अनुष्टुब्-वक्त्रमिति च प्राक् पदचतुरूर्ध्वादधिकृतं (२) वेदितव्यम् ॥

(१६०)न प्रथमात् स्नौ ॥ १० ॥

प्रतिषेधार्थसूत्रमिदं। अत्र वक्त्रजातौ पादस्य 'प्रथमात्' वर्णादूर्ध्वं, सगणनगणौ 'न' कार्यौ (३) ॥

(१६१)द्वितीयचतुर्थयो रश्च ॥ ११ ॥

'द्वितीयचतुर्थयोः' पादयोः प्रथमादूर्ध्वं रेफोऽपि न कर्त्तव्य इत्युपदेशः ॥

(१६२) वान्यत् ॥ १२ ॥

सगणनगणाभ्यां 'अन्यत्' मगणादिचिकषट्कमध्ये यत् किञ्चित् त्रिकान्तरं 'वा' (४) कर्त्तव्यम् ॥

तानं, तदा वितान औपश्चविव्यमेनैवाप्तम्। किमर्थं वितानमन्यदित्यविशेषोक्तयुपादान-मिति भाव ।

१ परिसमाप्तेरिति स०, पुस्तकान्तरपाठश्च ।

२ प्राक् प्रतिपाद चतुर्दशात् पदचतुरूर्ध्वादधिकृतमिति ख० ।

३ प्रथमादक्षरादूर्ध्वं सकारनकारौ न कर्त्तव्याविति पुस्तकान्तरपाठः ।

४ अन्येषां वर्णा मध्ये यत् किञ्चित् गणान्तरं प्रथमान्तरं कर्त्तव्यमिति पुस्तकान्तर-पाठः । विकल्पान्तरं कर्त्तव्यम्, अन्येषां वर्णा गणानां मध्ये यत् किञ्चिद्गणान्तरं प्रथमान-न्तरमिति ख० ।

(१२२) य चतुर्थात् ॥ १३ ॥

य इति लुप्तविभक्तिको निर्देशः। पादस्य 'चतुर्थात्' अक्षरादूर्द्ध्वं यकारः (१) प्रयोक्तव्यः। सर्व्वेषामुदाहरणम् (२)।

ल०१ यगण यगण ल० ल०१ यगण यगण गु०

। । ऽ ऽ । ऽ ऽ । । । ऽ ऽ । । ऽ ऽ

नवधाराम्बु संसिक्त वसुधागन्धि निःश्वासम्(३)।

१ १ १ (१४८) १४८ १ २ १६ (२०)

गु०१ जगण यगण गु० ल०१ तगण यगण गु०

ऽ । ऽ । । ऽ ऽ ऽ । ऽ ऽ । । ऽ ऽ ऽ

किञ्चिदुन्नतघोणाग्रं(४)मद्वो(५)कामयते वक्त्रम्(६)॥

२ = १० (७७) १ = ११ (२२)

अन्यैरप्युक्तम्।

---

१ यगण इति ख० ग० घ।

२ प्रतिषिद्धभगणयगणान्यतमगणविशिष्टाना प्रत्येकमनुष्टुप्छन्दसामुदाहरणमित्यर्थः।

३ श्योतुमग्निमि श्वासमिति क०। श्यु मुग्निमिनिश्वासमिति पुस्तकान्तरपाठः।

४ किञ्चिदुन्नतघोणमिति ख०। किञ्चिदुन्नतघ्राणाग्रमिति ग०।

५ मद्वोमिति ग० पुस्तकान्तरपाठश्च।

६ अस्य प्रत्येकपादस्य प्रथमादक्षरात् परं सगणमगणौ न स्तः, अपितु यगण एवास्ति। पुनर्द्वितीयचतुर्थपादयोः पादप्रथमाक्षरात् परं रगणो नास्ति, यतो न, अत इदं वक्त्रनामकमनुष्टुप्छन्दो बोध्यम्। श्योतुमग्निमि श्वासम्, श्यु मुग्निमिनिश्वासम्, इति पाठद्वयम् न समीचीनम्। अत्र प्रथमाक्षरात्परं प्रतिषिद्धस्य रगणस्य सत्त्वात्। अथेदं स्मरणीयम्, समानीप्रमाणीप्रभृतिकतमे य कमपेक्षमनुष्टुब्भेदमादाय कियत्काल वृत्त वितानानामकं भवति, ताभ्यां विभिन्नतुभिर्वा विभिन्नलक्षणैरनुष्टुब्भेदैर्विरच्यमानं हन्त वक्त्राख्यमनेकमनुष्टुप्छन्दो भवतीति। एव मत्यनुष्टुप्छन्दो नाम हि विषम इव अपत इति बोध्यम्।

अस्य प्रथम पदोदाहरणं प्रस्तारस्य षट्चत्वारिंशदुत्तरशततमो भेदः, द्वितीय,

गु०१ भगण यगण ल०लु०१ मगण यगण गु०

S S I I I S S I I S S S I S S S

नीलोत्पलवनेष्वद्य चरन्त्यश्चारुसंरावाः।

(१५०) ४ ८१६ १६८ १ १६ १८)

गु०१ मगण यगण म० ल०१ मगण यगण गु०

S S S S I S S S I S S S I S S I

रामाः कौशेयसंवीता प्रनृत्यन्तश्च(१)कादम्बाः(१)।

१६ (१७) १ १८ (१८)

तथा।

गु०१ रगण यगण गु० गु०१ भगण यगण गु०

S S I S I S S S S S I I I S S S

दुर्भाषितेऽपि सौभाग्यं प्राय. प्रकुरुते(१)प्रीतिः।

४ १६ (११) ४,८१६ (१८)

विंशतितम, तृतीय सप्तविंशतितम चतुर्थं षड्विंशतितमो भेदो भवति।

१ प्रनृत्यन्तीव इति ख०, ग०, पुस्तकान्तरपाठश्च।

* अत्र प्रत्येकपादस्य प्रथमाक्षरानन्तरं यत्यभावो न दोषः, यतिस्तु भगा च द्वितीयचतुर्थपादयोः प्रथमाक्षरानन्तरं यत्यभावोऽपि नास्ति, पुनश्च चतुर्थ चतुर्थीद्वयानन्तरं यथाक्रमं यतिर्नोक्ता। अत एव पूर्वं किञ्चिद्विभिन्न महाराजेनैव बहुनामकमनुष्टुप्छन्दो ज्ञातव्यम्। अत्र प्रथम पादोदाहरण मनुष्टुभोऽनुष्टुप्तमो भेदः द्वितीयचतुर्थपादयोः, तृतीय पादयोः। चतुष्पदयुक्तौ प्रतिपादाय भिन्नभेदाद्यच्छन्दोऽपि दोषाय प्रसारस्य नष्टो न भवति भवतीति मन्तव्यम्। प्रस्तारप्रकारस्तु मया तत्र पूर्वं निरूपितम्।

१ प्रकुरुते इति ख० ग० घ।

गु०१ रगण यगण ल० गु०१ मगण यगण गु०

S S | S | S S | S S S S | S S S

मातुर्मनो हरन्त्येव दौर्लालित्योक्तिभिर्बालाः (१) ॥

(१४८) ॥ १६ ११८ १८ (१७)

इत्यादि ॥

(१२७) पथ्या युजो ज् ॥ १४ ॥

चतुर्थादिति वर्त्तते। अत्र वक्त्रे 'युजः' पादस्य चतुर्थादक्षरादूर्द्ध्वं जकारः प्रयुज्यते, तद्वक्त्रं पथ्या नाम। यस्यापवादः। अत्रोदाहरणम्(२)।

गु०१ तगण यगण ल० गु०२ मगण भगण ग०

S S S I I S S I S S S S I S I I

नित्यं नीतिनिषण्णस्य राज्ञो राष्ट्रं (३) न सीदति।

(१४१) ८ १६ १०८ (२०८) १० ६४ १२८

ल०१ सगण यगण गु० गु०१ मगण जगण गु०

I I S S I S S S S S S S I S I S

न हि पथ्याशिन काये जायन्ते व्याधिवेदना.(४)॥

१ २ १६ (१०) (८१) ११ ६४

---

१ अत्र प्रथमतृतीयपादयोः प्रथमाक्षरात्परं रगणोऽप्यत्र न निषेधोऽपि तु द्वितीयचतुर्थपादयोरेव तन्निषेधः। अतोऽनुष्टुब्वक्त्रं यदोऽस्मिन्।

२ तत्रोदाहरणमिति ग०।

३ राष्ट्रमिति ख०, ग०, पुस्तकान्तरपाठः।

४ अत्र वक्त्रमेव पूर्वोक्तं वर्तते, पुनर्द्वितीयचतुर्थपादयोश्चतुर्थादक्षरात्परं यगणापवादको जकारोऽस्ति। अत इदं पथ्यावक्त्रनामकमनुष्टुप्छन्दो बोध्यम्। अस्मिन् सर्वेषु पादेषु प्रथमे। वक्त्रलक्षणे भगणनगणसगणानां चतुर्थेष्वेव पूर्वोक्तनिषेधः, यगणस्य तु चाक्षरान्तरमभ्यागाद्द्विपादस्थितेरिति फलितम्।

(१६५) विपरीतैकीयम् ॥१५॥

उक्तलक्षणाद् विपरीतलक्षणा एकीयमते पथ्या भवति(१)।

यथा।

गु०१ यगण जगण गु० गु०१ मगण यगणः गु०

S । S S । S । S S S S । । S S S

भर्तुराज्ञानुवर्त्तिनी या स्त्री स्यात् सा स्थिरा लक्ष्मीः(२)।

२ ११ १४(८२) ११ (१०)

गु०१ यगण० जगण गु० ल०१ यगण यगण गु०

S । S S । S । S । । S S । S S S

स्वप्रभुत्वाभिमानिनी विपरीता परित्याज्या (३)॥

२ ११ १४(८२) १२ ११ (१०)

(१६६) चपलाऽयुजो न् ॥१६॥

अयुक्पादस्य यदा चतुर्थादूर्द्ध्वं(४) नकारो भवति, युक्पादे

---

१ उक्तलक्षणाद्विपरीता पथ्या भवतीत्येकीय मतम्। अयुक्पादे चतुर्थादक्षरात् परतो जकारः कर्त्तव्यः। युक्पादे च स्थावतिष्ठते इति ख०। इयं पथ्या विपरीतया सह एकीभवति। अर्थात् अयुक्पादे चतुर्थादक्षरात् परतो जकारः कर्त्तव्यः। युक्पादे च स्थावतिष्ठते इति पुस्तकान्तरपाठः।

२ स्त्रैव सक्षीरिति ख०, ग० च।

३ अत्र पूर्वोक्तवक्त्रलक्षणं यथोक्तमस्ति, पुनरयुक्पादे चतुर्थादक्षरात् परतो जगणोऽस्ति, युक्पादे यगणोऽस्ति, अत इदं विपरीतपथ्याख्यं नामकमनुष्टुप्छन्दो बोध्यम्। पूर्वलक्षणे अयुक्पादे चतुर्थाक्षरात्परं यकारस्थितिर्युक्पादे जगणावस्थितिरभूत्, तदेवात्र वैपरीत्येन वर्त्तते।

४ चतुर्थादक्षरादूर्द्ध्वमिति ख०, ग० च।

य एवावतिष्ठते, तदा चपला नाम सानुष्टुब्वक्त्रं। अथोदाहरणम् (१)।

गु०१ यगण भगण गु० गु०१ यगण रगण गु०

s I s s I I I s s I s s I s s s

चीयमाणायदश्मना वक्तुनिर्मा मनामाया।

२ (१११) ११ १२ १८ [illegible]

गु०१ यगण भगण गु० गु०१ रगण रगण गु०

s I s s I I I s I I s [illegible]

कन्यका वाक्यचपला भवने [illegible] (२)॥

२ (१११) ११ १२ १८ [illegible]

लघुनावश्यमेव भवितव्यम्। प्रथमतृतीययोश्चैतावता यकारस्यापवादः। तथा च वक्ष्यति, सर्व्वतः सैतवस्येत्यादिना। पथ्यायान्तु यकार एवावतिष्ठते।

(११९) सर्व्वतः सैतवस्य ॥ १८ ॥

'सैतवस्य' आचार्य्यस्य मतेन युक्पादेऽयुक्पादे च (१) सप्तमो लकार एव कर्त्तव्यः(२)। अत्रोदाहरणम्(३)।

गु०१ जगण ज०(ल०७)गु० गु०१ भगण ज०(ल०७)गु०

ऽ । ऽ । । ऽ । ऽ ऽ ऽ । । । ऽ । ऽ

सैतवेन पयार्णवं तीर्णो दशरथात्मजः।

२ ८ ११(८१ ६४ (८३) ४ ८ ११ ६४

गु०१ भगण ज०(ल०७) गु० गु०१ मगण ज०(ल०७) गु०

ऽ ऽ । । । ऽ । ऽ । ऽ ऽ ऽ । ऽ । ऽ

रक्षः क्षयकरीं पुनः प्रतिज्ञां स्वेन बाहुना(४) ॥

(८७) ४ ८ ११ ६४ २ (८७) ११ ६४

---

१ समेनायुक्पादेऽपीति पुस्तकान्तरपाठः।

२ युग्मे पादे [illegible] सप्तमो वर्णो लघुरेव कर्त्तव्य इति [illegible] [illegible] इति कथितम्। तथा [illegible] सप्तमो वर्णो लघुरेवावतिष्ठते इति भावः।

३ तत्रोदाहरणमिति ख०, अ० च।

४ अत्र [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible]

(१९) भौ न्तौ च ॥ १९ ॥

सर्व्वतः मैवतस्येति निवृत्तम्। चपलाऽयुजो निलसमाद्(१) अयुग्ग्रहणमनुवर्त्तते। विपुला युग्लः सप्तम इति सर्व्वमनुवर्त्तनीयम्(२)। अयुक्पादे यदा चतुर्थादक्षरात् परतो यकारं वाधित्वा भकाररेफनकारतकारा विकल्पेन भवन्ति, तदासौ विपुला नाम। तत्र भकारेण विपुलोदाहरणम्।

ल० १ रगण भ०(ल०३)गु० ल० १ मगण ज०(ल०३) गु०

। ऽ । ऽ ऽ । । ऽ । ऽ ऽ ऽ । ऽ । ऽ

इयं सखे चन्द्रमुखी स्मितज्योत्स्ना च मानिनी (३)।

१ ४ ६७ ६४(१०२) १ १६ ६४ (८२)

गु० १ रगण भ०(ल०३)ग० गु० १ जगण ज०(ल०३)गु०

ऽ ऽ । ऽ ऽ । । ऽ ऽ । ऽ । । ऽ । ऽ

इन्दीवराक्षी हृदयं दन्दहीति तथापि मे(४) ॥

४ ६०(५(१०१) २ ८ १६ ६४ ९१)

अयुज इति जातिपक्षे द्वयोरपि पादयोर्ग्रहणम्। व्यक्तिपक्षे

---

१ अयुजो निलसमाद्विति ख० ग० पुस्तकान्तरपाठः।

२ सर्वमनुवर्त्तत इति पुस्तकान्तरपाठः। अत्र विपुलावर्णे युक्पादे भगणमवर्णे चतुरेव कार्य्यं, अयुक्पादेषु तत्र वैकल्पमिति ध्यातव्यम्। एतर्द् युजो पादयो सर्वत्र अयुजो कुत्रचिदेव भगणात्परोपरि स्थापितः (भ०३) एतच्चिह्न तत्र तत्र द्रष्टव्यम्।

३ स्मितज्योत्स्नावभामिनीति ग०।

४ अत्र वक्त्रलक्षणं सर्वं वर्त्तते. पुनरयुक्पादे चतुर्थादक्षरात् परं यगणापवादको भगणोक्तिः, अत इदं भविपुलापूर्वकं वक्त्रनामकमनुष्टुप्छन्दो बोध्यम्। अत्रायुक् पादे न भगण भगणस्य सत्त्वात् जातिपक्षीय भविपुलोदाहरणमिदमिति निवेदनम्।

पुनरेकस्य। एकपक्षे पुनः प्रथमस्य तृतीयस्य वा। तथाच महाकवीनां प्रयोगाः।

ल॰१ रगण भगण गु॰ गु॰१ यगण ज॰(ल०७)गु॰

। ऽ । ऽ । । । ऽ ऽ । ऽ ऽ । ऽ । ऽ

वटे वटे वैश्रवणश्चत्वरे चत्वरे शिवः।

१ ४(१०२) ९२१४ २ ११ १४(८०)

गु॰१ यगण यगण गु॰ गु॰१ भगण ज॰(ल०७)गु॰

ऽ । ऽ ऽ । ऽ ऽ ऽ ऽ ऽ । । । ऽ । ऽ

पर्वते पर्वते रामः सर्वत्र मधुसूदनः(१)॥

९ ११ (१८) ४ ८ १९ १४(९२)

गु॰१ भगण यगण गु॰ गु॰१ यगण ज॰(ल०७)गु॰

ऽ ऽ । । । ऽ ऽ ऽ ऽ । ऽ ऽ । ऽ । ऽ

देवः स जयति श्रीमान् दण्डधारो महीपतिः।

४ ८ ११ १८) २ ११ १४ (८३)

गु॰१ रगण भ॰(ल०७)गु॰ गु॰१ जगण भ॰(ल०७) ल॰

ऽ ऽ । ऽ ऽ । । ऽ ऽ । ऽ । । ऽ । ।

यस्य प्रसादाद्भुवनं शाश्वते पथि तिष्ठति (१)॥

४ ९१ १४(१०१) १ १४ ८ ११ (११८)११८

---

१ २, [illegible] इति च, लिखितपुस्तकपाठक्रम [illegible]। अत्र [illegible] प्रथमाक्षरात्पर [illegible] वर्णमात्रमनात्। अत्र श्लोकद्वये [illegible] अपि, पुनरेकस्य प्रथमे पादद्वयस्य तृतीये [illegible] वर्णेषु। अत्र [illegible] भवति। अस्मिन् श्लोकद्वये प्रथमे तृतीये [illegible] पादे [illegible]।

ल०१ रगण रगण गु० गु०१ सगण ज०(ल०ग०)गु०

। ऽ । ऽ ऽ । ऽ ऽ ऽ ऽ ऽ ऽ । ऽ । ऽ

महाकविं कालिदासं वन्दे वाग्देवतागुरुम्(१)।

१ ४(२८) २१ (८१) १२ ६४

गु०१ मगण यगण ल० गु०१ जगण ज०(ल०ग०)गु०

ऽ ऽ ऽ ऽ । ऽ ऽ ऽ । ऽ । ऽ । । ऽ । ऽ

यज्ज्ञाने विश्वमाभाति दर्पणे प्रतिबिम्बवत्(२)॥

(१४५) १२ ११८ १ ८११ ६४(८१)

तृतीये पादे।

गु०१ यगण यगण गु० गु०१ मगण ज०(ल०ग०)गु०

ऽ । ऽ ऽ । ऽ ऽ ऽ ऽ ऽ ऽ । । ऽ । ऽ

कामिनीभिः सहप्रीतिः कस्मै नाम(३) न रोचते।

१ ११ (१९) (८९) ८ ११ ६४

ल०१ यगण रगण ल० गु०१ जगण ज०(ल०ग०)गु०

। । ऽ ऽ ऽ । ऽ । ऽ । ऽ । । ऽ । ऽ

यदि न स्याद्वारिवीचिचञ्चलं हतजीवितम्(४)॥

१ १ (११४) (९१) ११८ १ ८११ ६४(८१)

इदानीं नकारविपुलोदाहरणम्।

मनुष्टुप्छन्दो भवति। अस्मिन् वृत्ते प्रथमतृतीययोरुभयोरपि पादयोश्चतुर्थाक्षरात् परं रगणस्य सत्त्वात् सम्भवातिपद्योपमिदं रविपुलोदाहरणमिति बोध्यम्।

१ वाग्देवतां गुरुमिति ख०, ग० च।

२ अत्र वक्त्रादिलक्षणमस्ति, पुनः प्रथमे पादे चतुर्थाक्षरात् परं रगणो वर्तते अत इदमपि रविपुलापूर्वकं वक्त्रनामकमनुष्टुप्छन्दो भवति। अस्मिन् वृत्ते प्रथम एव एकस्मिन्नेव पादे चतुर्थाक्षरात्परं रगणस्य सम्भवात्पद्योपमिदं रविपुलोदाहरणमिति बोध्यम्।

३ कस्य नामेति ख०। कस्मै नामेति ग०।

४ चञ्चलं जीवितमिति ख०, पुस्तकान्तरपाठश्च। अत्र वक्त्रादिलक्षणमस्ति पुनः

स०१ रगण नगण गु०गु०१ जगण ज०(स०७)गु०

। ऽ । ऽ । । । ऽ ऽ । ऽ । । ऽ । ऽ

तपस्विनो हि वसते केवलाजिनवल्कले॥

१ ४ १६ १२२४(११८) २ ८ १६ ६४(८१)

व्यक्तिपक्षे कालिदासः।

स०१ मगण भगण गु०गु०१ मगण ज०(स०७)गु०

। ऽ ऽ ऽ । । । ऽ ऽ ऽ ऽ ऽ । ऽ । ऽ

अनाक्रान्तस्य विषयैर्विद्यानां पारदृश्वनः।

१ १६ १२२४(११४) १८ ६४(८२)

गु०१ जगण यगण गु० गु०१ तगण जगण (स०७)गु०

ऽ । ऽ । । ऽ ऽ ऽ ऽ ऽ ऽ । । ऽ । ऽ

तस्य धर्म्मरतेरासीद् वृद्धत्वं जरसा विना(१)॥

१ ८१६ (१०) ८१६ ६४(८८)

तथा च।

स०१ जगण यगण गु०गु०१ मगण ज०(स०१) गु०

। । ऽ । । ऽ ऽ ऽ ऽ ऽ ऽ । । ऽ । ऽ

सच मन्त्रज्ञो मन्त्रैर्दूरात् संशमितारिभिः।

११ ८१६ (१८) ८१६ ६४(८८)

१ [illegible]

गु०१ मगण नगण गु०गु०१ जगण भगण(ल०७)गु०

ऽ ऽ ऽ ऽ । । । ऽ ऽ । ऽ । । ऽ । ऽ

प्रत्यादिश्यन्त इव मे दृष्टलक्ष्यभिदः शराः ॥

१९ १२२४(११२) २ ८ १९ ६४(९१)

इदानीं तकारविपुलोदाहरणम् ।

गु०१ मगण मगण गु०ल०१ मगण ज०(ल०७)गु०

ऽ ऽ ऽ ऽ ऽ ऽ । ऽ । ऽ । । । ऽ । ऽ

वन्दे देवं(१) सोमेश्वरं जटामुकुटमण्डितम् ।

(६१) ० ६४ १ ४ ८११ ६४(९४)

गु०१ भगण मगण गु०ल०१ मगण ज०(ल०७) गु०

ऽ ऽ । । ऽ ऽ । ऽ । ऽ । । । ऽ । ऽ

खट्वाङ्गधरं चन्द्रमःशिखामणिविभूषितम्(२) ॥

४ ८(००) ६४ १ ४ ८ १९ ६४(९४)

व्यक्तिपक्षे ।

गु०१ रगण नगण गु० गु०१ जगण ज०(ल०७) गु०

ऽ ऽ । ऽ ऽ ऽ । ऽ ऽ । ऽ । । ऽ । ऽ

वन्दे कविं श्रीभारविं लोकसन्तमसच्छिदम् ।

४ ० ६४(६८) २ ८१९ ६४(९१)

---

१ देवदेवमिति क० ।

२ खट्वाङ्गधरं शङ्करं चन्द्ररेखाशिखामणिमिति ख० । पुस्तकान्तरपाठः । वक्त्रादिलक्षणयुक्तस्य तविपुलापूर्वकस्य वक्त्रनामकस्यानुष्टुप्छन्दसोऽस्योभयोरप्ययुक्पादयोस्तगणस्य सत्त्वात् जातिपक्षेऽयं तविपुलोदाहरणमिदमिति ज्ञातव्यम् ।

ल०१ मगण यगण ल० गु०१ तगण ज०(ल०३)गु०

I S S S I S S I S S S I I S I S

दिवादीपा इवाभान्ति यस्याग्रे कवयोऽपरे(१) ॥

१ १६(१०६) ११८ ८११ ६४(८८)

तथान्येषामपि प्रयोगः ।

गु०१ जगण यगण गु० गु०१ यगण ज०(ल०३)गु०

S I S I I S S S S S I S S I S I S

लोकवत् प्रतिपत्तव्यो लौकिकोऽर्थः परीक्षकैः ।

९ ८१६ (२७) २ १६ ६४(८२)

गु०१ भगण मगण ल०ल०१ यगण ज०(ल०३)गु०

S S I I S S I I I I S S I S I S

लोकव्यवहारं प्रति सदृशौ बालपण्डितौ(१) ॥

७ ८(१०४) ६४११८ १ १ १६ ६४(८४)

इदानीं चकाराकृष्टं मकारविपुलोदाहरणम् ।

गु०१ रगण मगण गु० गु०१ यगण ज०(ल०३)गु०१

S S I S S S S S S I S S I S I S

सर्वातिरिक्तं लावण्यं बिभ्रती चारुविभ्रमा ।

१ (४) १ (८४)११ ६१

---

१ अत्र [illegible] अविपुलापूर्वकस्य [illegible] [illegible] प्रथमे चतुष्पादे नगणस्य [illegible] विपुलोदाहरणमिदमिति ज्ञातव्यम् । लोकवदित्यस्य [illegible] पादे मगणस्य [illegible] [illegible] विपुलोदाहरणमिति बोध्यम् ।

२ अत्र [illegible] अविपुलापूर्वकस्य [illegible] [illegible] प्रथमपादे नगणस्य [illegible] विपुलोदाहरणमिदमिति बोध्यम् ।

गु०१ रगण मगण लु० गु०२ मगण ज०(ल०८)गु०

[illegible] ऽ । ऽ ऽ ऽ ऽ । ऽ ऽ ऽ ऽ । ऽ । ऽ

स्त्रीलोकसृष्टिस्त्वन्यैव निःसामान्यस्य वेधसः(१) ॥

४ (१२८) १२८ (८९) ११ ६४

व्यक्तिपक्षे श्रीकालिदासः ।

ल०१ रगण मगण गु० ल०१ यगण ज०(ल०७)गु०

। ऽ । ऽ ऽ ऽ ऽ ऽ । । ऽ ऽ । ऽ । ऽ

मनोऽभिरामाः शृण्वन्तौ रथनेमिस्वनोन्मुखैः ।

१ ४ (२) १ २ (८४) ११ ६४

गु०१ यगण यगण गु० ल०१ मगण जगण(ल०७) गु०

ऽ । ऽ ऽ । ऽ ऽ ऽ । ऽ ऽ ऽ । ऽ । ऽ

षड्जसंवादिनीः केका द्विधाभिन्नाः शिखण्डिभिः(२) ॥

२ ११ (१९) १ (८२) ११ ६४

ल०१ रगण मगण गु० गु०१ मगण जगण (ल०७)गु०

। ऽ । ऽ ऽ ऽ ऽ ऽ ऽ ऽ ऽ । । ऽ । ऽ

अथ प्रदोषे दोषज्ञः संवेशाय विशाम्पतिम् ।

१ [illegible] (६) (८९) ८ ११ ६४

---

१ वक्त्रादिलक्षणयुक्तस्य नविपुलापूर्वकस्य वक्त्रनामकस्यानुष्टुप्छन्दसोऽस्योभयस्मिन्नेवायुक्पादे नगणस्य वर्त्तमानत्वान्नातिपक्षीय नविपुलोदाहरणमिदमिति बोध्यम ।

२ वक्त्रादिलक्षणयुक्तस्य मविपुलापूर्वकस्य वक्त्रनामकस्यानुष्टुप्छन्दसोऽस्य एकस्मिन्नेव प्रथमे ह्ययुक्पादे मगणस्य सत्त्वाद्व्यक्तिपक्षीय मविपुलोदाहरणमिदमिति बोध्यम् । अथ प्रदोष इतिवृत्तमप्येतादृशमेव । अदूरवर्त्तिनी, शालाशाल इतिशब्दद्वयस्य तृतीय पाद एव चतुर्थाक्षरात् परं मगणस्य सत्त्वात्तदपि व्यक्तिपक्षीय वक्त्रादिलक्षणयुक्त मविपुलापूर्वकं वक्त्रनामकमनुष्टुप्छन्दो भवति ।

गु०१ तगण यगण गु० ल०१ यगण जगण (ल००)गु०

ऽ ऽ ऽ । । ऽ ऽ ऽ । । ऽ ऽ । ऽ । ऽ

सूनुः सुनृतवाक् स्रष्टुर्विससर्जोर्ज्जितश्रियम् ॥

८ १९ (१४) १ २ १६(८४)१५

तृतीयपादे ।

ल०१ रगण यगण गु० गु०१ मगण जगण (ल००)गु०

। ऽ । ऽ । ऽ ऽ ऽ ऽ ऽ । । । ऽ । ।

अदूरवर्त्तिनीं सिद्धिं राजन् विगणयात्मनः ।

१ ४ १९ (२१) (८२) ८४ १९ ६४

ल०१ रगण मगण गु० गु०१ जगण ज०(ल००)गु०

। ऽ ऽ ऽ ऽ ऽ ऽ । ऽ । । ऽ । ऽ

उपस्थितेयं कल्याणी नाम्नि कीर्त्तित एव यत् ॥

१ ४ (१) २ (८१) ८ १९ ६४

गु०१ मगण यगण गु० गु०१ मगण ज०(ल००)गु०

ऽ ऽ ऽ ऽ । ऽ ऽ ऽ ऽ ऽ ऽ ऽ । ऽ । ऽ

श्लाघ्यस्त्यागोऽपि वैदेह्याः पत्युः प्राग्वंशवासिनः ।

१९ (१०) (८१) १६ ६४

ल०१ रगण मगण गु० गु०१ यगण जगण(ल००)गु०

। ऽ । ऽ ऽ ऽ ऽ ऽ ऽ । ऽ ऽ । ऽ । ऽ

अनन्यजानेस्तस्यासीत् सैव जाया हिरण्मयी ॥

१ ४ (१) २ (८२) १९ ६४

मकारेणापि क्वचिद्विपुला दृश्यते । यथा,

ल०१ मगणः यगण गु० ल०१ नगण ज० ल०१ गु०

। ऽ । । । ऽ ऽ ऽ । ऽ ऽ । । ऽ । ।

जिते तु(१) लभते लक्ष्मीं मृते चापि वराङ्गना ।

१ ४ ८१६ (६०) १(६०) ८ १६ ६४

ल०१ यगण भगण गु० गु०१ नगण ज०(ल०१)गु०

। । ऽ ऽ । । ऽ ऽ ऽ ऽ ऽ । । ऽ । ऽ

क्षणविध्वंसिनि काये(२) का चिन्ता मरणे रणे ॥

१ २ १६ ३२ (५२) (८९) ८१६ ६४

सङ्कीर्णाश्च विपुलाप्रकारा दृश्यन्ते । तथा च भारविप्रोक्तम् ।

ल०१ मगण नगण गु० ल०१ यगण ज०(ल०१ गु०

। ऽ ऽ ऽ । । । ऽ । । ऽ ऽ । ऽ । ऽ

क्वचित्काले प्रसरता क्वचिदापत्य विम्नता(३) ॥

१(११४) १६३२(४ २ २(८४) १६ ६४

ल०१ रगण भगण गु० ल०१ मगण ज० ल०१) गु०

। ऽ । ऽ ऽ । । ऽ । ऽ ऽ ऽ । ऽ । ऽ

धुनेव सारङ्गकुलं त्वया भिन्नं द्विषां कुलम्(४) ॥

१ ४(१०१) ८१६(४ १ (८२) १६ ६४

---

१ जितैर्मैति पुस्तकान्तरपाठः ।

२ क्षणविध्वंसिनि काये इति ख०, पुस्तकान्तरपाठश्च । अत्र न विपुलालक्षणाक्रान्तोऽयं पाठः समादरणीयः । इत्थंक्रमे तृतीये पादे एव चतुर्थाद्वर्णात्परं नगणस्य सत्त्वात्प्राप्तिपक्षीयं पञ्चाद्विलक्षणयुक्तं नविपुलापूर्वकं पञ्चनामकमनुष्टुप्छन्दो भवतीति ।

३ निम्नतेति ख०, पुस्तकान्तरपाठश्च ।

४ प्रथमे त्वायुक्पादे चतुर्थाद्वर्णात्परं नगणस्य सत्त्वात्प्राप्तिपक्षीय नविपुलोदा

(१२०) गावन्त आपीडः ॥ २० ॥

गकारौ द्वावन्ते चेद्भवतश्चतुर्णामपि पादानां,(१), तत् पदचतुरूर्द्ध्वमापीडमवगन्तव्यं भवति । अन्ते गुरुद्वयग्रहणादेव शेषाणां लघुत्वमभ्यनुज्ञातं सूत्रकारेणेति मन्यामहे । तत्रोदाहरणम् ।

१ २ ३ ४ ५ ६ ७ ८ १ २ ३ ४ ५ ६ ७ ८ १ २ ३ ४
कुसुमितसहकारे, हर्तहिममहिमशुचिरशशाङ्के ।
१ २ ३ ४ ५ ६ ७ ८ ९ १० ११ १२ १ २ ३ ४
विकसितकमलसरसि मधुसमयेऽस्मिन्,
१ २ ३ ४ ५ ६ ७ ८ ९ १० ११ १२ १३ १४ १५ १६ १ २ ३ ४
प्रवससि पथिक हतक यदि भवति तव विपत्तिः(२) ॥

(१२१) आदौ चेत्(३) प्रत्यापीडः ॥ २१ ॥

गकारौ द्वौ आदौ चेद्भवतश्चतुर्णां(४) पादानां, तदा तत् पदचतुरूर्द्ध्वं प्रत्यापीडमवगन्तव्यं भवति । अत्रापि पूर्ववत् शेषाणां लघुत्वमेव । तत्रोदाहरणम् ।

१ २ ३ ४ ५ ६ ७ ८ १ २ ३ ४ ५ ६ ७ ८ १ २ ३ ४
चित्तं मम रमयति, कान्तं वनमिदमुपगिरिनदि ।
१ २ ३ ४ ५ ६ ७ ८ ९ १० ११ १२ १ २ ३ ४
कूजन्मधुकरकातरवकुल-जनधुनि,

---

१ चतुर्णामपि पादानामन्ते द्वौ गकारौ चेद्भवत इति म, चिह्नितपुस्तकपाठक्रम ।

२ अत्र पदचतुरूर्द्ध्वलक्षणं वर्त्तते, पुनः प्रतिपादान्ते द्वौ गुरू वर्णौ स्वत एव सन्ति, अतः इदमापीडनामकं पदचतुरूर्द्ध्वं छन्दो भवेत्।

३ गकारादौ चेदिति क, चिह्नितपुस्तकधृतसूत्रपाठान्तरम् ।

४ चतुर्णामपीति म० म० च ।

इत्यादयो विपुलाविकल्पाः सङ्कीर्णयानुकोटिशः का[illegible] दृश्यन्ते । सर्व्वासां विपुलानां चतुर्थो वर्णः प्रायेण गुरुर्भवत[illegible] त्याम्नायः ।

(१८) प्रतिपादं चतुर्वृद्ध्यापदचतुरूर्द्ध्वम् ॥१८॥

चतुर्णामक्षराणां वृद्धिश्चतुर्वृद्धिः । अनुष्टुभः पादादूर्द्ध्वं प्रति[illegible] पादं चतुरक्षरवृद्ध्या (१) यद्वृत्तं निष्पद्यते तत् पदचतुरू[illegible] नाम । तत्रोदाहरणम् ।

१ २ ३ ४ ५ ६ ७ ८ १ २ ३ ४ ५ ६ ७ ८ १ २ ३ ४
तस्याः कटाक्षविक्षेपैः कम्पिततनुकुटिलैरतिदीर्घैः ।

१ २ ३ ४ ५ ६ ७ ८ ९ १० ११ १२ १३ १४ १५ १६
तक्षकदष्ट इवेन्द्रियशून्यः च्युतचैतन्यः

१ २ ३ ४ ५ ६ ७ ८ ९ १० ११ १२ १३ १४ १५ १६ १७ १८ १९ २० १ २ ३ ४
पदचतुरूर्द्ध्वं न चलति पुरुषः पतति सहसैव ॥

अत्र गुरुलघुविभागो नेष्यते ।

हरणमिदं । पुनश्चतीये श्लोकपादे मकारात् पूर्वं मगणस्य [illegible] भविपु[illegible] मोदाहरणमिदं भवति । एव चेत् मभविपुलापूर्वक [illegible] इदमि[illegible] मस्य मात्रानिर्देश [illegible] । [illegible] विपुलेयम् ।

१ इहि [illegible] प्रथमे पादे इदिनं [illegible], अपितु द्वितीयादा[illegible] षष्ठ । तदात्र प्रथम पादे [illegible] एव [illegible] । द्वितीये पादे द्वादशाक्षरेभ्य ऊर्द्ध्वं चतुरक्षरवृद्धि [illegible], तृतीये द्वादशाक्षरेभ्य पर, चतुर्थे षोडशाक्षरेभ्य परमप[illegible] [illegible] पदचतुरूर्द्ध्वस्योदाहरणमिदमपि [illegible] षोडशाक्षर पर पूर्वोक्तचतुरूर्द्ध्वमुदाहरणम् इति [illegible] । अत्र चतुर्थे पादान्ते [illegible] मिदम् ।

(१०) गावन्त आपीडः ॥ २० ॥

गकारौ द्वावन्ते चेद्भवतश्चतुर्णामपि पादानां,(१), तत् पदचतुरूर्द्ध्वमापीडसञ्ज्ञकं भवति । अन्ते गुरुद्वयग्रहणादत्र शेषाणां लघुत्वमभ्यनुज्ञातं सूत्रकारेणेति मन्यामहे । तत्रोदाहरणम् ।

१ २ ३ ४ ५ ६ ७ ८ १ २ ३ ४ ५ ६ ७ ८ १ २ ३ ४
कुसुमितसहकारे, हतहिममहिमधुचिश्रशाङ्के ।
१ २ ३ ४ ५ ६ ७ ८ ९ १० ११ १२ १ २ ३ ४
विकसितकमलसरसि मधुसमयेऽस्मिन्,
१ २ ३ ४ ५ ६ ७ ८ ९ १० ११ १२ १३ १४ १५ १६ १ २ ३ ४
प्रवससि पथिक हतक यदि भवति तव विपत्तिः(२) ॥

(११) आदौ चेत्(३) प्रत्यापीडः ॥२१॥

गकारौ द्वौ आदौ चेद्भवतश्चतुर्णां(४) पादानां, तदा तत् पदचतुरूर्द्ध्वं प्रत्यापीडसञ्ज्ञं भवति । अत्रापि पूर्व्ववत् शेषाणां लघुत्वमेव । तत्रोदाहरणम् ।

१ २ ३ ४ ५ ६ ७ ८ १ २ ३ ४ ५ ६ ७ ८ १ २ ३ ४
चित्तं मम रमयति, कान्तं वनमिदमुपगिरिनदि ।
१ २ ३ ४ ५ ६ ७ ८ ९ १० ११ १२ १ २ ३ ४
कूजन्मधुकरकलरवततजनधुनि,

---

१ चतुर्णामपि पादानामन्ते द्वौ गकारौ चेद्भवत इति ग,चिह्नितपुस्तकपाठक्रम ।

२ अथ पदचतुरूर्द्ध्वं लक्षणं वर्त्तते, पुनः प्रतिपादान्ते द्वौ गुरू अन्ये लघवः सन्ति, अत इदमापीडनामकं पदचतुरूर्द्ध्वं छन्दो ज्ञेयम् ।

३ गावादौ चेदिति क, चिह्नितपुस्तकधृतसन्दिग्धपाठान्तरम् ।

४ चतुर्णामपीति क० ग० च ।

१ २ ३ ४ ५ ६ ७ ८ ९ १० ११ १२ १३ १४ १५ १६ १ २ ३ ४
पुंस्कोकिलमुखरितसुरभिकुसुमचितनतनति(१) ॥

(१७) प्रत्यापीडो गावादौ च ॥२२॥

चकारोऽन्त इति समुच्चयार्थः । तस्यैव पदचतुरूर्द्ध्वस्यान्ते आदौ च यदि गकारौ भवतस्तदा प्रत्यापीड एव भवति(२) । तत्रोदाहरणम् ।

१ २ ३ ४ ५ ६ ७ ८ १ २ ३ ४ ५ ६ ७ ८ १ २ ३ ४
कान्तावदनसरोजं, हृद्यं घनसुरभि मधुरसाढ्यम् ।

१ २ ३ ४ ५ ६ ७ ८ ९ १० ११ १२ १ २ ३ ४
पातु रहसि सततमभिलपति मनो मे,

१ २ ३ ४ ५ ६ ७ ८ ९ १० ११ १२ १३ १४ १५ १६ १ २ ३ ४
किञ्चिन्मुकुलितनयनमविरतमणितरमणीयम्(३) ॥

तदेवं द्विप्रकारः प्रत्यापीडो भवति ।

(१७) प्रथमस्य विपर्य्यासे मञ्जरीलवल्यमृतधाराः ॥२३॥

आपीडग्रहणं निवृत्तम् । तेनैव समं लक्ष्यद्वराभ्यनुज्ञानञ्च ।

---

१ अत्र पदचतुरूर्द्ध्वप्रथमांघ्रौ, पुनः प्रत्येकपादादौ द्वौ गुरू, इतरे लघव सन्ति, अत इद प्रत्यापीडनामक पदचतुरूर्द्ध्वं छन्दो ज्ञेयम् ।

२ तदा तदपि प्रत्यापीडो भवतीति भ० ।

३ अत्र पदचतुरूर्द्ध्वप्रथमांघ्रौ, पुनः प्रत्येकपादस्यादावन्ते च द्वौ द्वौ गुरू, अन्ये लघवः सन्ति । अत उभयविधप्रकारक प्रत्यापीडनामक पदचतुरूर्द्ध्वं छन्दो विज्ञेयम् ।

तदेव षट्चतुष्कूर्दं प्रथमस्य(१) विपर्य्यासे मञ्जरीलवल्यमृतधारा-भिधानं भवति । प्रथमस्य पादस्य द्वितीयेन विपर्य्यासे मञ्जरी । प्रथमस्य तृतीयेन विपर्य्यासे लवली । प्रथमस्य चतुर्थेन विपर्य्यासेऽमृतधारा । तत्र मञ्जर्युदाहरणम् ।

१ २ ३ ४ ५ ६ ७ ८ १ २ ३ ४ १ २ ३ ४ ५ ६ ७ ८
जनयति महतीं प्रीतिं हृदये, कामिनां चूतमञ्जरी ।

१ २ ३ ४ ५ ६ ७ ८ ९ १० ११ १२ १ २ ३ ४
मिलदलिचक्रचञ्चपरिचुम्बितकेसरा,

१ २ ३ ४ ५ ६ ७ ८ ९ १० ११ १२ १३ १४ १५ १६ १ २ ३ ४
कोमलमलयवातपरिनर्त्तिततरुशिखरस्थिता(२) ॥

लवल्युदाहरणम् ।

१ २ ३ ४ ५ ६ ७ ८ ९ १० ११ १२ १ २ ३ ४ १ २ ३ ४ ५ ६
विरहविधुरतरुणकाङ्गनाकपोलोपमं, परिणतिधरं

७ ८ १ २ ३ ४
पीतपाण्डुच्छवि(३) ।

---

१ प्रथमस्य पादस्येति पुस्तकान्तरपाठः ।

२ तरुशिखरस्थितेति ग० । अत्र षट्चतुष्कूर्दं ... पादा भवन्ति, पुन षट्चतुष्कूर्दं ... प्रथम पादोऽत्र द्वितीय, पूर्वस्य द्वादशाक्षरो द्वितीय पादोऽत्र प्रथम । इत्थं प्रथमस्य पादस्य द्वितीयेन सहात्र विनिमयोऽस्ति, तृतीय-चतुर्थपादौ तु षट्चतुष्कूर्दं यथापि वर्त्तेते । अत इदं षट्चतुष्कूर्दं मञ्जरीनामकं छन्दो भवति ।

२ तरुणकाङ्गनाकपोलावदातपरिणति ... पीतपाण्डुच्छवीति ग० ।

१ २ ३ ४ ५ ६ ७ ८ १ २ ३ ४ ५ ६ ७ ८ ९ १० ११ १२ १३ १४ १५
सवलीफलं निदाघे, भवति जगति हिमकरशीतलमति-

१६ १ २ ३ ४
स्वादूष्णाहरम्(१) ॥

अमृतधारोदाहरणम् ।

१ २ ३ ४ ५ ६ ७ ८ ९ १० ११ १२ १३ १४ १५ १६ १ २ ३ ४
परिवाञ्छसि(२) कर्णरसायन सततममृतधाराभिः,

१ २ ३ ४ ५ ६ ७ ८ १ २ ३ ४
यदि हृदि वा परमानन्दरसं ।

१ २ ३ ४ ५ ६ ७ ८ ९ १० ११ १२ १३ १४ १ २ ३ ४
चेतः शृणु धरणीधर वाणीममृतमयीं,

१ २ ३ ४ ५ ६ ७ ८
तत्काव्यगुणभूषणम्(३) ॥

केचिदापीडादिष्वपि पादविपर्यासे सति मञ्जर्यादिनामानीच्छन्ति ।

इति पदचतुरूर्ध्वाधिकारः ॥

---

१ शीतल सल्लदनितवाद् ह्लादकमिति ग० ।

अत्र पदचतुरूर्ध्वं असमपुष्टा पादा भवन्ति पुन पदचतुरूर्ध्वस्य यो क्रमात् तृतीय पादेन प्रथम, प्रथमस्थाने प्रथम पादोऽपि तृतीये । एवं प्रथमस्य पादस्य तृतीयेन सह विनिमयो वर्तते । द्वितीयचतुर्थयोः तु यथोक्तस्थानवर्तिनौ स, यत इद पदचतुरूर्ध्वं अमृतधारात्मकं छन्दो ज्ञेयम् ।

२ यदि वा हृदयेति क०, ग०, पुस्तकान्तरपाठश्च ।

३ अत्र चतुरूर्ध्वमसमपुष्टा पादा भवन्ति, पूर्वोक्तक्रमात् पदचतुरूर्ध्वस्य

(१०४) उद्गतामेकतः स्जौ स्लौ, न्सौ ज्गौ, भ्नौ ज्लौ ग् स्जौ स्जौ ग् ॥२४॥

पाद इति प्रकृतमनुवर्तते। यत्र प्रथमे पादे सकारजकारसकारलकारैर्दशाक्षराणि भवन्ति। द्वितीये पादे नकारसकारजकारगकारैर्दशैव। तृतीयपादे भकारनकारजकारलकारगकारैरेकादशैव। चतुर्थे पादे सकारजकारसकारजकारगकारैस्त्रयोदशैव। तद्वृत्तमुद्गता नाम। तत्रोदाहरणम्।

सगण जगण सगण ल० नगण सगण जगण गु०

। । ऽ । ऽ । । । ऽ । । । । । । ऽ । ऽ । ऽ

मृगलोचना शशिमुखी च रुचिरदशना नितम्बिनी।

१ २ ३ ४ ५ ६ ७ ८ ९ १० १ २ ३ ४ ५ ६ ७ ८ ९ १०

भगण नगण जगण ल०गु० सगण जगण सगण जगण गु०

ऽ । । । । । ऽ । । ऽ । । ऽ । ऽ । । । ऽ । ऽ । ऽ

हंसललितगमना ललना, परिणीयते यदि भवेत्कुलोद्गता।[1]॥

१ २ ३ ४ ५ ६ ७ ८ ९ १० ११ १ २ ३ ४ ५ ६ ७ ८ ९ १० ११ १२ १३

चतुर्थपादोऽत्र प्रथमः, अष्टाक्षरात्मकः प्रथमः पादोऽत्र चतुर्थः, इत्थं प्रथमस्य चतुर्थेन सह विनिमयो वर्तते, द्वितीयतृतीयौ तु यथोक्तस्थानस्थौ स्तः, अत इदं पदचतुरूर्ध्वं भ्रमरावलीनामकं छन्दो बोध्यम्।

१ अत्र प्रतिपादोक्ता गणवर्णादयः उपरि विन्यस्ताः। प्रत्येकपादाक्षरसङ्ख्यापि अङ्कैरधस्तात् निवेशिता। यत्रैकस्य पुनरावृत्तिर्दृश्यते तत्पूर्वाक्षरे पादसमाप्तिर्ज्ञातव्या। विषमवृत्तमिदमक्षरतो गणतश्चात्र परत्र सर्वत्र तथा ज्ञेयम्। उद्गताच्छन्दसश्चत्वारः पादा दशैकादशत्रयोदशाक्षरप्रस्तारस्य भेदविशेषा बोद्धव्याः। कतमो भेद इति सूचिताङ्कदशा अनुसन्धेयम् ग्रन्थकर्त्रा। पादस्त्वयाबोध

यत्र सूत्रे गकारो लकारो वा श्रूयते, तत्र तेनैव वृत्तस्य पाद समाप्यते । उद्गतामिति कर्म्मविभक्तिश्रवणात् पठेदित्यध्याहार्य्यम् । एकत इति प्रथम पादं द्वितीयेन सहाविलम्बेन पठेदित्यर्थः । उपस्थितप्रचुपित प्रथगाद्यमित्यत. सिंहावलोकितन्यायेनाद्यग्रहणमनुवर्त्तनीयम्(१) । तेनाद्यमेव पादमेकत पठेत् । एकत इति ल्यब्लोपे पञ्चमी ॥

(१०५) तृतीयस्य सौरभकं नौ भ्गौ ॥ २५ ॥

तृतीयस्येति ग्रहणात्तस्या उद्गताया एव अन्ये त्रय पादा गृह्यन्ते । तृतीयपादे तु विशेष । तृतीये पादे रेफनकार भकारगकारैर्दशाक्षराणि भवन्ति (२), तत् सौरभक नाम । तत्रोदाहरणम् ।

सगण जगण नगण लु० सगण सगण जगण गु०

। । ऽ । ऽ । । ऽ । । । । । ऽ । ऽ । । ऽ

विनिवारितोपि नयनेन, तदपि किमिहागतो भवान् ।

१ २ ३ ४ ५ ६ ७ ८ ९ १० १ २ ३ ४ ५ ६ ७ ८ ९ १०

रगण नगण भगण गु० सगण जगण सगण जगण गु०

ऽ । ऽ । । । ऽ । । ऽ । । ऽ । ऽ । । । ऽ । ऽ । ऽ

एतदेव तव सौरभकं, यदुदीरितार्थमपि नावबुध्यते(३) ॥

१ २ ३ ४ ५ ६ ७ ८ ९ १० १ २ ३ ४ ५ ६ ७ ८ ९ १०१११२१३

कादिविन्यासेन ग्रामाभावाद्दिष्टाक्षा भावान्यपि स्यात । अत्र स्जो स्लो इति भावाभ्यमिमयो यत्र चकारस्य मध्य इति मुद्रल न भवति ।

१ आद्यपदग्रहणमनुवर्त्तन इति ख०, पुस्तकान्तरपाठः ।

२ उद्गतायां यदा तृतीये पादे रनभगाभभभगमा इत्येते भवन्ती ति ग० ।

३ न बबुध्यसे इति ख० पुस्तकान्तर पाठः । अत्र तृतीयपादवर्ज्जिता अन्ये पादा

(१०९) ललितं नौ सौ ॥२६॥

तस्या एवोद्गतायास्तृतीयपादस्थाने यदा नौ सौ भवतस्तदा ललितं नाम वृत्तम्(१)। तत्रोदाहरणम् ।

सगण जगण सगण, ल० नगण सगण जगण गु०

I I S I S I I I S I I I I I I S I I I S

सततं प्रियम्वदमनूनममलहृदय गुणोत्तरम्(२)।

१ २ ३ ४ ५ ६ ७ ८ ९ १० १ २ ३ ४ ५ ६ ७ ८ ९ १०

नगण सगण नगण सगण नगण सगण सगण

I I I I I I I S I I S I I S I S I I I S

सुललितमतिकमनीयतनुं पुरुषं त्यजन्ति न तु जा-

१ २ ३ ४ ५ ६ ७ ८ ९ १० ११ १२ १३ १ २ ३ ४ ५ ६ ७ ८ ९

जगण गु०

I S I S

तु योषितः(*) ॥

१० ११ १२ १३

उद्गताख्यमाक्रान्ता, तृतीयम् नगणसगणनगणगुरुभिरपेतं । अत इदं सौरभकं नाम छन्दो बोध्यम् ।

१ ललितं नाम छन्दः इति ग० ।

२ गुणोन्नतमिति ग० ।

* अत्र तृतीयपादं विना अन्ये पादा उद्गतावदाक्रान्ताः, तृतीयपादश्च नगण-सगणाभ्यामपेतोऽपि, अत इदं ललितनामकं छन्दो बोध्यम् ।

(१३३) उपस्थितप्रचुपित प्रथमाद्यं म्सौ ज्भौ गौ, स्नौ ज्रौ ग्, नौ स्, नौ न् ज्यौ ॥ २७॥

यत्र प्रथमे पादे मकारसकारजकारभकारा गकारौ च भवतः, द्वितीये सकारनकारजकाररेफा गकारश्च, तृतीये नकारौ सकारश्च, चतुर्थे त्रयो नकारा जकारयकारौ च(१), तदुपस्थितप्रचुपितं नाम वृत्तं भवति। तत्रोदाहरणम्।

मगण भगण जगण भगण गु०गु० सगण नगण

S S S I I S I S I S I I S S I I S I I I

रामाकामकरेणुका(२) मृगायतनेत्रा, हृदयं हरति

१ २ ३ ४ ५ ६ ७ ८ ९ १० ११ १२ १३ १४ १ २ ३ ४ ५ ६

जगण रगण गु०

I S I S I S S

पयोधरावनम्रा।

७ ८ ९ १० ११ १२ १३

नगण नगण सगण नगण नगण नगण जगण यगण

I I I I I I I I S I I I I I I I I I I S I I S S

इयमतिशयसुभगा, बहुविधनिधुवनकुशला ललिताङ्गी ॥

१ २ ३ ४ ५ ६ ७ ८ ९ १ २ ३ ४ ५ ६ ७ ८ ९ १० ११ १२ १३ १४ १५

---

१ यत्र प्रथमे पादे मगणसगणजगणभगणा गकारौ च भवतो द्वितीये सगणनगणजगणरगणा गकारश्च तृतीये नगणौ सगणश्च चतुर्थे त्रयो नगणा जगणयगणौ चेति ग०।

२ कामकरेणुरिति क०, पुस्तकान्तरपाठश्च। कामुकरेणुके ति ग०।

पृथगाद्यमिति उद्गतामिकात. पठेदित्यनुवृत्तिनिरासार्थम्(१)।
अत्र तृतीयपादव्यवस्था मकारस्य विभज्य पाठनिर्वात्॥

(१२५) वर्द्धमानं नौ स्नौ न्सौ ॥२८॥

तृतीयस्येति वर्त्तते(२)। तस्मिन्नुपस्थितप्रचुमिते तृतीयस्य पादस्य स्थाने यदा नकारौ सकारनकारौ पुनर्नकारसकारौ(३) च भवतस्तदा वर्द्धमानं नाम वृत्तं भवति। तस्योदाहरणम्।

S S S I I S I S I S I I S S

बिम्बोष्ठी कठिनोन्नतस्तनावनताङ्गी

I I S I I I I S I S I S S

हरिणीशिशुनयना नितम्बगुर्व्वी।

I I I I I I I I S I I I I I I I S

मदकलकरिगमना परिणतशशिवदना

I I I I I I I I I I S I I S S

जनयति मम मनसि मुदं मदिराक्षी(४)॥

१ पठेदित्यनुवृत्तिनिरासार्थमिति स०, ठ०, पुस्तकान्तरपाठः।

२ तृतीयस्येत्यनुवर्त्तत इति म०।

३ यदा नगणौ सगणनगणौ नगणसगणाविति म०।

४ अस्य तृतीयपादभिन्ना अन्ये पादा उपस्थितप्रचुपितलक्षणाक्रान्ताः, तृतीय

(१०९) शुद्धविराडृषभं त्ज्रः ॥ २९ ॥

तस्मिन्नेव(१) उपस्थितप्रचुपिते यदा तृतीयस्य पादस्य स्थाने तकारजकाररेफा(२) भवन्ति, तदा शुद्धविराडृषभं नाम वृत्तं भवति । तस्योदाहरणम् ।

मगण　सगण　जगण　भगण. गु० गु०

S S S । । S । । S । S । । S S

कन्येयं कनकोज्ज्वला मनोहरदीप्तिः(३)

सगण　नगण　जगण　रगण　गु०

। । S । । । । S । S । S S

शशिनिर्मलवदना विशालनेत्रा ।

तगण　जगण　रगण

S S । । S । S । S

पीनोन्नतनितम्बशालिनी

नगण　नगण　नगण　जगण　यगण

। । । । । । । । । । S । । S S

सुखयति हृदयमतिशयं तरुणानाम्(४) ॥

पादस्, ममभमभगुरुणोऽस्मिन्, यस इद वर्द्धमान नाम च्छन्दो भवति । अथातो मचलय विषमवृत्तमिदम् ।

१ तस्मिन्नेवेति क० ।

२ तकारजकाररेफा इति क० ।

३ मनोहरमूर्त्तिरिति ख०, ग०, पुस्तकान्तरपाठः ।

४ अस्य तृतीयपादः उपस्थितप्रचुपितस्य...तृतीयस्, तत्र

(१८२) द्रुतमध्या भौ भ्गौ ग्, न्जौ ज्यौ ॥ ३२ ॥

यस्य प्रथमे पादे त्रयो भकारा गकारौ च, द्वितीये नकार जकारौ जकारयकारौ च(१) तद् द्रुतमध्या नाम वृत्तम्(२)। अत्रापि प्रथमद्वितीयाविव तृतीयचतुर्थौ पादौ(३)॥ तत्रोदाहरणम् ।

भगण भगण भगण गु॰गु॰ नगण जगण जगण यगण
S I I S I I S I I S S I I I I S I I S I I S S
यद्यपि शीघ्रगतिमृदुगामी,बहुधनवानपि दुःखमुपैति ।

भगण भगण भगण गु॰गु॰ नगण जगण जगण यगण
S I I S I I S I I S S I I I I S I I S I I S S
नातिशयत्वरिता न च मृद्वी,नृपतिगतिः कथिता द्रुतमध्या(४)॥

चतुर्थपादे पतितोऽस्ति। तस्मादेतदुपचित्रकनामकं छन्दो भवति। अत्र प्रथमतृतीययोर्द्वितीयचतुर्थयोः पादयोः साम्यादर्धसममिदम्। अत एवार्धसमवृत्ताधिकारे 'विषमे यदि सौ सलगा दले भौ युजि भाद्गुरुकावुपचित्रमिति छन्दोमञ्जरीवृत्तरत्नाकरयोरुक्तम्।

१ त्रयो भगणा गकारौ च भवन्ति, द्वितीये नगणजगणौ जगणो यगणश्चेति ग०। त्रयो भकारा गकारौ च द्वितीये नकारजकारौ ज्युगौ भवत इति ख०।

२ इदं भवतीति ख०, पुस्तकान्तरपाठश्च।

३ तत्रापि प्रथमतृतीयौ द्वितीयचतुर्थौ च पादौ सदृशौ भवत इति ग०। प्रथमद्वितीयाविव तृतीयचतुर्थौ पादौ भवत इति ख०।

४ अत्र दुःखमुपैतीत्यत्र 'ति' इति वर्णस्य पादान्तस्थत्वाद्गुरुत्वमापि[illegible] मित्याह। अत्रापि प्रथमतृतीययोर्द्वितीयचतुर्थयोश्च पादयोरेकाकारत्वादर्धसममिदम्। भत्रयमोजगतं गुरुणी चेद्युजि च नजौ ज्यजौ द्रुतमध्येति वृत्तरत्नाकरम्।

(१८३) वेगवती सौ स्गौ, भौ भ्गौ ग् ॥ ३३ ॥

यस्य प्रथमे पादे त्रयः सकारा गकारश्चैकः, द्वितीये भकारास्त्रयो(१) गकारौ च भवतः, तद्वेगवती नाम वृत्तम् । तत्रोदाहरणम् ।

सगण सगण सगण गु० भगण भगण भगण गु०गु०

I I S I I S I I I S S I I S I I S I I S S

तव पुङ्ख(२)नराधिप सेनां,वेगवतीं सहते समरेषु ।

सगण सगण सगण गु० भगण भगण भगण गु०गु०

I I S I I S I I S S S I I S I I S I I S S

प्रलयोर्म्मिमिवाभिमुखीं तां, कः सकलक्षितिभृन्निव हेषु(३)॥

(१८४) भद्रविराट् त्जौ गौ, स्जौ ज्गौ ग् ॥३४॥

यस्य प्रथमे पादे तकारजकारौ रेफगकारौ च, द्वितीये मकारसकारजकारा(४) गकारौ च, तद्भद्रविराट्(५) नाम ॥

तत्रोदाहरणम् ।

---

१ अथ सगणा भकारश्चैको द्वितीये भगणात्रय इति म० ।

२ तव पुङ्खेति ख०, अ० च ।

३ अथ समरेषु, निवहेषु, इत्युभयत्र पादान्तस्य लघोर्गुरुत्वातिदेशाद् दोषाभाव । अस्यापि गणास्तत्र प्रथमतृतीययोर्द्वितीयचतुर्थयो पादयो साम्यादर्द्धसमवृत्तमिदम् । अत एवार्द्धसमवृत्ताधिकारे, 'विषमे प्रथमाक्षरहीनं दोधकमेव हि वेगवती स्यादिति छन्दोमञ्जर्यां, मधुमाद्यत्युक विषमे चेद्भाविह वेगवती युजि भाद्गाविति वृत्तरत्नाकरे च पठित ।

४ तकारजकारौ रकारगकारौ च द्वितीये मकारसकारजकारा इति म० ।

५ भद्रविराड् न भद्रविराट् समसुखेनायिति ख० अ० च ।

तगण जगण रगण गु०

S S I I S I S I S S

यत्पादतले चकास्ति चक्रं

मगण सगण जगण गु०गु०

S S S I I S I S I S S

हस्ते वा कुलिशं सरोरुहं वा ।

तगण जगण रगण गु०

S S I I S I S I S S

राजा जगदेकचक्रवर्त्ती

मगण सगण जगण गु० गु०

S S S I I S I S I S S

स्याच्च भद्रविराट् समस्रुतेसौ(१) ॥

अस्योपच्छन्दसकान्तःपातित्वेऽपि विशेषसञ्ज्ञार्थमर्द्धसमाधिकारे पाठः ।

---

१ भद्र भद्रविराड् समस्रुतेसाविति ख०, ग०, पुस्तकान्तरपाठश्च । अत्रापि प्रथमतृतीययोर्द्वितीयचतुर्थयोश्च पादयोः साम्यादर्द्धसमवृत्तमिदम् । नामद्वयमस्य वर्त्तते, मात्रानियमपक्षे औपच्छन्दसकमिति गणनियमपक्षे भद्रविराडिति । वस्तुतस्तु पूर्व्वोक्तमार्क्कण्डेयैरित्यस्मिन्नौपच्छन्दसकोदाहरणेऽप्येते गणा घटन्ते, अनाद्ययुग्युक्पादयोश्चतुर्दशषोडशमात्रा जायन्ते । अत केवलं नाम्न्येव विशेषो न तु लक्षणे । ओजे तपरौ जरौ गुरुश्चेन् मसौ जगौ ग विराड् भवेद्भोज इति वृत्तरत्नाकरम् ।

(१८५) केतुमती स्जौ स्गौ, भ्रौ न्गौ ग् ॥३५॥

यस्य प्रथमे पादे सकारजकारौ सकारगकारौ च, द्वितीये भकाररेफनकारा(१) गकारौ च,(२) तत् केतुमती नाम वृत्तं भवति। तत्रोदाहरणम्।

सगण जगण सगण गु० भगण रगण नगण गु० गु०

। । ऽ । ऽ । । । ऽ ऽ ऽ । । ऽ । ऽ । । । ऽ ऽ

हृतभूरिभूमिपतिचिह्नां(३), युद्धसहस्रलब्धजयलक्ष्मीम्।

सगण जगण सगण गु० भगण रगण नगण गु० गु० ११

। । ऽ । ऽ । । । ऽ ऽ ऽ । । ऽ । ऽ । । । ऽ ऽ

सहते न कोपि वसुधायां, केतुमतीं नरेन्द्र तव सेनाम्(४)॥

(१८६) आख्यानिकी तौ ज्गौ ग्, ज्तौ ज्गौ ग् ॥ ३६ ॥

यस्य प्रथमे पादे तकारौ जकारौ गकारौ च, द्वितीये जकारतकारौ जकारौ(५) गकारौ च,(६) तदाख्यानिकी नाम वृत्तम्। तत्रोदाहरणम्।

---

१ सगणजगणौ सगणगकारौ च द्वितीये भगणरगणौ नगण इति ग०।

२ गकारौ च भवत इति ख०, पुस्तकान्तरपाठः।

३ हृतभूमिभूमिपतिचिह्नामिति ख०।

४ इदमर्धसमं वृत्तम्।

५ तगणौ जगणौ गकारौ च द्वितीये जगणतगणौ जगण इति ग०।

६ गकारौ च भवत इति ख०, ग०, पुस्तकान्तरपाठः।

तगण तगण जगण गु॰गु॰

S S I S S I I S I S S

मृङ्गावलीमङ्गलगीतनादै-

जगण तगण जगण गु॰ गु॰

I S I S S I I S I S S

र्जनस्य चित्ते मुदमादधाति।

तगण तगण जगण गु गु॰

S S I S S I I S I S S

आख्यानिकी च स्मरजन्मपाश(१)

जगण तगण जगण गु॰गु॰११

I S I S S I I S I S S

महोत्सवस्य श्रवणे(२) क्वणन्ती(३) ॥

आख्यानिकी वार्त्ताहारिकोच्यते।

---

१ जन्मपाशेति ख०, पुस्तकान्तरपाठः। जन्मपाशेतिपाठे शस्त इति पादान्तस्य शकारस्य गुरुत्वं बोध्यं। एवं मुदमादधातीत्यत्रापि पादान्तवर्णस्य गुरुत्वमतिदिश्यते।

२ महोत्सवस्य श्रवणे इति ख०, पुस्तकान्तरपाठः।

३यद्यपत्र मम, गणनोदेमम ह्रस्वमिदम्। एतामाख्यानकीमुपजातिमपि वदन्ति। यतोऽस्याः प्रथमतृतीयौ पादाविन्द्रवज्रालक्षणाक्रान्तौ, द्वितीयचतुर्थावुपेन्द्रवज्रालक्षण-क्रान्तौ। लक्षणं हि तयोः, स्यादिन्द्रवज्रा यदि तौ जगौ ग, उपेन्द्रवज्रा जतजास्ततो गाविति। अतएवेदमवधेयं, उपजातिरपि सत्यर्थले पुनः भिन्नप्रकरणम्, नामान्तरप्रख्यापनार्थम्। उपजातिप्रकारस्यैव इतीयं भेदः।

(८७) विपरीताख्यानिकी जतौ जगौ ग्, तौ जगौ ग् ॥ ३७ ॥

यस्य प्रथमे पादे जकारतकारौ जकारौ गकारौ च, द्वितीये तकारौ जकारो(१) गकारौ च,(२) तद्विपरीताख्यानिकी नाम वृत्तम् । तस्योदाहरणम् ॥

जगण तगण जगण गु०गु०
ध्यनन्तवालोकवचोभिरेभिः

तगण तगण जगण गु०गु०
स्वार्थं प्रिये साधय कार्य्यमन्यत् ।

जगण तगण जगण गु० गु०
कथं कथावर्णनकौतुक(३)स्या-

तगण तगण जगण गु०गु०
दाख्यानिकी चेद्विपरीतवृत्ति (४) ॥

---

१ जगणतगणौ जगणो गकारौ च द्वितीये तगणौ जगण इति ग० ।

२ गकारौ च भवत इति पुस्तकान्तरपाठः ।

३ कथावर्णनकौतुकमिति ख० ।

४ [illegible] [illegible] ॥ [illegible] । [illegible] पूर्वमुक्तमाख्यानकी [illegible] । [illegible] मा वा [illegible] । [illegible] भेदः ।

एतयोश्च वक्ष्यमाणोपजात्यन्तर्गतत्वेऽपि विशेषसञ्ज्ञार्थमर्द्धसमाधिकारे पाठः ।

(१८७) हरिणप्लुता सौ स्लौ ग्, न्भौ भ्रौ ॥३७॥

यस्य प्रथमे पादे सकारास्त्रयो लकारगकारौ च, द्वितीये नकारभकारौ भकाररेफौ च(१) तद्वृत्तं(२) हरिणप्लुतानाम । तस्योदाहरणम् ।

सगण सगण सगण ल गु॰
तव मुञ्च नराधिप विद्विषां(३)

नगण भगण भगण रगण
भयविवर्जितकेतुलघीयसाम्(४) ।

सगण सगण सगण ल॰ गु॰
रणभूमिपराङ्मुखवर्त्मनां

नगण भगण भगण रगण
भवति शीघ्रगतिर्हरिणप्लुता(५) ॥

१ द्वितीये नगणभगणौ भगणरगणौ चेति ग॰ ।

२ भवतस्तद्वृत्तमिति ख॰, ग॰ च ।

३ मुञ्च नराधिप विद्विषामिति ख॰, ग॰, पुस्तकान्तरपाठश्च ।

४ भयविसर्जितकेतिलघीयसामिति ग॰ ।

५ अस्याश्चमो नगणस्य प्रथमतृतीययोर्द्वितीयचतुर्थयोश्च पादयोः साम्यादर्द्ध-

(१८८) अपरवक्त्रं नौ र्लौ ग्, न्जौ ज्रौ ॥ ३८ ॥

यस्य प्रथमे पादे नकारौ रेफलकारगकाराश्च, द्वितीये नकारजकारौ जकाररेफौ च, (१) तद्वृत्तमपरवक्त्रं नाम(२)। तस्योदाहरणम्।

नगण नगण रगण ल०गु० नगण जगण जगण रगण

सकृदपि कृपणेन चक्षुषा, नरवर पश्यति यस्तवाननम्।

नगण नगण रगण ल०गु० नगण जगण जगण रगण

न पुनरपरवक्त्रमीक्षते, स हि सुखितोऽर्थिजनस्तथाविधः(३)॥

अथ वैतालीयान्तर्गतत्वेऽपि विशेषसंज्ञार्थमिहोपन्यासः ॥

(१८९) पुष्पिताग्रा नौ र्यौ, न्जौ ज्रौ ग् ॥ ३९ ॥

यस्य प्रथमे पादे नकारौ रेफयकारौ च, द्वितीये नकार-

मत वृत्तमिदम्। कस्य छन्दसः कतमौ भेदाविमौ पादाविव्याकाङ्क्षायां पादा-क्षरोपरि एकद्व्यादिदैर्घ्यक्रमेण पूर्वरीत्या विन्यस्तानामङ्कानां मध्ये एकाङ्कमिश्रित-लघुवर्णोपरिस्थिताङ्कस्तदुच्छन्दोभेदनिर्देशको भवति। एवं सर्वत्र वृत्तेषु बोध्यम्।

१ रेफौ च भवत इति ख०। पुस्तकान्तरपाठः।

२ नाम भवतीति ख०। पुस्तकान्तरपाठः।

३ चतुरलौ अपरस्य युजोऽयुजो पादयोः परस्परं साम्यादर्धसमं वृत्तमिदम्। अत्रायुक्पादयोश्चतुर्दशमात्राः, अन्ते रलगाः, द्वितीयतृतीययोश्चतुर्थपञ्चम्योश्च मात्र-योरेकत्वावस्थितिः। युक्पादयोः षोडशमात्राः, षष्ठीसप्तम्योश्च मात्रयोरेकत्र स्थिति-रस्ति। अत एव वैतालीयमपि भवति। यद्यप्यत्र युक्पादान्ते रलगा न पतिता

नकारौ नकाररेफौ यकारश्च तद्वृत्तं पुष्पिताग्रा नाम(१)। तत्रोदाहरणम्।

नगण　नगण　रगण　यगण

समसितदशना मृगायताक्षी

नगण　जगण　जगण　रगण　गु०

स्मितसुभग(२) प्रियवादिनी विदग्धा।

नगण　नगण　रगण　यगण

अपहरति नृणां मनांसि रामा

नगण　जगण　जगण　रगण　गु०

भ्रमरकुलानि लतेव पुष्पिताग्रा(३)॥

[illegible] मात्रा वैतालीयस्य [illegible] इति बोध्यम्। अत एव वैतालीये पुष्पिताग्रायाञ्च [illegible] छन्दोमञ्जरीकारः, [illegible] वैतालीये विपरीत इति छन्दोमञ्जरीकारः।

१ नकारस्य [illegible] पुष्पिताग्रा नाम भवतीति ख०। पुस्तकान्तरपाठः।

२ स्मितसुभगेति ख०। पुस्तकान्तरपाठः।

३ अस्याश्छन्दसः प्रथमतृतीययोर्द्वितीयचतुर्थयोः पादयोः मात्रासाम्यं च दृश्यते। अत्र प्रथमतृतीययोः पादयोः षोडशमात्रा, द्वितीयचतुर्थयोरष्टादशमात्रा। चतुर्थे पादे [illegible]। पुनश्च [illegible]

इयमप्यौपच्छन्दसिकान्तर्गता(१) विशेषसञ्ज्ञाज्ञापनार्थमथोच्यते।

(१८०) यवमती र्जौ र्जौ, ज्रौ ज्रौ ग् ॥ ४० ॥

यस्य प्रथमे पादे रेफजकारौ भूयोऽपि रेफजकारौ भवतः, द्वितीये जकाररेफौ पुनर्जकाररेफौ गुरुश्च(२), तद्वृत्तं यवमती नाम। अत्र सम्प्रदायात् पादव्यवस्था। तत्रोदाहरणम्।

रगण जगण रगण जगण
पद्मकान्तु कोमले करे विभाति

जगण रगण जगण रगण गु०
प्रशंस्य(१) मत्स्यलाञ्छनं पदे च(२) यस्याः।

जकारौ जकाररेफौ गकारश्च तद्वृत्तं पुष्पिताग्रा नाम[1]। तत्रोदाहरणम् ।

नगण नगण रगण यगण

समसितदशना मृगायताक्षी

नगण जगण जगण रगण गु०

स्मितसुभग[2] प्रियवादिनी विदग्धा ।

नगण नगण रगण यगण

अपहरति नृणां मनांसि रामा

नगण जगण जगण रगण गु०

भ्रमरकुलानि लतेव पुष्पिताग्रा[3] ॥

यथाच्चैकदेशविकृतमनन्यवदितिन्यायेन मात्र वैतालीयत्व बोध्यते इति बोध्यम्। अत एव वैतालीये पुष्पिताग्राया अन्तर्भाव इति छन्दोमञ्जरीकारः, तदन्यपरम् मात्र वैतालीये विधानं इति हलायुधटीकाकारः ।

१ जकारश्च भवति तद्वृत्तं पुष्पिताग्रा नाम भवतीति च० । पुस्तकान्तरपाठः ।

२ स्मितसुभगेति च० । पुस्तकान्तरपाठः ।

३ पुष्पिताग्रायां नगणस्य प्रथमतृतीययोर्द्वितीयचतुर्थयोः पादयोः साम्यादेव च इत्थमिदम् । अत्र प्रथमतृतीययोः पादयोः षोडशमात्राः, द्वितीयचतुर्थयोरष्टादशमात्राः । चतुर्थे पञ्चमीय मात्रयोर्मध्ये कथावस्थितिः । पुनश्च प्रतिपादितं पदद्वये,

इदमप्यौपच्छन्दसकान्तर्गतं(१) विषमवृत्ताधिकारादर्धसमं नोच्यते ।

(१०) यवमती र्जौ र्जौ, ज्रौ ज्रौ ग् ॥ ४० ॥

यस्य प्रथमे पादे रेफजकारौ भूयोऽपि रेफजकारौ भवतः द्वितीये जकाररेफौ पुनर्जकाररेफौ गुरुश्च(२), तद्वृत्तं यवमती नाम। अत्र सम्प्रदायात् पादव्यवस्था। तस्योदाहरणम् ॥

रगण　जगण　रगण　जगण
पद्मकान्तु कोमले करे विभाति

जगण　रगण　जगण　रगण　गु०
प्रशंस्य(३) मत्स्यलाञ्छनं पदे च(४) यस्याः ।

रजगौ समुद्दिष्टौ च पतितमपि। अत्र इदमौपच्छन्दसकमिति न भवति। प्रथमोदाहरणस्य लघुगुरुत्वं यथा—

रगण गु०ल०गु०　जगण ल०गु०ल०　रगण गु०ल०गु०　जगण ल०गु०ल०

सा घनपयोधरा, कामिनी विदग्धा, का भवाप्ति राज्ञा, तेन पुष्पिताग्रा इति।
अत एवात्र "इदमप्यौपच्छन्दसकान्तर्गतं" इत्युक्तम्। पुष्पिताग्रादिवत् वैतालीयच्छन्दसिकं न चेति हलायुधकारेणोक्तम्।

१ चौपच्छन्दसकान्तर्भूतेति ख०। पुस्तकान्तरपाठः।

२ रेफजकारौ च भवतः। द्वितीये च जकाररेफौ भूयोऽपि जकाररेफौ गकारश्च भवतीति ख०। पुस्तकान्तरपाठः।

३ प्रशस्येति ख०। पुस्तकान्तरपाठः।

४ तथा चेति ख०। पुस्तकान्तरपाठः।

अभिमत(१) वकुलकुसुमघनपरिमलमिलदलिमुखरितहरिति मधौ

सहचरमलयपवनरयतरलितसरसिजरजसि शचतरणिवितते(२)।

विकसितविविधकुसुमसुलभसुरभिशरमदननिहितसकलजने।

ज्वलयति मम हृदयमविरतमिह(३) सुतनु तव विरहदहनविषमशिखा(४)॥

(१९१) खञ्जा मद्दल्ययुजीति ॥ ४२ ॥

इयमेव शिखा पूर्व्वोक्ता महति बह्वक्षरे पादे अयुजि सति पारिशेष्यादितरस्मिन्(५) युजि सति खञ्जा नाम छन्दो भवति। अयमर्थः, एकत्रिंशदक्षरो विषमः पादः कर्त्तव्यः, एकोनत्रिंशदक्षरश्च समः पादः। शेषं यथाप्राप्तमेव। तत्रोदाहरणम्।

---

१ अभिनवेति ख०। पुस्तकान्तरपाठः।

२ रजसि मनसिजयवितनेति ख०। पुस्तकान्तरपाठः।

३ हृदयमतिशयमिहेति ख०, ग०। पुस्तकान्तरपाठः।

४ अत्र प्रथमतृतीयौ पादावेकोनत्रिंशदक्षरौ द्वितीयचतुर्थावेकत्रिंशदक्षरौ, अतोऽत्र मम हृतमिदम्। चतुर्थाध्यायस्य द्विचत्वारिंशत्सूत्रात् चूलिकालक्षणं प्राय सर्वं घटते। केवलमेकमात्राधिक्यम्। शिखायाः पादचूलिकायाः सर्वं भवति। तथा सत्येकस्याः शिखायाः चूलिकायाः द्विरावृत्तिर्जायते।

५ पारिशेष्यादन्यस्मिन्निति ख०।

रगण जगण रगण जगणः

सा यवान्विता भवेद्धनाधिका च

जगण रगण जगण रगण गु०

समस्तबन्धुपूजिता प्रिया च पत्युः(१) ॥

यवान्विता यमवतीत्यर्थः ।

(१८१) शिखैकोनत्रिंशदेकत्रिंशदन्ते ग् ॥ ४१ ॥

यस्य प्रथमे पादे एकोनत्रिंशदक्षराणि,(२) द्वितीये चैकत्रिंशत्, द्वयोरपि पादयोरन्ते प्रत्येकं गुरुः,(३) तद्वृत्तं शिखा नाम। अत्राधिकाराद्द्वितीयमप्यर्द्धं तादृशमेव। अन्ते गिति नियमार्थमेतत्। अन्ते एव गुरुर्नान्यत्र। तेनायुक्पादेऽष्टाविंशतिरक्षराणि लघून्यन्ते गुरुरेकः(४)। युक्पादे त्रिंशल्लघवोऽन्ते गुरुः(५)। तत्रोदाहरणम्।

---

१ प्रिया च भर्तुरिति ख०। पुस्तकान्तरपाठः। अक्षरतो गणतश्च प्रथमतृतीययोर्द्वितीयचतुर्थयोश्च पादयोः साम्यादर्द्धसमं वृत्तमिदम्।

२ एकोनत्रिंशदक्षराणि भवन्तीति ख०। पुस्तकान्तरपाठः।

३ प्रत्येकं गकार इति ख० ग०, पुस्तकान्तरपाठः।

४ अष्टाविंशतिर्लघवोऽन्ते गुरुश्चैक इति ख०, ग०, पुस्तकान्तरपाठः।

५ गुरुश्चान्ते भवतीति ख०, ग०, पुस्तकान्तरपाठः।

अभिमत(१) वकुलकुसुमघनपरिमलमिलदलिमुखरित-हरिति मधौ

सहचरमलयपवनरयतरलितसरसिजरजसि शचतर-णिविनते(२)।

विकसितविविधकुसुमसुलभसुरभिशरमदननिहितस-कलजने।

ज्वलयति मम हृदयमविरतमिह(३) सुतनु तव विर-हदहनविषमशिखा(४)॥

(१८१) खञ्जा मद्दलयुजीति ॥ ४२॥

इयमेव शिखा पूर्व्वोक्ते महति वह्वचरे पादे अयुजि सति पारिशेष्यादितरस्मिंश्च(५) युजि सति खञ्जा नाम छन्दो भवति। अयमर्थः, एकत्रिंशदचरो विषमः पादः कर्त्तव्यः, एकोनत्रिंशदचरश्च समः पादः। शेषं यथाप्राप्तमेव। तत्रोदाहरणम्।

---

१ अभिनवेति ख०। पुस्तकान्तरपाठश्च।

२ रजसि मनसिजशरनिवहनतेति ख०। पुस्तकान्तरपाठश्च।

३ हृदयमतिशयमिहेति ख०, ग०। पुस्तकान्तरपाठश्च।

४ अत्र प्रथमतृतीयौ पादावेकोनत्रिंशदचरौ द्वितीयचतुर्थावेकत्रिंशदचरौ, अतोऽदसम वृत्तमिदम्। चतुर्थाध्यायस्य द्विचत्वारिंशत्सङ्ख्याक चूलिकालचणमत्र प्राय सर्व्वं घटते। केवलमेकमात्राधिक्यम्। शिखाया पादचूलिकायां कदं भवति। तथा सत्येकस्यां शिखायां चूलिकाया द्विरावृत्तिर्जायते।

५ पारिशेष्यादन्यस्मिन्निति ख०।

अपगतघनविशददशदिशि हृतजनदृशि परिणतकणकपिलकलमे

प्रविकसितसमकुसुमभवपरिमल(१)सुरभितमहति शरदि समये।

शुचिशशिमहसि विवृतसरसिरुहि(२) मुदितमधुलिहि विमलितधरणितले

किमपरमिह कमलमुखि सुखमनुभवति मम हृदयकमलमधुना ॥

अर्धसमवृत्ताधिकारो निवृत्तः ॥

इति भट्टहलायुधविरचितायां छन्दोवृत्तौ

पञ्चमोऽध्यायः ॥ ५ ॥

---

१ प्रविकसदसमकुसुमभवेति ख०, पुस्तकान्तरपाठश्च ।

२ स्फुरितसरसिरुहीति ख०। पुस्तकान्तरपाठः। विगतसरसिरुहीति ग०।

(१९३) यतिर्विच्छेदः ॥ १ ॥

विच्छिद्यते विभज्यते पदपाठोऽस्मिन्निति(१) विच्छेदो विश्रामस्थानं, स च यतिरित्युच्यते। नन्वत्र(२) शास्त्रे यतिशब्देन व्यवहारादर्शनान्निरर्थकं सञ्ज्ञाकरणम्। नैष दोषः। यतिरित्यागमादिष्वाचार्यपारम्पर्यागता(३) सञ्ज्ञेयं तनुमध्यादिवत्। तस्याः शिष्यव्युत्पत्त्यर्थमर्थकथन(४) यतिर्विच्छेद इति, तस्माददोष इति। अस्ति च लोके शास्त्रान्तरेषु(५) च यतिसञ्ज्ञाव्यवहारः। अपि च अथ यतिरित्यधिकारः(६) आसप्तमाध्यायपरिसमाप्तेः समुद्रेन्द्रियरसादित्यादिषूपतिष्ठते(७)। समुद्रादिशब्दाः साकाङ्क्षत्वाद् यतिरित्यनेनैव सम्बध्यन्ते। यतिशब्दस्याधिकरणव्युत्पत्त्या समुद्राद्यवच्छिन्नेष्वक्षरेषु यतिः कर्त्तव्या इत्यर्थः(८)। सिद्धाति अत्रैषा(९) वस्तूपदेशोपनिषद् भवति।

यतिः सर्व्वत्र पादान्ते श्लोकार्द्धे तु विशेषतः।
समुद्रादिपदान्ते च व्यक्ताव्यक्तविभक्तिके ॥

---

१ पाठोऽस्मिन्निति ग०।

२ नन्वस्मिन्निति ग०।

३ यतिरित्यनादिराचार्यपारम्पर्यागतेति ख०, पुस्तकान्तरपाठश्च। यतिरित्येवमादिराचार्यपरम्परागतेति ग०।

४ शिष्यव्युत्पत्तयेऽर्थकथनमिति ख०, पुस्तकान्तरपाठश्च। शिष्यव्युत्पत्त्यर्थं कथनमिति ग०।

५ लोके शास्त्रे इति ग०।

६ अथ यत्यधिकार इति ग०।

७ समुद्रेन्द्रियरसादिनिर्द्देशेषूपतिष्ठते इति ख०, पुस्तकान्तरपाठश्च।

८ इत्ययमर्थ इति ख०, पुस्तकान्तरपाठश्च।

९ तत्रैषेति ख०।

क्वचित्तु पदमध्येऽपि समुद्रादौ यतिर्भवेत् ।
यदि पूर्व्वापरौ भागौ न स्यातामेकवर्णकौ ॥
पूर्व्वान्तवत् स्वरः सन्धौ क्वचिदेव परादिवत् ।
द्रष्टव्यो यतिचिन्तायां यणादेशः परादिवत् ॥
नित्यं प्राक्पदसम्बन्धाश्चादयः प्राक्पदान्तवत् ।
परेण नित्यसम्बन्धाः प्रादयश्च परादिवत् ॥

"यतिः सर्व्वत्र पादान्ते" इत्यस्योदाहरणम् । विशुद्धधाम-देहायेत्यादि ।
तस्यैव प्रत्युदाहरणम् ।

नमस्तस्मै महादेवाय शशाङ्कार्द्धधारिणे(१) ।

इत्येवमादि । "श्लोकार्द्धे तु विशेषतः" इत्यत्र सन्धिकार्य्याभावात्(२) स्पष्टविभक्तिकत्वाच्च(३) विशेषः । तस्योदाहरणम् ।

नमस्यामि सदोद्भूत-मिन्धनीकृतमन्मथम् ।
ईश्वराख्यं परं ज्योतिरज्ञानतिमिरापहम्(४) ॥

---

१ पादादियतेरुदाहरणं, नम इति । अत्र प्रथमपादान्तभूते 'वा'कारे विश्लेष विरामे कष्टतया उच्चारणकारस्यैवमनुभावस्य जायते । अतो द्वितीयपादाद्यक्षरे 'थका' रे यतिः । एतदपि पूर्व्वस्य प्रत्युदाहरणे बोध्यम् । अत्र पादान्तभूते आकारे यतौ सत्यां पादान्तयतिकस्य विशुद्धधामदेहायेत्यस्य नम इत्येष श्लोकः प्रत्युदाहरणं न भवतीति भावः ।

२ सन्धिकार्य्याभाव इति ख०, ग०, पुस्तकान्तरपाठः ।

३ स्पष्टविभक्तिकत्वेति ख०, ग०, पुस्तकान्तरपाठः ।

सन्धिकार्य्यस्याभावे स्पष्टविभक्तिकत्वे च यतिसौकर्य्यं । एतच्च श्लोकार्द्धे सर्व्वत्र विशेषेण घटत इति भावः ।

४ पदमध्ये पादान्ते समासे यतिः कथं न स्यात् । तथापि समस्तमेकमादाय

अत्रेश्वरास्यमित्यस्य पूर्व्वमकारेण सह योगो न कर्त्तव्यः(१)। समासे प्रत्युदाहरणम्।

सुरासुरशिरोरत्नस्फुरत्किरणमञ्जरी,—

पिञ्जरीकृतपादाब्जद्वन्द्वं वन्दामहे शिवम्(२)॥

"समुद्रादिपदान्ते च व्यक्ताव्यक्तविभक्तिके" तत्र श्रूयमाणविभक्त्यन्तं व्यक्तविभक्तिकम्। समासान्तर्भूतविभक्त्यन्तं(३) अव्यक्तविभक्तिकम्। तयोरुदाहरणम्(४)।

यश्चक्रे जनकतनया,-स्नानपुण्योदकेषु इत्यादि(५)।

"व्यक्ताव्यक्तविभक्तिके" इति यतिः सर्व्वत्र पादान्त इत्यनेन सम्बध्यते। तयोरुदाहरणम्।

विभक्तिकपादान्तस्थले तु श्लोकार्द्ध एव यतिः कर्त्तव्येत्युपदेशः। एतेन व्यक्तविभक्तिकस्थले पादान्ते यतिर्न शोभत इति फलितम्।

१ यथा पादान्तभूतस्य हलुवर्णस्य परस्वरेण सह संयोगस्तथा पूर्वार्द्धान्तभूतस्य सम्यमित्यस्यान्तिमस्य मस्य परार्द्धादिभूतेन ईश्वरास्यमित्यस्यैकारेण सह संयोगो न कर्त्तव्य इत्यर्थः। 'सम्यम्' इत्यत्रैव यतिनिबन्धनो विश्रामः कर्त्तव्यः।

२ अत्र पूर्वार्द्धस्य परार्द्धेन सह समस्यमानत्वेनास्पष्टविभक्तिकत्वात् पूर्वार्द्धान्ते मञ्जरीत्यत्र न यतिः। अपितु तदेव द्वितीयार्द्धान्ते यतिः। अत एवेदं पूर्वोदाहरणप्रत्युदाहरणमिति भावः।

३ समासान्तर्भूतविभक्तिकमिति पुस्तकान्तरपाठः, ख०, ग० च।

४ तयोरुभयोरुदाहरणमिति पुस्तकान्तरपाठः।

५ यश्चक्रे इति मन्दाक्रान्तावृत्तम्। अस्य सप्तदशाक्षरः पादः। तत्र प्रथमं चतुर्थाक्षरे यतिः, ततः षष्ठाक्षरे, ततः सप्तमाक्षरे। अत्र षष्ठाक्षरे या यतिः, सा अव्यक्तविभक्तिकस्थला। जनकतनयेत्यस्य परपदेन समस्यमानत्वात्। अत्रेदं ध्येयम्, मन्दाक्रान्ताशिखरिण्यादिषु अबध्यादियतिस्थलोक्तिमत्सु कतिपयेषु वृत्तविशेषेषु

वशीकृतजगत्कालं कण्ठेकालं नमाम्यहम् ।
आदिनन्दा(१) कलाशेष,-शशिलेखाशिखामणिम्(२) ॥

अपि च ।

नमस्तुङ्गशिरश्चुम्बि,-चन्द्रचामरचारवे ।
त्रैलोक्यनगरारम्भ,-मूलस्तम्भाय शम्भवे ॥

" क्वचित्तु पदमध्येऽपि समुद्रादौ यतिर्भवेत् ।
यदि पूर्व्वापरौ भागौ न स्यातामेकवर्णकौ ॥ "

तत्रोदाहरणम् ।

पर्य्याप्तं तप्तचामी,-करकटकतटे श्लिष्टशीतेतरांशौ इत्यादि(३) ॥

तथा । कूजत्कोयष्टिकोला,-हलमुखरभुवः प्रान्तकान्तारदेशाः, इत्यादि ।

अवधिमतरेवादौ यतिः, अनुष्टुबिन्द्रवज्रादिषु कतिपयेषु वृत्तविशेषेषु पादान्त एव यतिर्भवतीति । यतिनियमाऽभावे छन्दसां स्वाभाविकी प्रकृतिरेव नियामिका बोध्या ।

१ महाकालमिति क०, ख०, पुस्तकान्तरपाठः ।

२ अत्र प्रथमपादान्ते द्वितीयाविभक्तिकपदस्य, तृतीयपादान्ते॰ चतुर्थीविभक्तिकपदस्य यतिर्ज्ञेया । नमस्तुङ्गेत्यत्र तु प्रथमतृतीयपादान्ते चतुर्थीविभक्तिकपदस्यैव यतिः ।

३ अत्रोदाहृते पादमध्ये प्रतिषष्ठमात्रायां यतिर्भवति, तन्नियमानुसारेण यतौ कर्त्तव्यायां तप्तचामीकरपदमध्ये 'मी'कारे यतिः । तथा कूजदित्यत्र कोलाहलपदमध्ये षष्ठमात्रायां 'हा'कारे यतिः, तथा दाप इति दृष्टे भ्रान्तकान्तारपदमध्ये षष्ठमात्रायां 'ना'-कारे यतिः । पुनरन्यदा पैरिलग्नानामिति दृष्टे उत्तरितपदमध्ये षष्ठमात्रायां 'ता'कारे यतिर्ज्ञेया ।

तथा। हासो हस्ताग्रसंवा,-हनमपितुलिता,-द्रीन्द्रसार-द्विपोसौ, इत्यादि।

वैरिञ्चानां तथोच्चा,-रितरुचिरऋचाञ्चाननानाञ्चतुर्णाम्, इत्यादि(१)।

पञ्चे(२) पानीयमाञ्चा,-दयति च(३) मद्दियं पक्षपाती पृथक्क(४) इत्यादि।

समुद्रादाविति किं। पदमध्ये(५)यतिः पादान्ते माभूत्। तद्यथा।

प्रणमत भवबन्धक्लेशनाशाय नारा,-यणचरणसरोजद्वन्द्वमानन्दहेतुम्(६)। इत्यादि।

पूर्व्वोत्तरभागयोरेकाक्षरत्वे तु यतिर्दुष्यति(७)। तत्रोदाहरणम्।

---

१ तथोच्चारितरुचिरगिरामाननानां चतुर्णामित्यादीति ख०, ग०, पुस्तकान्तरपाठः।

२ पङ्के इति ख०, ग०, पुस्तकान्तरपाठः।

३ आछादयति चेति ख०, पुस्तकान्तरपाठः।

४ पृथक्क इति ख०, ग०, पुस्तकान्तरपाठः।

५ पदमध्येपीति पुस्तकान्तरपाठः।

६ समुद्रादिपदादौ तु पदमध्येपि यतिर्भवति, यद्येतन्नोच्यते, तर्हि पदान्तत्वापेक्षिता यतिः 'क्लेशनाशाय नारा' इत्यादावपदान्तभूते पदमध्यस्थपादान्ते यतिर्माभूदत समुद्रादाविति वक्तव्यमिति भावः।

७ एकाक्षरत्वे तु पदमध्ये यतिर्दुष्यतीति ख०, ग०, पुस्तकान्तरपाठः।

यदक्षरं यत्युत्तमङ्ग्याप्यपूर्त्यर्थं पूर्वेन समास्यते, शब्दाक्रम्यादमायं च पन्त

एतस्या ग,-च्छतलममलं गाहते चन्द्रकचमित्यादि(१)।
एतस्या रा,-जति सुमुखमिदं पूर्णचन्द्रप्रकाशमित्यादि।
तथा। सुरासुरशिरोनिघृष्टचरणारविन्दः शिव इत्यादि।

"पूर्वान्तवत् स्वरः सन्धौ क्वचिदेव परादिवत्"। अस्यार्थ, योऽयं पूर्वपरयोरेकादेशः स्वरसन्धौ विधीयते, स क्वचित् पूर्वस्यान्तवद् भवति, क्वचित् परस्यादिवत्। तथा च पाणिनि-स्मरणं(२), अन्तादिवच्चेति (६।१।८५)। तत्र पूर्वान्तवद्भावे उदाहरणम्।

स्यादस्थानो,-पगतयमुनासङ्गमे वाभिरामा जम्भाराती-भकुम्भोद्भवमिव दधत इत्यादि(३)। (मे० दू०)

समाख्यते, एतादृशैकाक्षरस्थलाश्रिता यतिर्दुष्यति, कष्टेन सम्पाद्यते इति च तदर्थः। तथाहि एतस्या इति मन्दाक्रान्ताछन्दसि चम्बुधियतिपूर्वापरभागयोरेकाक्षरभूते 'गच्छ'शब्दस्य 'ग'कारे चम्बुधिभिः (४) विहिता यतिः कष्टेन सम्पाद्यते। एतस्याराजति इत्यत्र चतुर्थवर्णविच्छेदे 'रा'कारे, तथा, सुरासुरशिरोनिघृष्टेत्यत्र षष्ठवर्णविच्छेदे 'घृ'कारे च यतिः कष्टेन साध्यते। अतो दुष्टेयमो यतिः। एवं सर्वत्र ज्ञेयम्।

१ चन्द्रकचामित्यादीति ख०, पुस्तकान्तरपाठः।

२ पाणिनिव्याकरणमिति ख०, ग० च।

३ 'स्यादस्थानो' इत्यत्र चतुर्थवर्णविच्छेदे 'नो'कारे पदमध्यस्थापि यतिरोकारस्य पूर्वान्तवद्भावेन पूर्वपदचरमीभूताकारावयवस्य ओकारात् पदान्तवदेवेयमिति सम्यते। एवं द्विदशाक्षरविच्छेदेऽप्यत्रापि दीर्घादेशस्य पूर्वान्तवद्भावेन पदान्तवद्भूते पादान्ते 'भो'कारे यतिर्बोध्या। एवं त्रिमुनियतियुक्ते स्रग्धराछन्दसि स्याद्विनोर्ध्व प्रयाप्सून् इत्यत्र च ख्याकारे दीर्घादेशस्य परादिवद्भावः। पूर्वपदावयवस्यापि 'ख्या' इत्यत्र अन्तर्विच्छिन्नवर्णावयवस्य परत्वसम्पादकत्वात्। एवं कस्यकेऽपि अन्यत्रापि बोध्यम्।

दिक्कालाद्यनवच्छिन्ना,-नन्तचिन्मात्रमूर्त्तये।

स्वानुभूत्येकमानाय नमः शान्ताय तेजसे॥ इत्यादि।

परादिवद्भावे उदाहरणम्।

स्कन्धं(१) विन्ध्याद्रिबुध्या, निकषति महिष,-स्याहितोऽस्त्त प्रयास्यन्निति(२)।

शृङ्गं शृङ्गलन्तु गाढं, प्रहर हरदृपी,-केशकेशोऽपि चक्रस्यक्रेणाकारि किं नः(३) इत्यादि॥

अत्र हि स्वरूपस्य(४) परादिवद्भावे व्यञ्जनमपि तद्भक्तत्वात् तदादिवद् भवति। "यदि पूर्व्वापरौ भागौ न स्यातामेकवर्णकौ" इत्यन्तादिवद्भावविधावपि(५) सम्बध्यते। तेनास्यावक्ताङ्गमवर्जितमूर्येन्दुशोभं विभातीत्येवम्विधा यतिर्न भवति।

यणादेशः परादिवदित्यस्योदाहरणम्।

विततघनतुषार(६)क्षोदशुभ्रांशुपूर्णा,-स्वविरलपद्ममालां(७)श्यामलामुल्लिखन्त इत्यादि(८)।

---

१ स्कन्धे इति ग०।

२ महिषस्याहितोऽमूनयासीदित्यादीति ख०, पुस्तकान्तरपाठश्च। महिषस्याहितोऽस्त्तयासीदित्यादीति ग०।

३ वक्त्रस्यक्रेणाकारि किम्नो इति ख०, पुस्तकान्तरपाठश्च।

४ तत्र हि स्वरस्येति ख०, ग० च। अत्र हि स्वरस्येति पुस्तकान्तरपाठः।

५ इत्यन्त्यादिवद्भावविधावपीति पुस्तकान्तरपाठः। इत्यन्तवद्भावविधावपीति ग०।

६ जतुतुषारेति पुस्तकान्तरपाठः।

७ स्वविरलपद्ममालामिति पुस्तकान्तरपाठः।

८ षष्ठसप्तमयत्यवच्छिन्ने मालिनीच्छन्दस्यत्र 'पर्णाम्' इत्येतस्याङ्गे यणादेशस्य परा-

"नित्यं प्राक्पदसम्बन्धाश्चादयः प्राक्पदान्तवत्" तेभ्यः पूर्वा यतिर्न कर्त्तव्येत्यर्थः। तत्रोदाहरणम्।

स्वादु स्वच्छं सलिलमपि च प्रीतये कस्य न स्यादिति(१)।

नित्यं प्राक्पदसम्बन्धा इति किम्। अन्येषां पूर्वपदान्तवद्भावो माभूत्(२)। तद्यथा।

मन्दायन्ते न खलु सुहृदामभ्युपेतार्थकृत्या इति(१)। (मे०दू०)

तथा, इत्यौत्सुक्यादपरिगणयन् गुह्यकस्तं ययाचे इत्यादि (मे०दू०)

"परेण नित्यसम्बन्धाः प्रादयश्च परादिवत्" तेभ्यः परा यतिर्न भवतीत्यर्थः। तत्रोदाहरणम्।

द्विवद्भावविधानात् छन्दःपादेऽस्य 'स' इत्यस्य परेण सम्बन्धात् पदान्तवद्विरता यतिरत्र जाता। अत एतेषां प्रादयस्यापि पदमध्ये यति कर्त्तव्या भवतीत्युपदेशः।

१ 'स्वादु' पदमध्यस्थ्यवच्छिन्ने मन्दाक्रान्ताच्छन्दस्यत्र सलिलमपि च एतद्ग्रहणस्थले 'च'कारात्पूर्वं यतिर्न जाता। एतेन यत्र कुत्रचित् पदे चाद्यस्तथा स्थाप्या यथा तेभ्य पूर्वं यतिर्न कर्त्तव्याभवेदित्युपदेशः।

२ अन्येषां चादिभिन्नानामव्ययानां तु पूर्वपदान्तवद्भावो न कर्त्तव्य इत्यर्थः। एतेन तेषामादिवद्भावे तु न निषेध कृतो भवति। तस्माद् यत्र कुत्रचित्पदे पदान्ते चाद्यन्याव्ययानि तथा स्थाप्यानि यथा तेषां पूर्वपदान्तवद्भावो न भवेदित्युपदेशः। तथा हि मन्दायन्त इति मन्दाक्रान्ताछन्दे चाद्यन्यस्य नेत्यव्ययस्य मन्दायन्ते इति पूर्वपदेन पदान्तवद्भावो न कृत। तथा अपरिगणयन्नित्यत्र परीत्यव्ययस्य पूर्वपदेन न सम्बन्धोऽपि तु परपदेन।

१ इत्या इत्यादीति ख०, ग० च।

दुःखं मे प्रक्षिपति(१) हृदये दुःसहस्त्वद्वियोग इति(२)।

परेण नित्यसम्बन्धा इति किम्। कर्मप्रवचनीयेभ्यः परापि यतिर्यथा स्यादिति। तत्रोदाहरणम्।

प्रियं प्रतिस्फुरत्पादे मन्दायन्ते न खल्विति(३)।

श्रेयांसि बहुविघ्नानि भवन्ति महतामपि॥ इति(४)।

अयन्तु चादीनां प्रादीनाञ्चैकाचराणामनेकाचराणां वा पदान्ते यतावन्तादिवद्भाव इष्यते। नत्वेकाचराणां(५) पादमध्ये यतौ(६)। तत्र हि पदमध्येऽपि चामीकरादिष्विव यतेरभ्यनुज्ञात त्वात्। तत्र चादीनामुदाहरणम्।

प्रत्यादेशादपि च मधुनो विस्मृतभ्रूविलासमिति(७)।

प्रादीनामुदाहरणम्।

दूरारूढप्रमोदं हसितमिव परिस्पष्टमाश्वासखीभिरित्यादि(८)।

---

१ प्रक्षिपतीत्यत्र मन्दाक्रान्तामात्रिकमेवाम्बुधावच्छिन्ने वैत्यचरे प्रथमेपि यति पर स्वरेणैव क्रियते। अपितु प्रत्युपमद विपरीतत्वेन सरेशोभावद्वै।

२ इत्यादीति क०, ग०, पुस्तकान्तरपाठः।

३ मन्दन्निव इति ग० पुस्तकान्तरपाठः।

४ अत्र नत्विनीत्यत्र महतामपीत्यत्र च कर्मप्रवचनीयेभ्यः परा यतिर्ज्ञाता।

५ नत्वनेकाचराणामिति ख०।

६ पादमध्ययताविति ख० पुस्तकान्तरपाठः। पदमध्ये इति ग०।

७ विस्मृतभ्रूवनामित्यादीति पुस्तकान्तरपाठः।

८ परिस्पष्टमाश्वासखीभिरित्यादीति पुस्तकान्तरपाठः।

न पर्य्यन्तोऽस्ति वृत्तानां प्रस्तारगणनाविधौ।
पूर्व्वाचार्य्यकृतं वृत्तचिह्नं(१) किञ्चिदिहोच्यते।

तत्र गायत्रे छन्दसि वृत्तम्।

(१८३) तनुमध्या त्यौ ॥ २ ॥

यस्य पादे तकारयकारौ(२), तत्तनुमध्या नाम वृत्तं। तदोदाहरणम्।

तगण यगण तगण यगण

धन्या त्रिषु नीचा, (३)कन्या तनुमध्या।
४ ८ (१२)

तगण यगण तगण यगणः

श्रोणीस्तनगुर्वी, भूयात् पतिभोग्या(४) ॥

---

१ पूर्वाचार्यकृताभिज्ञाचिह्नमिति ग०, पुस्तकान्तरपाठः। एकाक्षरादिषड्विंशत्यक्षरपादानां वृत्तानां प्रस्तारेण बहव एव भेदा जायन्ते इति सत्यमपि तु न तेषां सर्वेषामेव नामोल्लेखपूर्वकं प्रयोगः कुत्रापि पूर्वाचार्यैः कृतो दृश्यते। दृश्यते तु तेषां प्रत्येकछन्दःप्रस्तारभेदानां मध्ये कतिपयानां प्रसिद्धभेदानामेव। अतस्तेषामेवात्र नामोल्लेखपूर्वकं संग्रहः क्रियत इति स्पष्टार्थः। स्वेच्छया कोऽपि नामोल्लेखविहीनस्य कस्यापि वृत्तभेदस्य प्रयोगं कर्तुमीहेत यर्हि तत्र न कोऽपि निषेधः। पुनश्च प्रस्तारक्रियाविधिप्रचारात् प्रमाणाभाव इत्यपि वक्तुं न शक्यते। अतोऽत्र कवेरिच्छावकाशो भूयानेव प्रदर्शितोऽस्तीत्यपि स्मरणीयम्।

२ तगणयगणौ भवत इति ख०, ग० च। तकारयकारौ भवत इति पुस्तकान्तरपाठः।

३ दिवभोरिति ख०, ग० च।

४ उर्वीपतिभोग्येति ख०, ग० च। यतोऽत्र पद्ये वैदिकच्छन्दोवर्णनविधौ नाय

अत्र पादान्ते विशेषेण विश्रामः कर्त्तव्य इत्याम्नायः ।

उष्णिहि(१) ।

(९४) कुमारललिता ज्सौ ग् ॥ ३ ॥

यस्य पादे जकारसकारौ(२) गकारश्च, तद्वृत्तं कुमारललिता नाम । त्रिभिश्चतुर्भिश्च यत्युपदेशं वर्णयन्ति । तत्रोदाहरणम् ।

जगण सगण गु० जगण सगण गु०

यदीय, रतिभूमौ, विभाति, तिलकाङ्कः ।

१ ४ ८ १६ (१०)

जगण सगण गु० जगण सगण गु०

कुमार, ललितासौ, कुलान्यटति नारी(३) ॥

त्रीमारभ्यैव वैदिकच्छन्दांस्युक्तानि, अतो लौकिकच्छन्दोवर्णनमपि गायत्रीमारभ्यैव क्रियते ग्रन्थकारेण । चतुष्पादात्मगायत्रीच्छन्दसः पादाक्षराणि षडेव भवन्ति, तेषां प्रस्तारनियमेन प्रस्तारे क्रियमाणे सर्वगुर्वादिसर्वलघ्वन्तास्तु षष्टिभेदा जायन्ते, तत्र त्रयोदशो भेदस्तनुमध्येति नाम्ना ख्यातः । एतद्भेदसङ्ख्यानयनप्रकारस्तूद्दिष्टक्रियया कर्त्तव्यः । उद्दिष्टक्रिया तु पूर्व्वमनुष्टुप्प्रकरणे प्रदर्शिता । अन्यथापि सुखबोधार्थं पुनः प्रदर्शयिष्ये यथा, छन्दःपादस्थवर्णोपरि अधो वा एककादिद्विगुणक्रमेणाङ्का स्थाप्याः, तत्र लघुवर्णाङ्कानेकीकृत्य सर्वैकस्मिन् दत्ते या सङ्ख्या निष्पद्यते, सैव तद्वृत्त भेदसङ्ख्या भवति । इत आरभ्य सर्वत्र वृत्तवर्णोपरि यथा, प्रस्तारभेदोद्दिष्टाङ्कानां विन्यासङ्करिष्यामि, तदनुसारेण तत्र तत्र प्रथा वृत्तसङ्ख्या च परिज्ञातव्या । अत्र तनुमध्याख्ये पादान्ते यतिः कर्त्तव्या । वृत्तरत्नाकरे गायत्रे च्छन्दसि वृत्तचतुष्टयं, छन्दोमञ्जर्यां वृत्तद्वयमस्ति ।

१ उष्णिक् छन्दसीति ख०, ग० घ ।

२ जगणसगणाविति ख०, ग० च ।

३ चतुष्पादात्मिकोष्णिक्छन्दसः पादभूतानां सप्ताक्षराणां प्रस्तारे क्रियमाणे सर्व

अत्र केचिद् द्वाभ्यां पञ्चभिश्च यतिमिच्छन्ति । तत्रोदाहरणम् ।

इदं, वदनपद्मं, प्रिये, तव विभाति ।

इह, भ्रजति मुग्धे, मनो, भ्रमरतां मे ॥

अनुष्टुभि ।

(१८९) माणवकाक्रीडितकं भ्तौ ल्गौ ॥ ४ ॥

यस्य पादे भकारतकारौ(१) लकारगकारौ च(२), तन्माणवकाक्रीडितकं नाम वृत्तम् । तत्रोदाहरणम् ।

भगण तगण ल०ग० भगण तगण ल०गु०

माणवका, क्रीड़ितकं, यः कुरुते, वृद्धवयाः ।

१ ४(१०२) ११,६४

गुर्वादिसर्वलघ्वन्ता अष्टाविंशत्यधिकशतभेदा आयान्ति, तत्र तेषां त्रिंशत्तमो भेदः कुमारललितेतिनाम्ना प्रसिद्धः । एतद्गणपादभूतानां सप्ताक्षराणां मध्ये प्रथमं तृतीयाक्षरे, ततः सप्तमाक्षरे यतिः कर्तव्या । "कुलान्यटति मारो' इत्यत्र तृतीये 'न्य' इत्यक्षरे यतिकष्टाद् द्वितीये पञ्चमे चाक्षरे यतिः कर्तव्या । द्वितीये सप्तमेऽक्षरे च यतिरिति मतान्तरात् । तत्रोदाहरणम् इदं वदनपद्ममिति वृत्तम् । यत्राक्षरे यतिः क्रियते तदक्षरं शब्दस्यान्तिमावयवीभूतं कर्तव्यम् । तथा यतिः यतिकष्टं न जायते इत्यपि स्मर्तव्यम् । छन्दोमञ्जर्यामुष्णिहि इत्यवयवमुदीरितम् । यथा मधुमती कुमारललिता, मदलेखा, इति । रत्नाकरे तत्र इत्यत्रचतुष्टयम् । यथा, मदलेखा, मधुमती हंसमाला, कुमारललिता, इति । आर्या छन्दसि सप्ताक्षरः पादो भवतीति बोध्यम् ।

१ भगणतगणाविति ख० ।

२ लकारगकारौ च भवत इति ख०, पुस्तकान्तरपाठः ।

भगण नगण ल० गु० भगण नगण ल० गु०

हास्यमसौ,याति जने, भिक्षुरिव, स्त्रीचपलः(१) ॥

अत्र चतुर्भिश्चतुर्भिश्च यतिरित्याम्नायः ॥

(१८०) चित्रपदा भौ गौ ॥ ५ ॥

यस्य पादे भकारौ(२) गकारौ च भवतस्तच्चित्रपदा नाम वृत्तम्(३) । तस्योदाहरणम् ।

भगण भगण गु० गु० भगण भगण गु० गु०

यस्य मुखे प्रियवाणी, चेतसि सज्जनता च ।
२ ४ १६,२२ (४५)

भगण भगण गु० गु० भगण भगण गु० गु०

चित्रपदापि च लक्ष्मी, स्तं पुरुषं न जहाति(४) ॥

अत्र पादान्ते यतिः ।

---

१ अनुष्टुप्पादद्वयकीभूतायामष्टादशाक्षरायां प्रस्तारे त्रिषष्ट्यधिकद्विशतभेदा (२५६) जायन्ते, तत्र चाधिकसप्ततमो भेदो माणवकाक्रीडितकेतिनाम्ना ख्यातः । छन्दोमञ्जर्यादावस्य माणवकेति नाम प्रज्ञापितम् । अस्य पादस्य चतुर्थैरष्टमैश्चाक्षरै यतिर्वक्तव्या ।

२ भगणाविति ख०, ग०, घ ।

३ इत्त भवतीति ग० ।

४ उष्णिगाद्यक्षरप्रस्तारभेदानां मध्ये षट्पञ्चाशत्तमो भेदश्चित्रपदेति नाम्ना प्रसिद्ध । अत्र पादान्ते यतिः कर्तव्या । अत्र सज्जनता च, जहाति, इत्युभयत्र पादान्तस्य लघुवर्णयोरन्ते इति गुरुत्वमतिदिश्यते ।

(१९८) विद्युन्माला मौ गौ ॥ ६ ॥

यस्य पादे मकारौ(१) गकारौ च(२), तद्विद्युन्माला नाम वृत्तम्। तत्रोदाहरणम्।

मगण मगण गु० गु०
विद्युन्माला, लोलान्(३) भोगान्,

मगण मगण गु० गु०
मुक्त्वा मुक्तौ, यत्नं कुर्यात्।

मगण मगण गु० गु० मगण
ध्यानोत्पन्नं, निःसामान्यं, सौख्यं

मगण गु० गु०
भोक्तुं यद्याकाङ्क्षेत(४) ॥

अत्र चतुर्भिश्चतुर्भिश्च यतिरित्याम्नायः।
[illegible]।

---

१ मकाराविति ख०, ग० च।

२ मकारौ च भवत इति ख०, ग०, पुस्तकाभ्यपाठः।

३ विद्युन्माभोगानिति ख०।

४ [illegible]

(१८८) भुजगशिशुसृता नौ म(१) ॥ ७ ॥

यस्य पादे नकारौ मकारश्च(२) भवति, तद् भुजगशिशुसृता नाम वृत्तम् । तत्रोदाहरणम् ।

नगण नगण मगण नगण नगण मगण

इयमधिकतरं, रम्या, विकचकुवलय, श्यामा ।
१ १ ३ = १८९९ (६४)

नगण नगण मगण नगण नगण मगण

रमयति हृदयं, यूनां, भुजगशिशुसृता, नारी(३) ॥

वक्रगतिरित्यर्थः । शिशुशब्दस्य सार्थकत्वादन्यैरप्युक्तम् ।

सूत्रे पठितम् । समानीप्रमाणीति वृत्तद्वयमन्यत्र तत्प्रकरणोक्तमत्र पञ्चमाध्याये वर्णितं । अनुष्टुभि वृत्तरत्नाकरपरिष्टे "नाराचिका तरौ लगाविति"यदपि वृत्त मुक्तम् । अर्धसमवृत्तेषु, अनुष्टुभि यस्य समस्य विषमस्य वार्धसमस्य वृत्तस्य विशेष संज्ञा नास्ति, तदेव वितानेतिसामान्यसंज्ञया व्यवहर्तव्यमिति । एतद्धि अनुष्टुभि मात्रावक्त्रादिविशेषनामोक्तिप्रदर्शनमिति । आर्षा अनुष्टुभोऽष्टाक्षर पादो भवतीति ज्ञेयम् । अस्या विद्युन्मालेति नामान्तरम् ।

१ भुजगशिशुभृता नौ मिति ग० ।

२ नमवौ मकारश्चेति ख०, ग० च ।

३ भुजगशिशुभृता नारीति ग० । चतुष्पादार्धवृत्तस्य पादषट्कीभूतानां नवा क्षराणां प्रस्तारे क्रियमाणे द्वादशाधिकपञ्चशतभेदा जायन्ते, तत्र चतुःषष्टितमो भेदो भुजगशिशुभृतेतिनाम्ना प्रसिद्धः । छन्दोमञ्जर्यामस्या भुजगशिशुभृतेति भुजगशिशुसृतेति च नाम व्यवहृतम् । मुद्रित वृत्तरत्नाकरे तु भुजगशिशुसृतेति पाठान्तरं दृश्यते । अस्मदीयभट्टीकवृत्तरत्नाकरे भुजगशिशुभृतेतिपाठः । अत्र पादस्य गणमाचरे नवमा चर च पतितत्वम् ।

अभ्यस्यतानुतरणो(१) गतिवक्रभावानुन्मूलिताः फणिगिरौ-र्भवतापराधाः । इति ।

सप्तभिश्चाभ्यास्व यतिरित्याम्नायः । हंसेति अत्र(२) लिखित-मप्यनुष्टुभि बोध्यम् ।

(१००) हंसरुतं म्नौ गौ ॥ ८ ॥

यस्य पादे मगणनगणौ गकारौ च भवतः(३) तद्धंसरुतं नाम । तत्रोदाहरणम् ।

मगणः नगण गु०गु० मगण नगण गु०गु०

अभ्यागामिश्रणिलक्ष्मी,(४) मञ्जीरक्वाणिततुल्यं ।
= १६११ (५०)

मगण नगण गु०गु० मगण नगण गु०गु०

तीरे राजति नदीनां, रम्यं हंसरुतमेतत्(५) ॥

(१०१) हलमुखी नौ स् ॥ ९ ॥

यस्य पादे रेफनकारमकारा(६) भवन्ति, तद्वृत्तं हलमुखी नाम । तत्रोदाहरणम् ।

---

१ अभ्यस्यता तु तरणोति पुस्तकान्तरपाठः । अभ्यस्यतां तु तरणोति ख० ।

२ इदमत्रेति ख०, ग० घ । हंसरुतस्याष्टाक्षरपादत्वादस्यानुष्टुभ्येव पाठ उचित इति भावः ।

३ गकारद्वयञ्च भवतीति ख०, ग० घ ।

४ अभ्यागामिश्रणिलक्ष्मीति ख०, ग० घ ।

५ अनुष्टुप्पादस्याष्टाक्षरात्मकत्वादस्य ... भेदो हंसरुतमिति-प्रसिद्ध । अत्र यतिस्थलस्याप्युक्तत्वात् पादान्ते यतिर्बोध्या ।

६ यस्य पादे रनसमगणा इति ख० ।

रगण नगण भगण रगण नगण भगण

गण्डयो,-रतिशयकृशं, यन्मुखं, प्रकटदशनम् ।
२ ८,१६,३२ ६४,११८ (२४१)

रगण नगण भगण रगण नगण भगण

आयतं, कलहनिरतं, तां स्त्रियं, त्यज हंसमुखीं(१) ॥

त्रिभि. षड्भिश्च यतिरित्याम्नायः ।

पङ्क्तौ ।

(१०१) शुद्धविराण्मसौ जगौ ॥ १० ॥

यस्य पादे मकार सकार-जकार गकाराः(२) भवन्ति, तद्वृत्तं शुद्धविराट् नाम । तस्योदाहरणम् ॥

मगण सगण जगण गु० मगण सगण जगण ग०

विश्वं तिष्ठति कुक्षिकोटरे, वक्त्रे यस्य सरस्वती सदा ।
८ १६ ६४ २५६ (३४५)

मगण सगण जगण गु० मगण सगण जगण ग०

अस्मद्वंशपितामहो(३) गुरु, र्ब्रह्मा शुद्धविराट् पुनातु नः(४) ॥

अत्र पादान्ते यतिः ।

---

१ उक्तनवाक्षरप्रस्तारस्य एकपञ्चाशदधिकद्विशततमो भेदो हंसमुखीतिनाम्ना प्रसिद्ध । अत्र प्रथम पादस्य तृतीये नवम चाक्षरे यति कर्त्तव्या । मुद्रित छन्दोमञ्जरीपुस्तके द्वदत्या अभिनव भुजङ्गमङ्गतेन वृत्तद्वयमधिकमुक्तम् । मुद्रित-वृत्तरत्नाकरेतु तत्र भद्रिकेति एक वृत्तमधिकम् । अमुद्रितवृत्तरत्नाकरेतु क्षेपकरूपेण पद्यमानत्रिन्यस्तपाठे भवति नमयाद्य गुर्वी इति वृत्तमधिकमेकम् ।

२ यस्य पादे मगण-सगण जगण-गकारा इति ख०, ग० च ।

३ अस्मद्वंशपितामह इति ग० । पुस्तकान्तरपाठश्च ।

४ पुनातु व इति ग०, पुस्तकान्तरपाठश्च । पङ्क्तिच्छन्दपादघटीभूताक्षा

(१०३) पणवो म्नौ य्गौ ॥ ११ ॥

यस्य पादे मकार-नकार-यकार-गकारा भवन्ति, तद्वृत्तं पणवो नाम । तत्रोदाहरणम् ॥

मगण नगण यगण गु० मगण नगण यगण गु०

मीमांसारस,-ममृतं पीत्वा, शास्त्रोक्तिः पटु,-रितरा भाति ।

८,१६, २२,२७ (१११)

मगण नगण यगण गु० मगण नगण यगण गु०

एव संसदि, विदुषां मध्ये, जल्पामो जय,-पणवन्धत्वात् (१)॥

अत्र च(२) पञ्चभिः पञ्चभिर्यतिरित्याम्नायः ।

(१०४) रुक्मवती भ्मौ स्गौ ॥ १२ ॥

यस्य पादे भकार-मकार-सकार(३)गकारा भवन्ति, तद्वृत्तं रुक्मवती नाम । तत्रोदाहरणम् ।

दशाक्षरपादे प्रस्तारे क्रियमाणे चतुर्विंशत्यधिकसहस्रभेदा जायन्ते, तत्र पञ्चचत्वारिंशदधिकत्रिशततमो भेद शुद्धविराडिति नाम्ना प्रसिद्ध । अत्र पादान्ते यति कर्त्तव्या ।

१ एकादशाक्षरप्रस्तारस्यैकविंशत्यधिकशततमो भेद पणवनाम्ना व्यवहृत। श्रुतबोधटीकाकृन्मनोहरकारेण तु म्नौ ज्गौ यति पणवनामवृत्तमिति पणवलक्षणमुक्तं । तच्च स्वमतविरुद्धम् । अत एव छन्दोमञ्जरीटीकाकृतोक्तम्, "म्नौ ज्गौ जगत्प्रान्ते पठन्ति उचितम् इति । अत्र पादस्य पञ्चमे दशमे चाक्षरे यति कर्त्तव्या । मालीत्यस्य म्नौ ग्मौ इति मूलपाठनिर्देश ।

२ चर्ति त० ।

३ भकारभकारसकारेति ग० ।

भगण भगण भगण गु० भगण भगण भगण गु०

पादतले पद्मोदरगौरे, राजति यस्या ऊर्द्धगरेखा(१)।

२ ४ ६४,१२८ (१९९)

भगण भगण भगण गु० भगण भगण भगण गु०

सा भवति स्त्रीलक्षणयुक्ता, रुक्मवती सौभाग्यवती च(२)॥

पादान्ते यतिः।

(२००) मयूरसारिणी र्जौ र्गौ॥ १३॥

यस्य पादे रेफजकारौ रेफगकारौ च(३), तद्वृत्तं मयूरसारिणी नाम। तत्रोदाहरणम्॥

रगण जगण रगण गु० रगण जगण रगण गु०

या वनान्तराण्युपैति रन्तुं, या भुजङ्गभोगभुक्तचित्ता(४)।

१ ८ २१ १९८ (२०१)

---

१ ऊर्द्धं सुरेखेति क, लिखितादर्शपुस्तकपाठस्तु न समीचीनः। भगणो परत्र भगणस्थाने रगणागमनात्।

२ उक्तदशाक्षरपादस्य नवनवत्यधिकशततमो भेदो रुक्मवतीतिनाम्ना ख्यातः। अत्र पादान्ते यतिः। छन्दोमञ्जर्यादावस्य भेदस्य रूपवतीचम्पकमालेति नामद्वयं पाठान्तरत्वेनोपन्यस्तम्।

३ रेफगकारौ च भवत इति ख०, पुस्तकान्तरपाठश्च। रगणजगणौ रगणगकारौ च भवत इति ग०।

४ भुजङ्गभोगसक्तचित्तेति ख०, पुस्तकान्तरपाठश्च। भुजङ्गभोगसक्तचेता इति ग०।

रगण जगण रगण गु॰ रगण जगण रगण गु॰

या द्रुतं प्रयाति सज्जनांस्ता (१)तां मयूरसारिणीं विजह्यात्(२)॥

अत्र पादान्ते यतिः ।

(१०७) मत्ता म्भौ स्गौ ॥ १४ ॥

यस्य पादे मकार भकार सकार-गकाराः, (१) तद्वृत्तं मत्ता नाम । तत्रोदाहरणम् ॥

मगण भगण सगण गु॰ मगण भगण सगण गु॰

स्वैरालापैः, श्रुतिपुटपेयैः-र्गीतक्रीडा,-सुरतविशेषैः ।
१८ १९ १६ १९८ (२०१)

मगण भगण सगण गु॰ मगण भगण सगण गु॰

वासागारे, कृतसुरतानां,(१)मत्ता नारी, रमयति चेतः(२)॥

चतुर्भिः षड्भिश्च यतिरित्याम्नायः ।

(१०८) उपस्थिता त्जौ ज्गौ ॥ १५ ॥

यस्य पादे तकारजकारौ जकारगकारौ च,(१) तद्वृत्तमुपस्थिता नाम। तत्रोदाहरणम्।

तगण जगण जगण गु० तगण जगण जगण गु०

एषा, जगदेकमनोहरा, कान्या, कनकोज्ज्वलदीधितिः।
४ ८ ११,१४ १५६(२६५)

तगण जगण जगण गु० तगण जगण जगण गु०

लक्ष्मी,-रिव दानवसूदनं, पुण्यैर्नरनाथमुपस्थिता(२) ॥

अत्र द्वाभ्यामष्टाभिश्च यतिरित्याम्नायः।

त्रिष्टुभि।

(१०९) इन्द्रवज्रा तौ ज्गौ ग् ॥ १६ ॥

यस्य पादे तकारौ जकारगकारौ गकारश्च(३), तद्वृत्तमिन्द्रवज्रा नाम। तत्रोदाहरणम्।

---

१ तगणजगणौ जगणगकारौ चेति ख०।

२ एकादशाक्षरस्यास्य पञ्चपञ्चात्मकविश्रामतनो भेद उपस्थितेतिनाम्ना प्रसिद्ध। अत्र पादस्य द्वितीये दशमेऽक्षरे च यति कार्या।

षट्सप्तकेष्वन्याहृता नरजगैर्भवेन्मनोरमेति छन्दोरत्नाकरस्य म। हेमचन्द्राकर परिशिष्टेन "दीपकमाला भौ मता जगौ। ज्ञेया द्वयी सभजगयुता।" इति छन्दोदयमुक्तम्। छन्दोमिश्रयोस्तु तत्र ललितमिति नजजगैः। नरजगैर्भवेन् मनोरमा। इति छन्दोदयमस्ति।

३ तगणौ जकारो गकारौ च भवत इति ग०। तकारौ जकारगकारौ गकारश्च भवतीति च०। त्रिष्टुभि प्रथमं वृत्तं, "एकदश भौ ज्गौ ग् इति सूत्रमस्ति।

तगण तगण जगण गु० गु०

यस्यां त्रिषट्सप्तममक्षरं स्याद्,
४ ३२ ६४,२५६ (२५०)

तगण तगण जगण गु० गु०

ह्रस्वं सुजङ्घे नवमञ्च तद्वत् ।

तगण तगण जगण गु० गु०

गत्या विलज्जीकृतहंसकान्ते,

तगण तगण जगण गु० गु०

तामिन्द्रवज्रां ब्रुवते कवीन्द्राः(१) ॥

अपिच ।

ये दुष्टदैत्या इह भूमिलोके,
द्वेषं व्यधुर्गोद्विजदेवसङ्घे ।
तानिन्द्रवज्रादपि दारुणाङ्गान्,
व्याजीघयद्यः सततं नमस्ते ॥

यथा ।

गोब्राह्मणस्त्रीहतिभिर्विरुद्धं,(२)
गोपाल् कर्मोत्यप्यमतिर्नृपो यः ।

तस्येन्द्रवज्राभिहतस्य पातः,

क्षौणीधरस्येव(१) भवत्यवश्यम् ॥

पादान्ते यतिः।

(११) उपेन्द्रवज्रा जतौ जगौ ग् ॥ १७ ॥

यस्य पादे जकार-तकार जकारा गकारौ च,(२) तद्वृत्तमुपेन्द्र-वज्रा नाम। तस्योदाहरणम्।

जगण तगण जगण गु० गु०

भवन्नखाः कुन्ददलश्रियो ये,

जगण तगण जगण गु० गु०

नमन्ति लक्ष्मीस्तनलक्ष्मनेऽपि।

जगण तगण जगण गु०गु०

उपेन्द्रवज्राधिककर्कशत्वं

जगण तगण जगण गु०गु०

कथं गतास्ते रिपुदारणायाम्(३) ॥

अत्र पादान्ते यतिः ॥

---

१ क्षौणीधरस्येति मु० म० च।

२ जगणतगणौ जगणौ गकारौ च भवत इति म०। तकारौ जकारगकारौ गकारयेति काचित्पुस्तकपाठम् मुद्रयितव्यः। उपेन्द्रवज्रालक्षणे तगणद्वयम्-उदाहृतम्।

३ उक्तैकादशाक्षरप्रस्तारस्याष्टपञ्चाशदधिकद्विशततमो भेद उपेन्द्रवज्रेति नाम।

(२११) आद्यन्तावुपजातयः ॥ १८ ॥

आद्यन्ताविति अनन्तरोक्तौ इन्द्रवज्रोपेन्द्रवज्रयोः पादावाह । तौ यदा विकल्पेन यथेष्टं भवतस्तदोपजातयः प्रस्तारवचनात्(१) चतुर्दशप्रकारा जायन्ते । तत्रोदाहरणम् ।

ध्यात । अत्र पादान्तयतिर्ज्ञेया । लोकेऽपि इत्यत्र 'पि' इत्यस्य गत्वं इति गुरुत्वानिर्देशः ।

१ प्रस्तारवशादिति ख० ग० च । पुस्तकान्तरपाठः । यथा चतुरक्षरप्रस्तारे चतुरक्षरस्थानीयलघुगुरुबोधकसरलवक्ररेखास्थापननियमेन प्रस्तारे क्रियमाणे षोडशभेदा जायन्ते । तथा चतुष्पादस्थानीयैकैकवृत्ताख्यचरचतुष्कप्रस्तारे उपजातिवृत्तद्वयाख्याक्षरस्वरूपलघुगुरुस्थापननियमेन प्रस्तारे क्रियमाणेऽपि षोडशैव भेदा जायन्ते । यस्याद्योवर्णो गुरुः स गुरुस्थानीयः यस्याद्यो लघुः स लघुस्थानीयः, सर्वत्रोपजातिप्रस्तारे बोध्यः । एतन्नियमेनात्र गुरुस्थानीय इकारो लघुस्थानीय उकारो बोद्धव्यः । यथा गुरोर्वक्ररेखाया अधस्तादधो सरलरेखा लघ्वाद्योपरिस्थवक्रोपरस्थाय सस्थाप्य क्रमे गुरुं च दत्वा सर्वगुर्वादिसर्वलघ्वन्तः प्रस्तारः क्रियते । तथात्रापि चतुर्गुरुस्थानीयानां चतुर्णामिकाराणां मध्ये प्रथमेकाराधस्तादुकारं विन्यस्य द्वितीयादिवर्णानुपरि यथामेव स्थाप्य क्रमे इकारं स्थापयेत् । यावच्चेषपङ्क्तावुकारचतुष्टयमायाति । अत्र चतुरिकारात्मकः प्रथमो भेद इन्द्रवज्राख्यः, षोडशश्चतुरुकारात्मको भेद उपेन्द्रवज्राख्यो बोद्धव्यः । शेषा मध्यस्थाश्चतुर्दशभेदा एतयोरेकद्व्यादिपादमिश्रणादुपजातयो भवन्ति । तासां चतुर्दशोपजातीनां चतुर्दशनामानि पिङ्गलेनोक्तानि, यथा, यस्याः प्रथमः पाद उपेन्द्रवज्राया द्वितीयाद्याः शेषा इन्द्रवज्रायाः सोपजातिः कीर्तिनाम्नी प्रथमैव (उइइइ) । द्वितीयोपजातिरियं (इउइइ) वाणीनाम्नी । तृतीया (उउइइ) मालानाम्नी । चतुर्थी (इइउइ) शालानाम्नी । पञ्चमी (उइउइ) हंसीनाम्नी । षष्ठी (इउउइ) मायानाम्नी । सप्तमी (उउउइ) जायानाम्नी । अष्टमी (इइइउ) बालानाम्नी । नवमी (उइइउ) आर्द्रानाम्नी । दशमी (इउइउ) भद्रानाम्नी ।। एकादशी (उउइउ) प्रेमानाम्नी । त्रयोदशी (उइउउ) ऋद्धिनाम्नी । चतुर्दशी (इउउउ) बुद्धिनाम्नी उपजातिर्ज्ञातव्या । एतत्सर्वं टीकायामप्युक्तमेव

अतः प्रयत्नः प्रथमं विधेयो नृपेण पुंरत्नपरीक्षणाय(१)॥

एवमन्यान्युपजात्युदाहरणानि कुमारसम्भवादिकाव्येषु(२) द्रष्टव्यानि। समवृत्तप्रस्तावे प्रसङ्गादुपजातीनामुपन्यासो लाघवार्थः। केचिदिदं सूत्रं न्यायोपलक्षणपरं व्याचक्षते। तेन वंशस्थेन्द्रवंशापादयोरपि सङ्करादुपजातयो भवन्ति। तथा

प्रथमं चत्वारो भेदा जायन्ते पुनस्तेषां पादविन्यासव्यत्ययसमये नामविशेषपौर्वापर्यविन्यासक्रमभेदेन बहवो भेदा भवन्ति। यथा,

पादाङ्क	१ भेद	२ भेद	४ भेद
१इ०	उ०	उ०	इ०
२इ०	इ०	व०	व०
३उ०	इ०	इ०	उ०
४व०	व०	इ०	इ०

प्रथमद्वितीयौ पादौ इन्द्रवज्राया तृतीयचतुर्थावुपेन्द्रवज्रावंशस्थयोः, इत्येको भेदः। द्वितीयतृतीयौ इन्द्रवज्राया प्रथमचतुर्थौ उपेन्द्रवज्रावंशस्थयोः, इति द्वितीयो भेदः। तृतीयचतुर्थाविन्द्रवज्राया, प्रथमद्वितीयावुपेन्द्रवज्रावंशस्थयोः, इति तृतीयो भेदः। प्रथमचतुर्थाविन्द्रवज्राया, द्वितीयतृतीयौ वंशस्थोपेन्द्रवज्रयोः, इति चतुर्थो भेदः। इ०, उ०, व०, व०। उ०, इ०, व०, व०। व०, इ०, उ०, व०। व० व० इ०, उ०। व०, व०, उ०, इ०, इत्यादि। एवमप्यूहनीयम्। एवं सर्वत्रोपजातिस्थले ज्ञेयम्। उपजातीनां नामोल्लेखस्तु दृष्टान्तप्रदर्शनार्थमुपलक्षणमात्रम्। सर्वा एता उपजातयोऽर्द्धसमविषमवृत्तान्तर्भूता ज्ञेया।

१ मयवारलोके इति क०, पुस्तकान्तरपाठः। पुंरत्नपरीक्षणायामिति ख० पुस्तकान्तरपाठः। पुंसत्त्वपरीक्षणायामिति ग०। द्वादशी रामानन्द्युपजातिरियम्। (कर्योपजातिरिति पदस्य १, ४, पादान्त पदद्वय पाठान्तरद्वयमेतत्)।

२ कुमारसम्भवे इति क०, पुस्तकान्तरपाठः।

शालिनीवातोर्म्मीपादयोः अन्येषामपि स्वल्पभेदानां प्रयोगानुसारेणोपजातयो ज्ञेयाः(१) ॥

(९१) दोधकं भौ भ्गौ ग् ॥ २९ ॥

यस्य पादे भकारास्त्रयो गकारौ च भवतः, तद्दोधकं नाम वृत्तम् । तस्योदाहरणम् ।

भगण भगण भगण गु० गु०
दोधकमर्थविरोधकमुग्रं,(२)
(४०८)० ॥ १६ ३६ १०८,२४६

भगण भगण भगण गु० गु०
स्त्रीचपलं युधि कातरचित्तम् ।

भगण भगण भगण गु० गु०
स्वार्थपरं मतिहीनममात्यं,

भगण भगण भगण गु० गु०
मुञ्चति यो नृपतिः स सुखी स्यात्(३) ॥

अत्र पादान्ते यतिः । दोग्धीति दोधकः । केनाप्युपायेन राजानं दोग्धि ॥

---

१ प्रयोगानुसारेणोपजातयो द्रष्टव्या इति ख०, पुस्तकान्तरपाठश्च। प्रयोगात् (?)सारेणोपजातयो द्रष्टव्या इति ग० ।

२ दोधकमर्थविरोधकमुग्रमिति ख०, ग०, पुस्तकान्तरपाठश्च।

३ उक्तं च (?)...भेदो दोधकेतिनाम्ना (?)... । अत्र पादान्ते यतिर्बोध्या ।

(१९२) शालिनी म्तौ त्गौ ग् समुद्र ऋषयः ॥ २०॥

यस्य पादे मकारतकारौ तकारगकारौ गकारश्च भवति(१), तद्वृत्तं शालिनी नाम। चतुर्षु सप्तसु यतिः। तत्रोदाहरणम्॥

मगण तगण तगण गु०गु०

शुद्धश्यामा, स्निग्धमुग्धायताक्षी,(२)
(१८९) ११ २४६

मगण तगण तगण गु० गु०

पीनश्रोणि-र्दक्षिणावर्त्तनाभिः।

मगण तगण तगण गु०गु०

मध्ये क्षामा,(३) पीवरोरुस्तनीया,

मगण तगण तगण गु० गु०

श्लाघ्या भर्त्तुः,शालिनी कामिनी स्यात्(४)॥

(१९३) वातोर्म्मी म्भौ त्गौ ग्(५) ॥ २१ ॥

यस्य पादे मकारभकारतकारा गकारौ च,(६) तद्वृत्तं

---

१ मगणतगणौ तगणो गकारौ च भवत इति ग०।

२ स्निग्धगण्डायताक्षीति ग०। शुद्धौ श्यामा स्निग्धमुग्धायताक्षीति ख०।

३ मध्यक्षामेति ग०।

४ अत्रैकादशाक्षरप्रस्तारस्योनविंशत्यधिकद्विशततमो भेद शालिनीतिनाम्ना ख्यात। अत्र पादस्य चतुर्थे एकादशेऽक्षरे च यति कर्त्तव्या।

५ त्गौ ग् रसस्वरा इति ख०। त्गौ ग् चेति ग०।

६ मगणभगणौ तगणो गकारौ च भवत इति ग०।

वातोर्म्मी नाम(१)। चतुर्भिः सप्तभिश्च यतिः। तत्रोदाहरणम्।

मगण भगण तगण गु० गु०

यात्युत्सेकं, सपदि प्राप्य किञ्चित्,

(२०४) १८,२१ २२६

मगण भगण तगण गु०गु०

स्याद्वा यस्या,-श्चपला(२) चित्तवृत्तिः।

मगण भगण तगण गु०गु०

या दीर्घाङ्गी, स्फुटशब्दाट्टहासा,(३)

मगण भगण तगण गु०गु०

त्याज्या सा स्त्री, कुलवातोर्म्मिमाला(४) ॥

वातोर्म्मीति "स्त्रियां कृदिकारदक्तिनः" इति ङीप् ॥

---

१ चकारो यत्युत्कर्षार्थ इति श, चिह्नितपुस्तके चक पाठः।

२ या यस्या स्यादचपलेति पुस्तकान्तरपाठः। या यस्याः स्याच्चपलेति ख०, ग० च।

३ स्फोटशब्दाट्टहासा इति ग०।

४ अतः कादशाक्षरमारभ्य पञ्चाधिकविंशतितमो भेदो वातोर्म्मीतिनाम्ना प्रख्यातः। अत्र पादस्य चतुर्थ एकादशे चरणे च यतिर्ज्ञेया। वातोर्म्मी शालिन्योर्भङ्गचतुर्थस्थाने एव किञ्चिद्भेदः। अत एतयोर्मिश्रणात् उपजातयो भवन्ति। एकदशविभिन्नतायामिव लघुद्वयविभिन्नतायामपि उपजातयो भवन्तीति 'तदा शालिनीत्यादि वदता ग्रन्थकृता सिद्धान्तीकृतम्।

(२१४) भ्रमर विलासिता म्भौ न्लौ ग् (१)॥ २२ ॥

यस्य पादे मकार भकार नकार लकार-गकारा स्युः(२)तद् भ्रमरविलसिता(३) नाम वृत्तम्। सैव यति । तत्रोदा हरणम् ।

मगण भगण नगण ल०गु०

किन्ते वक्त्रं, चलदलकचितं,
१६ २१ २१ २१८,२१६ ४ १२

मगण भगण नगण ल०गु०

किं वा पद्मं, भ्रमरविलसितम् ।
(१००६)

मगण भगण नगण ल०गु०

इत्थेवं मे, जनयति मनसि,

मगण भगण नगण ल०गु०

प्रीति (४) कान्ते, परिसरसरसि(५) ॥

---

१ भ्रमरविलसितं म्भौ न्लौ ग इति ख०, ग०, पुस्तकान्तरपाठः। एतत्सूत्रकारा-दारभ्य भ्रमरविलसितमित्येवास्य नाम।

२ मगणभगणनगणलघुकारगकारा भवन्तीति ग० ।

३ भ्रमरविलसितमिति ख०, पुस्तकान्तरपाठः ।

४ परिसरसिरसि ख०, ग०, पुस्तकान्तरपाठः ।

५ अत्रैकादशाक्षरपादायां [illegible] भेदो भ्रमरविलसितमिति नाम्ना [illegible] । अत्र चतुर्थं [illegible] यतिः । अत्र चतुर्थपादान्तस्य 'ह्र' इति [illegible] इति [illegible] ।

(६९) रथोद्धता र्नौ र्लौ ग् ॥ २३ ॥

यस्य पादे रेफनकारौ रेफलकारौ गकारश्च,(१) तद्वृत्तं रथोद्धता नाम ॥ तत्रोदाहरणम् ।

गलग ललल गलग ल०गु०
या करोति विविधैर्विटैः मम,
२ ८, १६, ३२, १२८ ५१२

गलग ललल गलग ल० गु०
सङ्गतिं परगृहे रता च या ।
(६९९)

गलग ललल गलग ल०गु०
ग्लानयत्युभयतोऽपि बान्धवान्,

गलग ललल गलग ल०गु०
मार्गधूलिरिव सा रथोद्धता(२) ॥

पादान्ते यतिः ॥

---

१ रेफनकारौ रेफलकारौ गकारश्च भवतीति ख०, पुस्तकान्तरपाठश्च । रनर-लगपरगमा लघुर्गुरुरिति ग० ।

२ अस्यैकादशाक्षरप्रस्तारस्यैकोनसप्तत्यधिकषट्शततमो भेदो रथोद्धतेतिनाम्ना ख्यातः । अत्र पादान्ते यतिर्बोध्या ।

(११७) स्वागता र्नौ भ्गौ ग् ॥ २४ ॥

यस्य पादे रेफ-नकार-भकारा-गकारौ च, (१)तद्वृत्तं स्वागता नाम ॥ तत्रोदाहरणम् ।

रगण नगण भगण गु०गु०

आहवं प्रविशतो यदि राज्ञ,

२ ८,१६,२२, १२८,१५६ (४४२)

रगण नगण भगण गु०गु०

पृष्ठतश्चरति वायुसमेतः ।

रगण नगण भगण गु०गु०

प्राणवृत्तिरपि यस्य शरीरे,

रगण नगण भगण गु०गु०

स्वागता भवति तस्य जयश्रीः(२) ॥

अत्र पादान्ते यतिः ।

(११८) वृन्ता नौ स्गौ ग् ॥ २५ ॥

यस्य पादे नकारौ सकारगकारौ गकारश्च भवति, तद्वृत्तं वृन्ता नाम। अत्र मण्डूकप्लुतिन्यायेन समुद्र ऋतव इत्यनुवर्तते । तेन(३) चतुर्भिः षड्भिश्च यतिः । तत्रोदाहरणम् ।

---

१ रनभगणौ भगणौ गकारौ च भवत इति भ० ।

२ अनेकानामार्याणामस्य विषमाक्षरच्छन्दसिकम् उत्तमो भेदः स्वागतेति भाष्यकारः । अत्र पादान्ते यतिः ।

३ मदैवतिनि भ०, पुस्तकान्तरे ऽयं ।

नगण नगण सगण गु० गु०

द्विजगुरु,-परिभवकारी यो,(१)

१,२, ४,५, १६,२२ ४,१०५, (४३६)

नगण नगण सगण गु० गु०

नरपति,-रतिधनलुब्धात्मा ।

नगण नगण सगण गु० गु०

ध्रुवमिह, निपतति पापोऽसौ,

नगण नगण सगण गु०गु०

फलमिव, पवनहतं वृक्षात्(२) ॥

(२१९) श्येनी जौ लौ ग॥ ९६॥

यस्य पादे रेफजकारौ रेफलकारौ गकारश्च,(३) तद्वृत्तं श्येनी नाम। तस्योदाहरणम्।

रगण जगण रगण ल०गु०

क्रूरदृष्टिरायताग्रनासिका,

रगण जगण रगण ल०गु०

स्त्वना कठोरतीक्ष्णनादिनी।

---

१ द्विजगुरुपरिभवकारी च इति ख०।

२ अत्र काव्यादर्शे ... भेदो इति न मा... अत्र चतुर्थे ... कर्तव्या।

३ रगणजगणौ रगणलकारौ गकारश्च इति ख०। रेफजकारौ रेफलकारौ गकारश्च भवतीति पुस्तकान्तरपाठः।

रगण जगण रगण ल॰गु॰

युद्धकाङ्क्षिणी सदामिषप्रिया,

रगण जगण रगण ल॰ गु॰

श्येनिकेव सा विगर्हिताङ्गना(१) ॥

अत्र पादान्ते यतिः ।

(११०) विलासिनी ज्रौ ज्गौ ग(२) ॥ २७ ॥

यस्य पादे जकाररेफौ जकारगकारौ गकारश्च भवति, तद्वृत्तं विलासिनी नाम । तस्योदाहरणम् ।

जगण रगण जगण गु॰गु॰

विलासिनी विलोकितः स कामी,
१ ४ १६ ४५ १९६ (२४४)

जगण रगण जगण गु॰ गु॰

दधाति कामसत्त्वचेष्टितं या ।

---

१ [illegible]

२ [illegible]

जगणः तगण जगण गु॰ गु॰

करोति चञ्चलालिहष्टिपातैः,

जगण तगण जगण गु॰ गु॰

यतात्मनश्चयोगिनोऽपि मत्तान्(१) ॥

(२११) जगती ॥ २८ ॥

अधिकारोऽयमाध्यायपरिसमाप्तेः। यदित ऊर्द्धमनुक्रमिष्यामस्तज्जगतीत्येव(२) वेदितव्यं। वक्ष्यति, तोटकं सः(३१) इति, तज् जगतीपादस्य लक्षणं भवति(३) ॥

---

१ कर्ण्णैकादशाक्षरप्रस्तारस्य द्विचत्वारिंशदुत्तरद्विशततमो भेदो विभाविनीति नाम्ना ख्यातः। चतुष्कलस्ले पादान्ते यति क्रियतेऽत्र पादान्ते यतिर्बोध्या।

त्रिष्टुभि चत्र यानि वृत्तान्युक्तानि तानि वृत्तरत्नाकरोक्तानि यथा, श्री-सुभगो भद्रिकोपस्थितोपचित्रा-नवमिताक्षरिकश्चान्तः कुड्मलदन्तीत्येतानि। कुड्मलदन्ति तु विभक्तमाला भवेनौ तगौ च। कान्तदन्ति तु निगमनकमेव। त्रिपादिकान्दि जभौ तभौ गुरुर्यतु। इति वृत्तरत्नम्। तत्र श्लोकानुरोधाद् छन्दोऽनुवृत्तनोदनेति वृत्तदर्शनमपि। कर्णैद्वादशाक्षरे। उपचित्रानवमिताक्षरिकश्चान्तमयं मत्वा सर्वोक्तरलाकरमध्ये न लिखितमपि। श्रीतारानाथतर्कवाचस्पतिना परिशोधिते

(१९२) वंशस्था ज्तौ ज्रौ ॥ २९ ॥

यस्य पादे जकारतकारौ जकाररेफौ च भवतः, तद्वृत्तं वंशस्था नाम। तत्रोदाहरणम् ।

जगण तगण जगण रगण

विभुं द्विवंशस्थमुदारचेष्टितं,

१ ४ २२,६४ ७५६ १०२४(१३८२)

जगण तगण जगण रगण

गणप्रियं मित्रमुपात्तसज्जनम् ।

जगण तगण जगण रगण

विपत्तिमग्नाय(१)करावलम्बनं,

जगण तगण जगण रगण

करोति यः प्राणपरिक्रयेण सः (२) ॥

पादान्ते यतिः ।

जगतीजात्या द्वादशाक्षरपादः पूर्वमेव मात्रा गणनामध्याहारेण क्रियते। अत एव प्रथम जगतीपादाद्यक्षरकल्पनापक भवति इति भाव ।

१ विपत्तिमग्नस्येति ख म०, पुस्तकान्तरपाठः।

२ जगतीछन्दःपादद्वादशाक्षराणां [illegible] प्रस्तारनियमात्: [illegible] [illegible], तत्र [illegible] भेदो [illegible] इति [illegible] । अत्र पादान्ते यतिर्ज्ञेया। [illegible] । [illegible] [illegible]।

(२९७) इन्द्रवंशा तौ ज्रौ ॥ ३० ॥

यस्य पादे तकारौ जकाररेफौ[1] च[2], तद्वृत्तमिन्द्रवंशा नाम। तस्योदाहरणम् ।

तगण भगण जगण रगण

कुर्व्वीत यो देवगुरुद्विजन्मना-

तगण तगण जगण रगण

मुर्व्वीपतिः पालनसमर्थलिप्सया[3]।

तगण तगण जगण रगणः

तस्येन्द्रवंशेऽपि गृहीतजन्मनः

तगण तगण जगण रगण

सञ्जायते श्रीः प्रतिकूलवर्त्तिनी[4] ॥

पादान्ते[5] यतिः ।

---

१ तगणौ जगणरेफाविति त्र० ।

२ तकारौ जकाररेफौ च भवत इति ग०, पुस्तकान्तरपाठः ।

३ पालनसमर्थलिप्सयेति ग०, पुस्तकान्तरपाठः ।

४ [illegible] इति नाम्ना ख्यात । अत्र पादान्ते यतिर्बोध्या । [illegible] हरणयोर्मिश्रणेऽपि उपजातिर्भवतीति ध्येयम् ।

५ पादान्ते यतिरिति ग०, क०, पुस्तकान्तरपाठः ।

(२२७) द्रुतविलम्बितं नभौ भ्रौ॥ ३१॥

यस्य पादे नकारभकारौ भकाररेफौ च भवतः,तद्‌वृत्तं द्रुतविलम्बितं नाम। तत्रोदाहरणम्।

नगण भगण भगण रगण

द्रुतगतिः पुरुषो धनभाजनं,

१ २ ४, १६, ९९, २१६,१२८,१०२४ (१४६४)

नगण भगण भगण रगण

भवति मन्दगतिश्च सुखोचितः।

नगण भगण भगण रगण

द्रुतविलम्बितखेलगतिर्नृपः,

नगण भगण भगण रगण

सकलराज्यसुखं प्रियमश्नुते(१)॥

पादान्ते यतिः।

(२२८) तोटकं सः॥ ३२॥

जगतीत्यधिकारे चतुर्भिः सकारैर्जगतीपादः पूर्यते(२)

---

१ सकलराज्यसुखं प्रियमश्नुते इति ख०। सकलराज्यसुखमाप्नोति यत् नृपः चतुष्पादविशिष्टलक्षणमसौ। भेदो द्रुतविलम्बितनाम्ना ख्यातः। अत्र पादान्ते यति र्विद्यते।

२ जगत्या इत्यधिकारमनुवृत्य चतुर्भि पादः पूर्यते। अत्र च दाक्षिण्यं न चतुर्भगणा विवक्षिता भवन्ति पादार्थे। एतमेवार्थं मनसि कृत्वा केन चित् उक्तमिदं 'वद तोटकमब्धिसकारयुतम्' इति, कस वा इद तोटकमवधि [illegible] इति तोटकलक्षणम्।

तावन्त एव पादेषु यत्र सकारा भवन्ति, तद्वृत्तं तोटकं नाम । तत्रोदाहरणम् ।

अमुना यमुनाजलकेलिकृता,
सहसा तरसा परिरभ्य धृता ।
हरिणा हरिणाकुलनेत्रवती,
न ययौ नवयौवनभारवती(१) ॥

सगण १ सगण २ सगण ३ सगण ४
त्यज तोटकमर्थनियोगकरं,
[illegible]

सगण १ सगण २ सगण ३ सगण ४
प्रमदाधिकृतं व्यसनोपहतम् ।

सगण १ सगण २ सगण ३ सगण ४
उपधाभिरशुद्धमतिं सचिवं

सगण १ सगण २ सगण ३ सगण ४
नरनायकभीरुकमायुधिकम्(२) ॥

पादान्ते यतिः ॥

---

१ इदं [illegible]

२ [illegible]

(२९६) पुटो(१) नौ म्यौ वसुसमुद्राः ॥ ३३ ॥

यस्य पादे नकारौ मकारयकारौ(२) च भवतः, तद्वृत्तं पुटो नाम(३)। अष्टभिश्चतुर्भिश्च यतिः ॥ तत्रोदाहरणम् ।

नगण नगण मगणः यगण
नविचलति कथञ्चिन्, न्यायमार्गाद्,
१ २ ४ ८,१६, ३२, (५७६) ५१२

नगण नगण मगण यगणः
वसुनि शिथिलमुष्टिः, पार्थिवो यः ।

नगण नगण मगण यगण
अमृतपुट इवासौ, पुण्यकर्म्मा,

नगण नगण मगण यगणः
भवति जगति सेव्यः, सर्व्वलोकैः(४) ॥

(२९७) जलोद्धतगतिर्ज्सौ ज्सौ रसर्त्तवः ॥ ३४ ॥

यस्य पादे जकारसकारौ पुनस्तावेव तद्वृत्तं(५) जलोद्धतगतिर्नाम । षड्भिः षड्भिश्च यतिः । तत्रोदाहरणम् ।

१ श्रीपुट इति ख०, ग०, पुस्तकान्तरपाठः ।

२ नगणौ मगणयगणौ इति ख० ग० पुस्तकान्तरपाठः ।

३ श्रीपुटो नामेति ख० ग०, पुस्तकान्तरपाठः ।

४ उक्तद्वादशाक्षरप्रस्तारस्य षट्सप्तत्यधिकपञ्चशततमो भेद पुट इतिनाम्ना प्रसिद्ध । अत्र पादस्याष्टमे द्वादशेऽक्षरे च यतिर्बोध्या ।

५ जगणसगणौ पुनर्जगणसगणौ तदिति ख०, ग०, पुस्तकान्तरपाठः ।

जगणः सगणः जगणः सगणः

भनक्ति समरे, बहूनपि रिपून्,

[illegible]

जगणः सगणः जगणः सगणः

हरिः प्रभुरसौ, भुजोर्जितबलः ।

[illegible]

जगणः सगणः जगणः सगणः

जलोद्धतगति,-र्यशव मकर,-

जगणः सगणः जगणः सगणः

स्तरङ्गनिकर, करेण परितः(¹) ॥

(¹⁸) ततं नौ म्रौ ॥ ७५ ॥

यस्य पादे नकारौ मकाररेफौ च(²), तद्वृत्तं ततं नाम । तस्योदाहरणम् ॥

नगणः नगणः मगणः रगणः

कुरु करुणमियं गाढोत्कपिठका,

[illegible]

1 [illegible]

[illegible]

* [illegible]

कथयति शय्या कुसुमविचित्रा(१) ॥

(१०) चञ्चलाक्षिका नौ रौ ॥ ३७ ॥

यस्य पादे नकारौ रेफौ च, तद्वृत्तं चञ्चलाक्षिका नाम । तस्योदाहरणम् ॥

अतिसुरभिरभाजिपुष्पश्रिया,-

[illegible]

मतनुत रतयेव सन्तानकः ।

तरुणपरभृतस्स्वनं रागिणा,-

मतनुत रतये वसन्तामकः(२) ॥

१ [illegible]

२ [illegible]

नगण नगण मगण रगण

यदुतनयचकोरी कामाधिका ।

नगण नगण मगण रगण

विरहदहनसङ्गादङ्गैः क्षमा,

नगण नगण मगण रगण

पिबतु तव मुखेन्दोर्बिम्बं द्रुमा(१) ॥

(१९८) कुसुमविचित्रा न्यौ न्यौ ॥ ३६ ॥

यस्य पादे नकारयकारौ पुनस्तावेव भवतः, तद्वृत्तं(२) कुसुमविचित्रा नाम । तस्योदाहरणम् ॥

नगण यगण नगण यगण

विगलितहारा सकुसुममाला,

१ २ ४ ८(१०१) ६४ १९८,१५६,३११

नगण यगण नगण यगण

सचरणलाक्षावलयसुलक्षा ।

नगण यगण नगण यगण

विरचितवेशं सुरतविशदे,

---

१ [illegible] इति [illegible] । [illegible] । अथवा [illegible] ।

२ [illegible] पुनर्नकारयकारौ [illegible] ।

नगण यगण नगण यगण

कथयति शय्या कुसुमविचित्रा(१) ॥

(११०) चञ्चलाक्षिका नौ रौ ॥ ३७ ॥

यस्य पादे नकारौ रेफौ च, तद्वृत्तं चञ्चलाक्षिका नाम । तत्रोदाहरणम् ॥

नगण नगण रगण रगण

अतिसुरभिरभाजिपुष्पश्रिया,-
१ २ ४ ८ १६ ३२ १२८(१०२४) १००८

नगण नगण रगण रगण

मतनुत रतयेव सन्तानकः ।

नगण नगण रगण रगण

तरुणपरभृतस्वनं रागिणा,-

नगण नगण रगण रगण

मतनुत रतये वसन्तानकः(२) ॥

---

१ [illegible]

२ [illegible]

(२११) भुजङ्गप्रयातं यः ॥ ३८ ॥

यस्य पादे चत्वारो यकारास्तद्वृत्तं(१) भुजङ्गप्रयातं नाम। तस्योदाहरणम् ॥

यगण १ यगण २ यगण ३ यगण ४

पुरः साधुवद्भाति(२) मिथ्याविनीतः,

१ ८ ६४ (५८६) ५१२

यगण १ यगण २ यगण ३ यगण ४

परोक्षे करोत्यर्थनाशं हताशः ।

यगण १ यगण २ यगण ३ यगण ४

भुजङ्गप्रयातोपमं यस्य चित्तं,

यगण १ यगण २ यगण ३ यगण ४

त्यजेत्तादृशं दुश्चरित्रं कुमित्रम्(३) ॥

छन्दोमञ्जरी। प्रमुदितवदना भवेन्नौ च रौ इति रत्नाकरः। "नजं मौ यौ" "कुसुमविचित्रा न्यौ न्यौ" 'चञ्चलाक्षिका नौ रौ' इति सूत्राणि मुद्रितपुस्तके न पठितानि। मत्सम्मते च,लिखितपुस्तकेऽपि नैतेषां पाठो दृश्यते। मदीय,लिखितपुस्तके तु 'कुसुमविचित्रा न्यौ न्यौ' इत्येकमेव सूत्रं पठितमस्ति।

१ चत्वारो यगणा भवन्ति यदिति क०, ग०, पुस्तकान्तरपाठः।

२ साधुवद्भातीति क०, ग०, पुस्तकान्तरपाठः।

३ एकादशाक्षरपादस्य चतुर्णामुदाहृतत्वात् भेदो भुजङ्गप्रयातस्येति सिद्धान्तः। अत्र पादान्ते यतिः। अत यगणस्य चतुरावृत्तिः, अतएवोदाहरणम् सर्वलघ्वादिमध्या। अत्र लक्ष्यते, मनुष्याणां, मोदक च इत्यत्र प्रदर्शितं। एवं चतुर्दशोद्भवाधिसंख्या। रत्नाकरादौ तु स्पष्टमेव।

अत्र पादान्ते यतिः ॥

(११९) स्रग्विणी रः ॥ १५ ॥

यस्य पादे चत्वारो रेफाः सा(१) स्रग्विणी नाम। तस्योदाहरणम् ॥

रगण १ रगण २ रगण ३ रगण ४

यो रणे युद्ध्यते निर्भरं निर्भय,-

२ १६(११०१) ११८ (१०२४)

रगण १ रगण २ रगण ३ रगण ४

स्त्यागिता यस्य सर्व्वस्वदानावधिः।

रगण १ रगण २ रगण ३ रगण ४

तं नरं वीक्ष्य लक्ष्मीर्यशः(२) स्रग्विणी,

रगण १ रगण २ रगण ३ रगण ४

नूनमभ्येति सत्कीर्त्तिशुक्लांशुका(३) ॥

अथ पादान्ते यतिः ॥

१ रगणाश्चत्वारश्चेत् इति ख० ग०, पुस्तकान्तरपाठः।

२ वीरलक्ष्मीर्यश इति ख०, पुस्तकान्तरपाठः।

३ उक्तद्वादशाक्षरप्रस्तारस्यैकसप्ततिकसहस्राधिकैकभद्रकमतो भेदः स्रग्विणी ति नाम प्रसिद्धः। अत्र पादान्ते यतिर्बोध्या।

(२११) प्रमिताक्षरा सजौ सौ ॥ १६ ॥

यस्य पादे सकारजकारौ सकारौ च(१) भवतः, तद्वृत्तं प्रमिताक्षरा नाम । तस्योदाहरणम् ॥

सगण जगण सगण सगण

परिशुद्धवाक्यरचनातिशयं,
१ २ ८ ३२,६४,१२८,५१२,१०२४ (१७७१)

सगण जगण सगण सगण

परिषिञ्चति श्रवणयोरमृतम् ।

सगण जगण सगणः सगण

प्रमिताक्षरापि विपुलार्थवती

सगण जगण सगण सगणः

तव भारती हरति मे हृदयम्(२) ॥

अत्र पादान्ते यतिः ॥

(२१२) कान्तोत्पीडा भ्मौ स्मौ ॥

यस्य पादे भकारमकारौ सकारमकारौ च(३), तद्वृत्तं कान्तोत्पीडा नाम । तस्योदाहरणम् ॥

---

१ सगणजगणौ सगणौ चेति ख०, ग०, पुस्तकान्तरपाठः ।

२ द्वादशाक्षरप्रस्तारस्य सप्तशतैकसप्तत्यधिकैकसहस्रतमो भेदः प्रमिताक्षरेति नाम्ना ख्यातः । अत्र पादान्ते यतिर्बोध्या ।

३ भगणमगणौ सगणमगणौ च भवत इति ख०, ग०, पुस्तकान्तरपाठः ।

भगण मगण सगण मगण

कामशरैर्व्याप्ता खलु कान्तोत्पीड़ा,-

९१,११८ (१९८)

भगण मगण सगण मगण,

प्राप्तवती दुःखै परिमुह्यन्ती या।

भगण मगण सगण मगण

सा लभते चेत्कामुकयोगं गाढ

भगण मगण सगण मगण

दुःखविमुक्ता(१) स्यात् परमानन्दाप्ता(२)॥

(११७) वैश्वदेवी मौ याविन्द्रिय ऋषयः ॥ १७ ॥

यस्य पादे मकारौ यकारौ च(३) भवतः, तद्वृत्तं वैश्वदेवी नाम। पञ्चसु सप्तसु च यतिः। तस्योदाहरणम्॥

मगण मगण यगण यगण

धन्यः पुण्यात्मा जायते क्वापि वंशे

(५,७७) ९४, ५१२

मगणः मगण यगण यगण

तादृक् पुत्रोऽसौ येन गोत्र पवित्रम्।

---

१ दुःखवियुक्ता इति ख०, ग०, पुस्तकान्तरपाठश्च।

२ उक्तद्वादशाक्षरप्रस्तारस्यैकोनशताधिकैकसप्ततमो भेदः कामोत्पीडेतिनाम्ना ख्यातः। अत्र यतिस्तत्तद्विशेषणोक्ते पादान्त एव यतिर्ज्ञेया।

३ मगणौ यगणाविति ख०, पुस्तकान्तरपाठश्च।

मगण मगण यगण यगण

गोविप्रज्ञातिस्वामिकार्य्यप्रवृत्ते

मगण मगण यगण यगण

प्राज्ञः श्रद्धादौ वैश्वदेवी भवेद्यः(१) ॥

(१९८) वाहिनी त्मौ म्यावृषिकामशरा(२) ॥

यस्य पादे तकारयकारौ मकारयकारौ च, भवतस्तद्वृत्तं वाहिनी नाम । मसभिः पञ्चभिश्च यतिः । तत्रोदाहरणम्* ॥

---

१ उक्तद्वादशाक्षरप्रस्तारस्य सप्तमसप्तत्यधिकपञ्चशततमो भेदो वैश्वदेवीतिनाम्ना प्रसिद्ध । अत्र पादस्य पञ्चमे एकादशे चाक्षरे यतिः कर्त्तव्या ।

२ सप्तव्ये ख०, चिह्नितपुस्तके सूत्रमिदं नास्ति ग,चिह्नितपुस्तके तु तत्पाठोऽस्ति । मसभिः पञ्चभिर्यतिनियमश्च प्रदर्शित । परन्त्वस्योदाहरणं क चिह्निते आदर्शपुस्तके ग,चिह्नितपुस्तकेऽपि नोक्तम् । केवलं तत्रोदाहरणमित्युक्त्वैव विरामः कृत । अत उदाहरणं मया विरच्य प्रदत्तम् । तद्यथा,

तगण मगण मगण: यगणः

* पूर्णा यदीय कोषो, नीतिर्विशुद्धा,

४ (५१०) ५११ -

तगण मगण मगण यगण

दृष्टिः स्वधर्मे रक्षा, स्वानां प्रजानां ।

तगण मगण, मगण यगण

यद्वाहिनी सर्वाङ्गै, र्युक्ता प्रधर्ष्या,

तगण मगण, मगण यगण,

राज्ञोस्य संविज्ञेयं, श्रेयः सदैव ॥


BIBLIOTHECA INDICA:

COLLECTION OF ORIENTAL WORKS

PUBLISHED BY THE

ASIATIC SOCIETY OF BENGAL

New Series No. 301.



पिङ्गलच्छन्दःसूत्रम् ।

CHHANDAH-SÚTRA

of

PINGADA ÁCHÁRYA

WITH THE

COMMENTARY OF HALÁYUDHA.

EDITED BY

PANDITA VISVANÁTHA SÁSTRÍ

FASCICULUS III.

CALCUTTA

PRINTED AT THE GANESA PRESS.

1874

LIST OF BOOKS FOR SALE

AT THE LIBRARY OF THE

ASIATIC SOCIETY OF BENGA

No 57, Park Street.

I.—THE SOCIETY'S PUBLICATIONS.

A. Bibliotheca Indica

Sanskrit Works complete.

Old Series Nos 1 to 230 demi 8vo. Rs

The first two Lectures of the Sanhita of the Rig Veda. Edited by Dr. I. Roer, Nos. 1 to 4 .

Uttara Naishadha Charita, by Sri Harsha, with a Commentary. Edited by Dr. E. Roer 12 Fasciculi, 7

Chaitanya Chandrodaya Nataka, by Kavikarnapura. Edited by Babu Rajendralala Mitra 3 Fasciculi, 1

Vasavadatta by Subandhu, with its commentary entitled Darpana. Edited by Professor F. E. Hall M. A. 3 Fasciculi, 1

The Markandeya Purana Edited by the Rev. K. M. Banerjea 7 Fasciculi, 6

The Elements of Polity, by Kamandaki Edited by Rajendralala Mitra 3 Fasciculi, 1

New Series, Nos. 1 to 268, demi 8vo

The S'rauta S'utra of A'svalayana, with the Commentary of Gargya Narayana Edited by Pandita Ramanarayana Vidyaratna 10 Fasciculi 5

The S'ankara Vijaya of Anantananda Giri Edited by Pandita Jayanarayana Tarkapanchanana 3 Fasciculi, 1

Vaiseshika Dars'ana, with the Commentaries of Sankara Mis'ra &c Edited by Pandita Jayanarayana Tarkapanchanana 5 Fasciculi, 3

The Nyaya Dars'ana of Gotama, with the Commentary of Vatsyayana Edited by Pandita Jayanarayana Tarkapanchanana 3 Fasciculi, 1

Pali Grammar, by Kachchayana, Edited by Dr. F. Mason 2 Fasciculi, 1

The Das'a Rúpa, with Dhanika's Commentary. Edited by Professor F. E. Hall, D. C. L. 3 Fasciculi 1

The Aphorisms of Sandilya with the commentary of Swapnesvara. Edited by J. R. Ballantyne, LL. D., 0

The Narada Pancharatra Edited by the Rev K. M. Banerjea. 4 Fasciculi, 2

The Kaushitaki-Brahmana Upanishad with Commentary and a translation by E. B. Cowell, M. A. 2 Fasciculi 1

The Kavyadars'a of S'ri Dandin Edited with a Commentary by Pandita Premachandra Tarkavagis'a 5 Fasciculi, 3

Sankhya Sara of Vijnana Bhikshu. Edited by Dr. F. E. Hall, 1 Fasciculus, 0

Brihat Sanhita of Varaha Mihira Edited by Dr. H. Ker...

BIBLIOTHECA INDICA:

A

COLLECTION OF ORIENTAL WORKS

PUBLISHED BY THE

ASIATIC SOCIETY OF BENGAL.

NEW SERIES, NOS 230, 258 AND 307.

CHHANDAH SÚTRA

OF

PINGALA ÁCHÁRYA.

WITH THE

COMMENTARY OF HALÁYUDHA

EDITED BY

PANDITA VISVANATHA ŚASTRI

CALCUTTA.

PRINTED AT THE GANÉSA PRESS

1874

छन्दःसूत्रम्

श्रीपिङ्गलाचार्य्यकृतम्



हलायुधभट्टकृतमृतसञ्जीवन्याख्यवृत्तिसहितम्

आसियातिकसोसाइट्यनुमत्या

श्रीविश्वनाथशास्त्रिणा यथामति

परिशोधितम्

कलिकाताख्यमहानगरे

गणेशयन्त्रे मुद्रितमिदम् ।

संवत् १९३०

भूमिका।

छन्दःशास्त्रस्य प्रथमः प्रणेता पिङ्गलाचार्यः। स पिङ्गलनागः पिङ्गलमुनिरिति नामधेयेनापि प्रसिद्धः। पतञ्जलेर्नामान्तरं पिङ्गलाचार्य इत्यपि जनश्रुतिः। तत्र प्राकृतच्छन्दोग्रन्थे मङ्गलाचरणश्लोके पिङ्गलनागेतिनाम गृहीतं यथा,

जो विविहमत्तसाअरपारं पत्तो विमलमइ हेलं।
पढमं भासतरण्डो णाओ सो पिङ्गलो जअइ॥

प्राकृतभाषाक्षरूपनौकासहायो यः पिङ्गलनागः विविधमात्रान्यासयुक्तस्य च्छन्दःसागरस्य प्रथमं विशिष्टविमलमत्या हेलयैव पारम्प्राप्तः, स जयतीत्यर्थः। अत्र प्रथमशब्दोपादानाच्छन्दःशास्त्रस्य प्रथमप्रणेता पिङ्गलनाग एव बभूवेति लभ्यते। विविहमत्तसाअरपारं पत्तो इत्यस्यार्थान्तरसङ्गत्यनुकूलामेतामाख्यायिकामनुसरन्ति केचित्। एकदा पिङ्गलनागं दृष्ट्वा भोक्तुमुद्यते गरुडे तमेवमुवाच पिङ्गलनागः, भो गरुड़ पश्य मम छन्दोविद्याकौशलं, यद्येकवारं लिखितं मया पुनर्लिख्यते चेत् तदा मां भक्ष। स इत्युक्त्वा लघुगुरुरेखाविन्यासात्मकप्रस्तारप्रदर्शनच्छलेन उक्तप्रस्तारन्यासपूर्णं भूतलप्रदेशं क्रमशः परित्यजन् समुद्रं विवेश। गमनसमये पिङ्गलनागेनोक्तं सूत्रं यथा, "चतुर्भिर्यकारैर्भुजङ्गप्रयातम्" इति।

अनेनैव पिङ्गलनागेन वैदिकलौकिकच्छन्दसां यानि सूत्राणि कृतानि तेषामर्थावबोधाय बहुभिर्विद्वद्भिर्नाना टीका कृता। तत्रैका टीका वृत्तरत्ननाम्नी श्रीनारायणभट्टाराकृता। द्वितीया, पिङ्गलप्रकाशनाम्नी श्रीविश्वरथविरचिता। मया नैते दृष्टे, एकैव या मृतसञ्जीवनीनाम्नी सुविख्यातपण्डितप्रवरश्रीहलायुधभट्टप्रणीता टीका बहुशो दृश्यते, सैवात्र लोकिता।

हलायुधभट्टो हि श्रीभट्टनारायणान्वये प्रसूतः। अस्य जनकः श्रीधनञ्जयभट्टः। अस्यापराभिधानं पुण्ये इति। अनेन निघण्टुरेको विरचितः। श्रीवङ्गाधिपादिसूरेणानीतपञ्चब्राह्मणेष्वेकतमो भट्टनारायणः। अस्माद् द्वादशपुरुषो हलायुधभट्ट इति घटककारिकाप्रसिद्धः। ब्राह्मणसर्वस्वग्रन्थारम्भे हलायुधेन स्वश्लोके निजहस्तात्मा विन्यस्तो यथा, असाधारणधीसम्पत्तिप्रभावतो निखिलविद्यापारावारपारङ्गतत्वादिविधसद्गुणाधारतया च श्रीलक्ष्मणसेननृपतिर्बाल्य एवास्मै राजपण्डितपदं, यौवने मन्त्रिपदं, यौवनान्ते च धर्माधिकारिपदं प्रददाविति। अयं लक्ष्मणसेनः श्रीयुक्तबाबुराजेन्द्रलालमित्रस्य गणनानुसारेण क्रिष्टीयद्वादशशताब्दीप्रारम्भे विराजितवान्, अत एव हलायुधोपि द्वादशशताब्दीप्रारम्भकालिकपण्डित इति मन्तव्यम्। हलायुधस्तु विविधविद्याविशारद आसीत्। अतोऽनेन बहवः सद्ग्रन्थाः कृताः, तन्मध्ये ब्राह्मणसर्वस्वं, पण्डितसर्वस्वं, शिवसर्वस्वं, न्यायसर्वस्वं, मत्स्यसूक्ततन्त्रं, अभिधानरत्नमाला, कविरहस्यनामकं व्याकरणञ्चेत्येते ग्रन्था: सुविख्याताः।

अथ छन्दःशास्त्रं षट्सु वेदाङ्गेष्वेकमङ्गमितीमं ग्रन्थं वेदाङ्ग-ग्रन्थत्वेन केचिदुपपादयन्ति। तन्मन्दम्, अत्र लौकिकच्छन्दो-लक्षणानामपि वर्त्तमानत्वेन निरवच्छिन्नवैदिकच्छन्दोलक्षण-निरूपणाभावात्। अन्ये तु शिक्षाकल्पादिषड्ग्रन्थविशेषानेव वेदाङ्गत्वेन वर्णयन्ति, तदपि मन्दम्, शाखान्तरीयशिक्षाकल्पादि-षड्ग्रन्थेषु वेदाङ्गत्वाभावप्रसङ्गात्। वस्तुतस्तु निरवच्छिन्न-वेदविषयकशिक्षाकल्पादिषड्जातीयविद्यासामान्यावबोधकग्रन्था वेदाङ्गत्वेन परिगण्यन्ते। एतेन नाव्याप्तिर्नातिप्रसक्तिश्च जायते।

अस्मिन् खलु पिङ्गलच्छन्दःसूत्रनामके ग्रन्थेऽष्टावध्यायाः सन्ति। तत्र प्रथमेऽध्याये, पारिभाषिकसञ्ज्ञा। द्वितीये, गायत्र्यादि-च्छन्दसामक्षरसङ्ख्या। तृतीये, गायत्र्यादिनानाविधवैदिक-च्छन्दसां लक्षणानि, पादव्यवस्थादिश्च। चतुर्थे, आर्य्यावैताली-यादिच्छन्दसामुक्तिः। पञ्चमे विषमार्द्धसमवृत्तकथनं। षष्ठे, यति-नियमः, षड्वर्णपादमारभ्य द्वादशाक्षरपादपर्य्यन्तानां छन्दसां गणविन्यासवैलक्षण्येन क्रमशो विभिन्नलक्षणकथनञ्च। सप्तमे, त्रयोदशाक्षरपादमारभ्य षड्विंशत्यक्षरपादपर्यन्तानां छन्दसां क्रमशो विभिन्नलक्षणानुकीर्त्तनम्। अष्टमे, गाथाप्रस्तारादि-निरूपणम्।

ग्रन्थोयमतीव दुर्लभः। श्रीराजेन्द्रलालमित्रमहाशयैरति-प्रयत्नेन श्रीबाबु अमृतलालमित्रमहाशयसकाशात्समानीय मुद्राङ्क-नकारणाय मह्यं प्रदत्तः। पुस्तकमिदं श्रीअमृतलालमित्रमहा-शयेन मुद्राङ्कनाय स्वेनैव दशभिर्द्वादशैर्वा पुस्तकैः परिशोधितं,

पिङ्गलच्छन्दःसूत्रसूचीपत्रम्।

पाठान्तरितञ्च, अत एवैतद् विद्वत्समादृतम्। एतत्पुस्तकधृत-पाठान्तरं पुस्तकान्तरपाठेतिशब्देन लक्षितं। एतएतदतिरिक्त-मन्यदपि पुस्तकद्वयं मया सङ्गृहीतं। तत्रैकमेसियातिकसोसा-इटीविद्यालयादानीतं ख,चिह्नितम्। अपर ममैव दग्धभाग्यस्य दग्धोभयपार्श्वं ग,चिह्नितम्।

एतत्पुस्तकत्रयसाहाय्यमवलम्ब्य यथामति परिशोधित मये-दम्। मदीयभ्रमवशतो मुद्राङ्कनादिदोषतो वा यत्तद्‌त्र स्खलितं तत्परहितनिरतैर्दयालुभिः सुधीभिर्मदपराधमपमार्ज्यैतत्पाठ-समये परिशोधनीयम्। अत्र या टिप्पनी यश्छन्दसामुपर्यधो गणाङ्कविन्यासः, यश्च वैदिकच्छन्दोदाहरणेषु स्वरादिन्यास, नैतत्सर्वं मल्लब्धपुस्तकेषु स्थितं। तत्तु मया पुस्तकान्तरेभ्यः सङ्गृह्य प्रदत्तं।

> छिद्रेष्वप्यत्र सन्तः सारमन्वेषयन्ति हि।
> यदत्र वर्त्तते सारं तत्तेषां भवतामहे॥

पिङ्गलच्छन्दःसूत्रसूचीपत्रम्।



पाठान्तरितञ्च, अत एवैतद् विद्वत्समादृतम्। एतत्पुस्तकधृत-पाठान्तरं पुस्तकान्तरपाठेतिशब्देन सूचितं। एतएतदतिरिक्त-मन्यदपि पुस्तकद्वयं मया सङ्गृहीतं। तत्रैकमेसियातिक्सोसा-इटीविद्यालयादानीतं ख,चिह्नितम्। अपरं ममैव दग्धभाग्यस्य दग्धोभयपार्श्वं ग,चिह्नितम्।

एतत्पुस्तकत्रयसाहाय्यमवलम्ब्य यथामति परिशोधितं मये-दम्। मदीयभ्रमवशतो मुद्राङ्कनादिदोषतो वा यत्रत्र स्खलितं तत्परहितनिरतैर्दयालुभिः सुधीभिर्मदपराधमपसार्य्यैतत्पाठ-समये परिशोधनीयम्। अत्र या टिप्पनी यश्छन्दसामुपर्य्यधो गणाङ्कविन्यासः, यश्च वैदिकच्छन्दोदाहरणेषु स्वरादिन्यासः, नैतत्सर्वं मत्सङ्ग्रहपुस्तकेषु स्थितं। तत्तु मया पुस्तकान्तरेभ्यः सङ्गृह्य प्रदत्तं।

द्विरेफष्षयः सन्तः सारमन्वेषयन्ति हि।
यदत्र वर्त्तते सारं तत्तेषां भवतान्मुदे॥

पिङ्गलच्छन्दःसूत्रसूचीपत्रम्।



(१२९) नवमालिनी न्जौ भ्याविति ॥ १८ ॥

यस्य पादे नकारजकारभकारयकारा भवन्ति(१) तद्वृत्तं नवमालिनी नाम । तस्योदाहरणम् ।

नगण जगण भगण यगण १

धवल-यशोंशुकेन, परिवीता,

नगण जगण भगण यगण

सकलजनानुराग,-घु सृ णा क्ता ।

१, २, ४, ८, ३२ १२८, २५६, ५१२, (९४४)

नगण जगण भगण यगण

दृढगुणबद्धकीर्त्ति,-कुसुमौघै,-

नगण जगण भगण यगण

स्तव नवमालिनीव, नृपलक्ष्मी.(२) ॥

अत्र वसुसमुद्रैर्यतिरित्याम्नायः ॥

इति भट्टहलायुधकृतायां पिङ्गलच्छन्दोवृत्तौ षष्ठोऽध्यायः ॥

जगतीद्वादशाक्षरप्रस्तारस्य सप्तदशाधिकपञ्चशततमो भेदो वाहिनीतिनाम्ना प्रसिद्धः । अत्र पादस्य सप्तमे द्वादशेऽक्षरे च यतिः कर्त्तव्या । मदैवेत्यत्र वकारस्य गर्भो इति गुरुत्वनिर्देशः ।

१ नगणजगणौ भगणयगणौ च भवत इति ख०, पुस्तकान्तरपाठः ।

२ जगतीद्वादशाक्षरप्रस्तारस्य चतुश्चत्वारिंशदधिकनवशततमो भेदो नवमालिनीति नाम्ना ख्यातः । नवमालिकेति वृत्तरत्नाकरम् । अत्र पादस्य अष्टमे द्वादशे चाक्षरे यतिः कर्त्तव्या ।

अथ सप्तमोऽध्यायः ।

—॰॰—

इदानीमतिजगतीशक्वर्यतिशक्वर्यष्टिरत्यष्टिर्धृतिरतिधृति चेति सप्त अतिच्छन्दांसि(१) एकैकपादाक्षरवृद्ध्या क्रमेणोद गीयन्ते(२)। तत्रातिजगत्याम ।

(१४०) प्रहर्षिणी(३) म्नौ ज्रौ ग् त्रिकदशकौ ॥ १ ॥

यस्य पादे मकारनकारजकाररेफगकारा(४) भवन्ति, तत् प्रहर्षिणी(५) नाम । त्रिभिर्दशभिश्च यति । तत्रोदाहरणम ।

मगण नगण जगण रगण ग०

उत्तुङ्ग-स्तन क ल श द यो न्न ता ङ्गी,

८ १६ ३२ ६४ २५६ १०२४ (१४०१)

मगण नगण जगण रगण ग०

लोलाक्षी, विपुलनितम्बशालिनी च।

---

१ चतुर्थाध्याय द्वितीय द्वितीयमलिन इत्यमीनामानिति शेष अत्र शर्करीत्यत्र शक्करी शक्वरीति च पाठद्वय श्रेयम।

२ क्रमेण दार्शयन्त इति ख० ग० पुस्तकान्तरपाठय।

३,५ प्रहर्षणीति ख०, पुस्तकान्तरपाठय।

४ मगणनगणौ जगणरगणगकारा इति ख० पुस्तकान्तरपाठय।

मगण नगण जगण रगण गु०

बिम्बोष्ठी, नरवरमुष्टिमेयमध्या,

मगण नगण जगण रगण गु०

सा नारी, भवति मनःप्रहर्षिणीति(१) ॥

(१८१) रुचिरा ज्भौ स्जौ ग् चतुर्नवकौ(२) ॥ २ ॥

यस्य पादे जकारभकारौ सकारजकारौ गकारश्च,(३) तद्वृत्तं रुचिरा नाम । चतुर्भिर्नवभिश्च यतिः । तत्रोदाहरणम् ।

जगण भगण सगण जगण गु०

मृगत्वचा, रुचि र त रा म्ब र क्रि यः,(४)
१ ४ १६ ३२ ६४,१२८, ५१२ १०४८(१८०२)

जगण भगण सगण जगण गु०

कपालभृत्, कपिलजटाग्रपल्लवः ।

---

१ भवतु मनःप्रहर्षिणी न इति ख० । भवतु मनःप्रहर्षिणी ते इति ग० । भवति मनःप्रहर्षिणी न इति पुस्तकान्तरपाठः ।

अतिजगतीछन्दसः पादघटकीभूतानां त्रयोदशाक्षराणां प्रस्तारे क्रियमाणे एकाशीतिनवत्यधिकाष्टसहस्रभेदा जायन्ते, तत्र चतुःशतैकाधिकैकसहस्रतमो भेदः प्रहर्षिणीतिनाम्ना स्यात् ।

२ समुद्रनवकाविति ख० पुस्तकान्तरपाठश्च ।

३ जगणभगणौ सगणजगणौ गश्चेति ख० । जगणभगणौ सगणजगणौ गुरुश्चेति ग० ।

४ हनरुचिराम्बरक्रिय इति ख०, पुस्तकान्तरपाठश्च ।

जगण भगण सगण जगण गु०

ललाटदृग्‌दहनहुतीकृतस्मरः,

जगण भगण सगण जगण गु०

पुनातु वः, शिशुशशिशेखरः शिवः।(१) ॥

(२१२) मत्तमयूरं(२) म्तौ य्सौ ग् समुद्रनवकौ ॥ ३॥

यस्य पादे मकारतकारौ यकारसकारौ गकारश्च, तद्वृत्तं मत्तमयूरं नाम(३)। पूर्ववद्यतिः। तत्रोदाहरणम्।

मगण तगण यगण सगण गु०

व्यूढोरस्कः, सिंहसमानानन म ध्यः,(४)
(१६२२) २२,१७. ४१२,०२४

मगण तगण यगण सगण गु०

पीनस्कन्धो, मांसलहस्तायतबाहुः(५)।

---

१ एतत्त्रयोदशाक्षरप्रस्तारस्य षट्शतषडधिकद्विसहस्रतमो भेदो रुचिरेति नाम्ना ख्यातः। रुचिरवृत्तमिति एतदाकरम्। अत्र पादस्य चतुर्थे अक्षरोपरि च यति' रुक्ता।

* मत्तमयूर इति ख०, ग०, पुस्तकान्तरपाठः।

२ मगणतगणयगणसगणगकारा भवन्ति, तन्मत्तमयूरं नामेति ख०, ग०, पुस्तकान्तरपाठः।

४ सिंहसमानानमहर्जितिरिति ख०, ग० च। सिंहसमानानमहर्जितिरिति पुस्तकान्तरपाठः।

५ मांसलहस्तायतबाहुरिति ख०, पुस्तकान्तरपाठः।

मगण तगण यगण सगण गु०

कम्बुग्रीवः, स्निग्धशरीरस्तनुलोमा,

मगण तगण यगण सगण गु०

भुङ्क्ते राज्यं, मत्तमयूराकृतिनेत्रः(१) ॥

(१४२) गौरी नौ न्मौ ग्(२) ॥ ४ ॥

यस्य पादे नकारत्रयं मकारो गकारश्च, सा गौरी(३) । तस्योदाहरणम् ।

नगण नगण नगण मगण गु०

सकलभुवनजनगणनतपादा,

१ २ ४ ८,१६,३२,६४,१२८,२५६,५१२ १०२४(२०४८)

नगण नगण नगण मगण गु०

निजपदभजनशमितविपादा ।

---

१ एतच्च त्रयोदशाक्षरप्रस्तारस्य षट्पञ्चाशदधिकैकसहस्रतमो भेदो मत्तमयूरेतिनाम्ना विख्यातः । अत्र पादस्य चतुर्थे नवमे च यतिर्बोध्या ।

२ मूलग्रन्थपाठे नेदं सूत्रं पठितम् ।

३ नगणौ नगणमगणौ गुरुश्च यत्र सा गौरीति सू०, पुस्तकान्तरपाठः ।

नगण नगण नगण सगण गु०

विजितसरसिरुहनयनपद्मा

नगण नगण नगण सगण गु०

भरतु सकलमिह भवति गौरी(१) ॥

प्रकीर्य्याम(२) ॥

---

१ जयति गौरीति पुस्तकान्तरपाठः । ख० ग० पुस्तके तु नेदमुदाहरणमस्ति । उक्तयथोदाहरणप्रस्तारस्याद्यन्ताद्विंशदधिकद्विशततमो भेदो गौरीतिनाम्ना ख्यातः ।

अतिजगत्यामस्य ग्रन्थे यानि वृत्तान्युक्तानि तेषां मध्ये मुद्रितवृत्तरत्नाकरग्रन्थे गौरी नास्ति, ततोऽधिकं चपलामञ्जुभाषिणीति वृत्तद्वयमस्ति । सटीकामुद्रितवृत्तरत्नाकरे तु चपलाचन्द्रिकामञ्जुभाषिणीचञ्चरीकावलीति वृत्तचतुष्टयमस्ति । तद्यथा, तुरगरसयतिर्नौ ततौ ग चपला । सजसा जगौ भवति मञ्जुभाषिणी । ननतरगुरुभिश्चन्द्रिकाश्वर्तुभिः । यमौ रौ विख्याता चञ्चरीकावली ग इति । मुद्रितछन्दोमञ्जर्यान्तु ननततगुरुभिश्चन्द्रिकाश्वर्तुभिरिति चन्द्रिकालक्षणमस्ति । तत्रैव उत्पलिनीति नामान्तरमप्युक्तम् । पुनरत्रैव अतिजगत्यामेतद्ग्रन्थे अनुक्तानि यानि वृत्तानि सन्ति, तानि यथा, नयुगलसयुगलगैरिति चण्डी । नजसा जगौ च भवति प्रबोधिता । सजसा सगौ च कथितं कलहंसम् । भवति रुमेन्द्रमुख नजौ जरौ ग इति । अत्र प्रबोधितामञ्जुभाषिण्योर्नामान्तरं लक्षणन्त्वेकमेव । मञ्जुभाषिण्याः सुनन्दिनीति कलहंसस्य च सिंहनाद इति नामान्तरमप्यत्रोक्तम् । परिशिष्टे नन्दिनीति कलहंसनामान्तरं । इह नन्दिनी सजससैर्गुरुणेति लक्षणम् । परिशिष्टे अतिजगत्यामेभ्योऽप्यधिकानि वृत्तान्युक्तानि । तानि यथा, नभरधुसैश्चन्द्ररेखां लोके । इह कन्दुक यत्र येश्चतुर्भ्यो ग । उपस्थितमिदं जसौ तौ यदि गुरु स्यात् । ऋतुमुनियति विद्युन्नौ मौ गुरु । जभौ सजौ गौ भवति कञ्जहासिनी । कुटजगतिर्नजौ पचगं भौ गुरु, इति । परिशिष्टोक्तेन कन्दुकलक्षणेन सह भुजङ्गप्रयातस्य सिद्धान्त पूर्ववदुपजातयो बोध्याः । मुद्रितामुद्रितवृत्तरत्नाकरयोः चपलालक्षणे वैलक्षण्यमस्ति ।

१ प्रकर्षीमिति पुस्तकान्तरपाठः ।

(२५४) असम्बाधा म्तौ न्सौ गाविन्द्रियनवकौ ॥ ५ ॥

यस्य पादे मकारतकारौ नकारसकारौ(१) गकारौ च भवतः, तद्वृत्तमसम्बाधा नाम। पञ्चभिर्नवभिश्च यतिः। तत्रोदाहरणम्।

मगण तगण नगण सगण गु० गु०

भङ्क्त्वा दुर्गाणि, द्रु म व न म खि लं छि त्वा,

(२०१७) ३२,६४,१२८,२५६,५१२,१०२४

मगण तगण नगण सगण गु० गु०

हत्वा तत्सैन्यं, करितुरगबलं हत्वा।

मगण तगण नगण सगण गु० गु०

येनासम्बाधा, स्थितिरजनि विपक्षाणां,

मगण तगण नगण सगण गु० गु०

सम्राडुर्वीनाथः, स जयति नृपतिर्मुञ्जः(२) ॥

---

१ मगणतगणनगणसगणा इति ख०, पुस्तकान्तरपाठः।

२ षट्पञ्चाशदक्षर शर्करीत्युक्तलक्षणशर्करीपादघटकीभूतानि चतुर्दशाक्षराण्येवोपलक्ष्यन्ते। तेषां अर्थप्रस्तारे क्रियमाणे त्रिशतचतुरशीत्यधिकषोडशसहस्रभेदा भवन्ति। तत्र सप्तदशाधिकद्विसहस्रतमो भेदोऽसम्बाधेतिनाम्ना प्रसिद्धः। अत्र पादस्य पञ्चमे नवमेऽक्षरे च यतिः कर्त्तव्या। छन्दोमञ्जर्यां "म्तौ न्सौ गौ ग्रहनवभिरसम्बाधा" इति विभिन्नलक्षणमस्ति।

(५४) प्रहरणकलिता नौ भ्नौ लगौ च ॥ ७ ॥

यस्य पादे नकारौ भकारनकारलकारगकाराश्च तद्वृत्तं(१) प्रहरणकलिता नाम। चकारात् पूर्वोक्तैव यतिः। तदोदाहरणम्।

नगण नगण भगण नगण ल० गु०

सुरमुनि म नु जैः, उ प चि त च र णां

१,१,४,८ १६ ३२,(८११८)१०८ ३१६ ३२०,१०२४,२०४८,४०९६

नगण नगण भगण नगण ल०गु०

रिपुभयचकित,-त्रिभुवनशरणाम्(२)

नगण नगण भगण नगण ल०गु०

प्रणमत महिषा,-सुरतनुकुपितां,(३)

नगण नगण भगण नगण ल०गु०

प्रहरणकलितां, पशुपतिदयिताम्(४) ॥

---

१ नगणौ भगणनगणलघुकारगकाराश्च भवन्तीति ख०, ग०, पुस्तकान्तरपाठः।

२ त्रिभुवनशरणामिति ख०, ग० पुस्तकान्तरपाठः।

३ महिषासुरवधकुपितामिति ख०, ग०, पुस्तकान्तरपाठः।

४ उक्तचतुर्दशाक्षरप्रस्तारस्यैकत्रिंशाधिकाष्टसहस्रतमो भेदः प्रहरणकलितेतिनाम्ना ख्यातः प्रहरणकलिकेति छन्दोमञ्जरीछन्दोमाकरोक्तपाठः। यत्रापि पादस्य मध्ये चतुर्दशाक्षरे यतिसंज्ञा।

(२४५) अपराजिता नौ र्सौ ल्गौ स्वर र्षयः(१) ॥ ६ ॥

यस्य पादे नकारौ रेफसकारलकारगकाराश्च,(२) तद्वृत्तमपराजिता(३) नाम। सप्तभिः सप्तभिश्च यतिः। तत्रोदाहरणम्।

नगण नगण रगण सगण ल०गु०

फणिपति व ल यं, ज टा मु कु टो ज्ज्व लं,

१, २, ४, ८, १६, ३२, १२८ ५१२ १०२४,(५८२४)४०९६

नगण भगण रगण सगण ल०गु०

मनसिजमथनं, त्रिशूलविभूषितम्।

नगण नगण रगण सगण ल०गु०

स्मरसि यदि सखे, शिवं शशिशेखरं

३

नगण भगण रगण सगण ल०गु०

भवति तव तनुः, परैरपराजिता(४) ॥

---

१ स्वरर्षय इति ख०, ग०, पुस्तकान्तरपाठः।

२ नगणौ रगणसगणलकारगकाराश्चेति ख०, ग०, पुस्तकान्तरपाठः।

३ तदपराजितेति पुस्तकान्तरपाठः।

४ मनुजैरपराजितेति ख०, ग०, पुस्तकान्तरपाठः। नक्षचतुर्दशाक्षरपरमा-रम्याद्दृष्टचतुर्विंशत्यधिकपञ्चसहस्रतमो भेदोऽपराजितेतिनाम्ना प्रसिद्धः। अत्र पादस्य सप्तमे चतुर्दशेऽक्षरे यतिर्बोध्या।

(१४९) प्रहरणकलिता नौ भनौ ल्गौ च ॥ ७ ॥

अस्य पादे नकारो भकारनकारलकारगकाराश्च तद्वृत्तं(१) प्रहरणकलिता नाम। चकारात् पूर्वोक्तैव यतिः। तत्रोदाहरणम्।

नगण नगण भगण नगण ल० गु०

सुरमुनि म नु जै, रु प चि त च र णां

१ २,४ ८ १६ ३२,(८११२८)१२८ २५६ ५१२,१०२४,२०४८,४०९६

नगण नगण भगण नगण ल०गु०

रिपुभयचकित,-त्रिभुवनशरणम्(२)

नगण नगण भगण नगण ल०गु०

प्रणमत महिषा,-सुरतनुकुपितां,(३)

नगण नगण भगण नगण ल०गु०

प्रहरणकलितां, पशुपतिदयिताम्(४) ॥

---

१ नगणौ भगणनगणलकारगकाराश्च भवन्तीति ख० ग०, पुस्तकान्तरपाठश्च।

२ त्रिभुवनशरणमिति ख०, ग० पुस्तकान्तरपाठश्च।

३ महिषासुरतनुकुपितामिति ख०, ग०, पुस्तकान्तरपाठश्च।

४ उक्तचतुर्दशाक्षरप्रस्तारस्यैकत्रिंशदधिकाष्टसहस्रतमो भेदः प्रहरणकलितेतिनाम्ना ख्यातः प्रहरणकलिकेति छन्दोमञ्जरीछन्दोरत्नाकरोक्तपाठः। यद्यपि पादस्य मध्ये चतुर्दशाक्षरे यतिर्ज्ञेया।

(१८७) वसन्ततिलका त्भौ जौ गौ ॥ ८ ॥

यस्य पादे तकारभकारौ जकारौ(१) गकारौ च, तद्वृत्त(२) वसन्ततिलका नाम। तत्रोदाहरणम्।

तगण भगण जगण जगण गु० गु०

उद्धर्षिणी(३) जनदृशां स्तनभारगुर्वी,

४ ११,२१,६४, १२६,२२९, १०४८,(१९११)

तगण भगण जगण जगण गु० गु०

नीलोत्पलद्युतिमलिम्लुचलोचना च।

तगण भगण जगण जगण गु० गु०

सिंहोन्नतत्रिकतटी कुटिलालकान्ता,

तगण भगण जगण जगण गु० गु०

कान्ता वसन्ततिलका नृपवल्लभाऽसौ(४) ॥

पादान्ते यतिः।

---

१ [illegible] इति ख०, ग०, पुस्तकान्तरपाठः।

२ तदिति ख०, ग०, पुस्तकान्तरपाठः।

३ उद्धर्षिणीति ख० ग०, पुस्तकान्तरपाठः।

४ [illegible] भेदो [illegible] [illegible] । [illegible] । [illegible] । [illegible] इति [illegible] ।

(१८८) सिंहोन्नता काश्यपस्य ॥ ९ ॥

इयमेव वसन्ततिलका काश्यपस्याचार्य्यस्य मतेन(१) सिंहोन्नता नाम भवति। पूर्व्वमेवोदाहरणम्।

(१८९) उद्धर्षिणी सैतवस्य ॥ १० ॥

इयमेव वसन्ततिलका सैतवस्याचार्य्यस्य मते उर्षिणी नाम। पूर्व्वमेवोदाहरणम्।

अतिशर्क्वर्य्याम्।

---

१ काश्यपमते इति ख०, पुस्तकान्तरपाठश्च। काश्यपस्य मते इति ग०।

काश्यपेनाचार्य्येण वसन्ततिलका सिंहोन्नतनाम्ना व्यवह्रियते। सिंहोन्नतेति छन्दोमञ्जरी। सैतवेनाचार्य्येणाप्येव वसन्ततिलका उद्धर्षिणीतिनाम्ना व्यवह्रियते। अतएव वसन्ततिलकाया एकस्मिन्नेवोदाहरणे सिंहोन्नतोद्धर्षिणीवसन्ततिलकेति त्रीणि नामानि निवेशितानि सन्ति। मत्स्यभट्टीकवृत्तरत्नाकरे तु काश्यपमते सिंहोन्नतेति नाम स्थापितम्। पुनरत्रैव रामेण सेयमुदिता मधुमाधवीति सूत्रान्तरमस्ति। अत्र वृत्तरत्नाकरटीकायां 'शोभावतीत्यन्ये' इत्युक्तम्। तथाहि वसन्ततिलकाया मतान्तरस्थानि सिंहोन्नतोद्धर्षिणीमधुमाधवीशोभावतीति चत्वारि नामानि सन्ति। सर्व्वेषामत्र ग्रन्थे यानि वृत्तान्युक्तानि, ततोऽधिक वृत्तिवृत्तरत्नाकरे एतद् वृत्तद्वय मस्ति। तद्यथा, इन्दुवदना भजसनैः सगुरुयुग्मैः। द्विसप्तच्छिदलोला म्सौ म्यौ गौ चरणे चेदिति। सुदितच्छन्दोमञ्जर्य्यान्तु एतद् वृत्तद्वयमधिकमस्ति। तद्यथा, मातो नो मो गौ यदि गदिता वासन्तीयम्। शरभिदि यदि नौ तौ च नान्दीमुखी गौ इति। वृत्तरत्नाकरपरिशिष्टे तु एतदतिरिक्तान्यपि वृत्तान्युक्तानि, तानि यथा, ननतजगुरुकैर्मन्मथतिर्नदी स्यात्। लक्ष्मीरन्नविरामा ममौ ससगुरुयुगमम। त्रिननगगिति मधुपति सुपवित्रम्। मध्यक्षामा युगदशविरमा म्यौ न्यौ गौ। नज भजला गुरुश्च भवति प्रमदा। सजसा यलौ तिति शरप्रदेमञ्जरी। ननभजगैर्गुरुश्च

(१५०) चन्द्रावर्त्ता नौ नौ स् ॥ ११ ॥

यस्य पादे नकाराश्चत्वारः(१) सकारश्च, तच्चन्द्रावर्त्ता नाम(२) । तत्रोदाहरणम् ।

नगण १ नगण २ नगण ३ नगण ४ सगण

पटुजव प व न-च लि त ज ल ल ह री,

१ २,४ ८,१६,३२,६४,१२८,२५६,५१२ १०२४,२०४८,४०९६,८१९२ १६३८४

नगण १ नगण २ नगण ३ नगण ४ सगण

तरलितविहग-निचयरवमुखरम्(३) ।

नगण १ नगण २ नगण ३ नगण ४ सगण

विकसितकमल-सुरभिशुचि सलिलं,

नगण १ नगण २ नगण ३ नगण ४ सगण

विचरति पथिक, मनसि शरदि सरः(४) ॥

अत्र स्वरैर्न्नैर्यतिरित्याम्नायः ॥

यद्वद् कुमारी। नगरैः सैर्भौ च रचिता सुकेसरम्। भौ न्यौ लगौ चेदिह भवति च चन्द्रौरस। वाचस्पतीय शरादिह बत्व भतौ न्यौ गौ चेत्। चलमदमिद भमनलगुरुभि, रति। मुद्रितछन्दोमञ्जर्याम्, ननननगणघटित चामरीत्वमस्ति। चन्द्रावर्त्ताजगत्यधिकारे पठितया मञ्जुभाषिणा सह शर्कर्यधिकारे परिशिष्टोक्तया मञ्जर्यां निगमादिवत्सामान्यधर्मिका पूर्वपदुपजातयो बोध्या।

१ नकाराश्चत्वार इति ख०, पुस्तकान्तरपाठश्च।

२ तद् न चन्द्रावर्त्ता नामेति ख०, ग०, पुस्तकान्तरपाठश्च।

३ विहगनिचयरवमुखरमिति पुस्तकान्तरपाठः।

४ अष्टाक्षरमात्रकंगीत्यादनादतिशर्कर्यां पञ्चदशाक्षरे पादे उपमन्यते। तत्र

(२६१) मालर्त्तुनवकौ चेत् ॥ १२ ॥

सैव चन्द्रावर्त्ता माला नाम भवति, यदा षष्ठे नवमे च वर्णे(१) यतिः । तत्रोदाहरणम् ।

नवविकसित,-कुवलयदलनयने,
निशमय नव,-जलधरमिव गगणे।
अपनय रुष, मुपसर मम सविधं,
यदि रतिसुख, मभिलषसि बहुविधम्(२) ॥

(२६२) मणिगणनिकरो वस्वृषयः ॥ १३ ॥

सैव चन्द्रावर्त्ता मणिगुणनिकरो नाम भवति, यदा अष्टभिः सप्तभिश्च यतिः । तत्रोदाहरणम् ।

वर्णप्रस्तारनियमेन प्रस्तारे कृते सप्तशताष्टषष्ट्यधिकद्वात्रिंशत्सहस्रभेदा जायन्ते । तत्र त्रिंशच्चतुरशीत्यधिकषोडशशततमो भेदश्चन्द्रावर्त्तेति नाम्ना ख्यातः । सर्वैक गुरुके पादे चन्द्रावर्त्तेति नाम प्रवेष्टुमशक्यमिति न प्रवेशितम् । अतएव हलायुधाद्याचार्यैः शशिकलेति नाम स्थापितम् ।

१ षष्ठे वर्णे नवमे चेति ख०, पुस्तकान्तरपाठः ।

२ अत्र चन्द्रावर्त्तालक्षणं समस्तं वर्त्तते । परन्तु प्रथम पादस्य षष्ठे ततो नवमे च वर्णे यतिर्भवतीति विशेषः । एतेन गणभेदवद्यतिभेदेऽपि नामभेदो भवतीति सूचितम् । मालतिनाम्नि द्विगुर्वन्तस्वत्वेनैकगुरुकैतदुदाहरणपादे प्रवेष्टुमशक्यत्वान्न तत् प्रवेशितम् । अतएवास्या अन्येऽन्यकर्त्तृभिः शशिति नामान्तरं स्थापितम् । एवं मणिगुणनिकरेऽपि चन्द्रावर्त्तालक्षणं समस्तं वर्त्तते, परन्तु पादस्य प्रथममष्टमे ततः सप्तमे च यतिर्भवतीति विशेषः । यतिभेदेन नामभेदोऽपि ज्ञातव्यः ।

कथमपि निपतित,-मतिमहति पदे,
नरमनुसरसि न, फलमनुपचितम् ।
अपि वरयुवतिषु कुचतटनिहतः,
स्पृशति न वपुरिह, मणिगुणनिकरः ॥

(१५१) मालिनी नौ म्यौ य्(१) ॥ १४ ॥

यस्य पादे नकारौ मकारयकारौ यकारश्च भवति, तद्वृत्त(२) मालिनी नाम, यदाष्टभिः ससभिश्च यतिः(३) । तस्योदाहरणम् ।

नगण नगण मगण यगण यगण
अतिविपुलललाटं, पीवरोरः कपाटं,

नगण नगण मगण यगण यगण
सुघटितदशनोष्ठं, व्याघ्रतुल्यप्रकोष्ठम् ।

नगण नगण मगण यगण यगण
पुरुषमशनिलेखा,-लक्षणं वीरलक्ष्मी,-

नगण नगण मगण यगण यगण
रतिसुरभियशोभि,-र्मालिनी चाभ्युपैति(४) ॥

अष्टौ ।

---

१ म्यौ य् चेति ख० । म्यौ य् च यस्याय इति ग० ।

२ पादे नगणौ मगणो यगणो च तद्वृत्तमिति ग०, पुस्तकान्तरपाठश्च ।

३ पूर्वं य नैरिति ख०, ग० पुस्तकान्तरपाठश्च ।

४ चाभ्युपैतीति ख० ग० च । पञ्चपञ्चदशाक्षरप्रस्तारस्य षट्शतद्विषष्ट्युत्तरेषु

(२५४) ऋषभगजविलसितं भ्रौ नौ न्गौ स्वरनवकैः॥१४॥

यस्य पादे भकाररेफौ नकारत्रयो गकारश्च तद्वृत्तं(१) ऋषभगजविलसितं नाम। सप्तभिर्नवभिश्च यतिः॥ तस्योदाहरणम्।

भगण रगण नगण नगण नगण गु०

आयतबाहुदण्ड,-सु प चि त पृ थु हृ द यं,

२ ४ १६ ६४ १२८ २५६ ५१२ १०२४ २०४८ ४०९६, ८१९२, १६३८४, ३२७२७

भगण रगण नगण नगण नगण गु०

पीनकटिप्रदेश,-मृषभगजविलसितम्।

मदयन्तकी भेदो मालिनीति गाथा स्यात्। अत्र पादस्य सप्तमे पञ्चदशे चाक्षरे च यतिर्बोध्या।

अतिशक्वर्यामत्र यानि वृत्तान्युक्तानि मुद्रितवृत्तरत्नाकरे ततोऽधिकमेतानि वृत्तानि सन्ति, तानि यथा, भवति नजौ भजौ रसहितौ प्रभद्रकम्। मञ्जा नयौ गरयुक् पतिरियमेला। म्नौ म्यौ याम्यौ भवेतां मत्ताष्टभिश्चन्द्रलेखा इति। एतत्परिशिष्टे तु प्रभद्रकस्य सुकेसरमिति नाम स्थापितम्। वृद्धिच्छन्दोमञ्जर्याम् एतेऽधिकान्येतानि वृत्तानि सन्ति, तानि यथा, रकन्यन्यौ विपुलाभापादौ चेल्लोलाचेत्। शिशिर-लितक नभनरैश्च्युतैर्भवेत्। सूतक समानिकापदद्वयं चित्रास्थितम्। चित्रा नाम च्छन्दसि मवेत् नयौ मा यकारौ इति। वृत्तरत्नाकरपरिशिष्टे लीलाखेलस्य कामक्रीडेति नाम स्थापितम्। वृत्तोऽप्यधिकानि वृत्तरत्नाकरपरिशिष्टे उक्तानि वृत्तानि यथा, ननतभरहृताश्च स्वरैरुपमालिनी। ऋषभाख्यमेतदुदितं भजसा नयौ चेत्। विपि-नतिलक नसनरेफयुग्मैर्भवेत्। उदयश्रि मालभारिणनाम नजौ भजर्। नगकै-श्चिवक्रमितैर्गदिता नलिनी। अथ निश्चयपान्तकमिदं भजननाश। चन्द्रकान्ताभिधा रौ म्सौ विरामः स्वराष्टाभिरिति। अत्र तोटकनलिन्यो नवमादिषमाचरणिका पूर्ववदुपजातयो बोध्याः।

१ भकाररेफौ नकारत्रयो गकारश्च भवति तदिति ख०, ग०, पुस्तकान्तरपाठः।

भगण रगण भगण भगण भगण गु॰

वीरमुदारसत्त्व-मतिशयगुणगमिकं,

भगण रगण भगण भगण भगण गु॰

श्रीरतिचञ्चलापि, न परिहरति पुरुषम्(¹) ॥

अत्यष्टी ।

---

१ अत्र अष्टयाख्यच्छन्दसि षोडशाक्षरः पादो भवति। तस्य वर्णप्रस्तार-नियमेन प्रस्तारे कृते सर्वगुर्वादिसर्वलघ्वन्ताः पञ्चषष्टिसहस्रपञ्चशतषट्त्रिंशद्भेदा जायन्ते। तत्र सप्तदशसहस्रपञ्चशताधिकद्वाविंशतिसहस्रतमो भेद ऋषभगज-विलसितेतिनाम्ना प्रसिद्धः अस्य पादस्य सप्तमे षोडशेऽक्षरे च यतिः कर्तव्या। गजतुरगविलसितमित्यपि नामान्तरमस्य।

अष्टावत्र च्छन्दः कथितं ततोऽधिकं मुद्रितवृत्तरत्नाकरे वृत्तमेकमुक्तम्, तद्यथा नजभजरैः सदा भवति वाणिनी गयुक्तैरिति। मुद्रितच्छन्दोमञ्जर्यां त्वन्-यान्यधिकानि वृत्तान्युक्तानि यथा, चित्रमञ्जर्यामीरितं सभागिकापदद्वयं तु। भात्र समतनगैरथच्छन्दे व्यादिष्ट चकिता। भौ मो भौ गो मदनललिता वेदैः षड्तुभिः। यमौ न सौ गश्च प्रवरललितं नाम वृत्तम्। द्विगुणितवसुलघुभि-रचलधृतिरिह। सप्तदश नजौ भजतगा यदा सुनन्दा इति। वृत्तरत्नाकरपरिशिष्टे तु भ सनभनगा यदा मार्कण्डेय चकितेति चकितालक्षणम्। इतोऽप्यधिकानि वृत्तानि वृत्तरत्नाकरपरिशिष्टे प्रोक्तानि, यथा चित्रमञ्जर्यामीरितं रजौ रजौ रगौ च वृत्तम्। जगौ जगौ ततो जगौ च पञ्चचामरं वदेत्। सङ्ख्यिता भरौ नरनगाश्च धीरल-लिता। पञ्चभकारयुताश्च गतिर्यदि चाम्बरम्। भजाभभैन मेन च स्थाम्यणिकल्पलता। यस्मिन् सर्वे गा राजन्ते ब्रह्मरूपकं नाम। मदाद्रैर्मदनललिता मो भो नमलगा। भो रयना सगौ च यस्यां वरयुवतिरियम् इति। लघुगुरुनिरन्तरं यदा स पञ्च-चामरम्। पञ्चभकारयुताश्च गतिर्यदि चाम्बरम्। इति मुद्रितच्छन्दोमञ्जर्यामुद्रित सटीकवृत्तरत्नाकरे षष्ठाधिकारे भूय एव पठितम्। एतेषां सूत्रवदुद्दिष्टक्रियाद्वा-रेण प्रस्तारभेदसङ्ख्यानिर्देशः करणीयः। अतिकृत्यधिकारे परिशिष्टोक्तेन सुखेनकष्टेन च षष्ठाधिकारे छन्दोमञ्जर्युक्तस्य मदकलतल्लजस्य मिश्रणात् पूर्व-वदिषमाधरधर्मिका उपजातयो बोद्धव्या।

अथ दशी ।

(११५) हरिणी न्सौ म्रौ स्लौ ग् ऋतुसमुद्रऋषयः(१) ॥१५॥

यस्य पादे नकारसकारमकाररेफाः सकारलकारगकाराश्च,(२) तद्वृत्तं हरिणी नाम । षड्भिश्चतुर्भिः सप्तभिश्च यतिः ॥ तत्रोदाहरणम् ।

कुवलयदल, श्यामा पीना, नतस्तनशालिनी,
चकितहरिणी, नेत्रच्छाया,-मलिम्लुचलोचना ।
मनसिजधनु,-र्ज्यानिर्घोषै, रिव श्रुतिपेशलै,-
मनसि ललना, लीलालापैः, करोति ममोत्सवम् ॥

१. एतद्वृत्तमविन्सितमित्यपरे ।

(११६) पृथ्वी ज्सौ ज्सौ य्लौ ग् वसुनवकौ ॥ १६ ॥

यस्य पादे जकारसकारौ पुनस्तौ यकारलकारगकाराश्च, तद्वृत्तं पृथ्वी नाम(३) । अष्टभिर्नवभिश्च यतिः ॥ तत्रोदाहरणम् ।

हताः समिति पाण्डव,-स्त्रिभुवने प्रकीर्णं यशः,
कृतश्च गुणिनां गृहे, निरवधिर्महानुत्सवः ।

---

१ रससमुद्रऋषय इति पुस्तकान्तरपाठः ।

२ नगणसगणमगणरगणसगणलकारगकाराश्चेति ख०, ग० च ।
नकारसकारमकाररकारसकारलकारगकाराश्च भवन्तीति पुस्तकान्तरपाठः ।

३ जगणसगणौ पुनर्जगणसगणौ यगणलकारगकाराश्च यत्र पृथ्वी नामेति ख०, पुस्तकान्तरपाठश्च ।

त्वया ज्ञातपरिग्रहे, सुदिनवीरसिंहात्मजे,(१)
नितान्तनिरवग्रहा, फलवती च पृथ्वी कृता ॥

(१५७) वंशपत्रपतितं भ्रौ न्भौ न्लौ ग् दिग्मुनयः ॥ १७ ॥

यस्य पादे भकाररेफनकारभकारनकारलकारगकारा(२) भवन्ति, तद्वृत्तं वंशपत्रपतितं नाम। दशभिः सप्तभिश्च यतिः। तस्योदाहरणम्।

अद्य कुरुष्व कर्म्म सुकृतं, यदि परदिवसे,
मित्र विधेयमस्ति भवतः, किमु चिरयसि तत्।
जीवितमल्पकालकलना,-लघुतरतरलं,
नश्यति वंशपत्रपतितं, हिमसलिलमिव ॥

(१५८) मन्दाक्रान्ता म्भौ न्तौ त्गौ ग् समुद्रर्तुस्वराः ॥१८॥

यस्य पादे मकारभकारनकारतकारतकारा(३) गकारौ च, तन्मन्दाक्रान्ता नाम। चतुर्षु षट्सु सप्तसु च यतिः। तस्योदाहरणम्।

प्रत्यादिष्टं, समरशिरसः, कान्दिशं प्राप(४)नष्टं,
त्वं निःशेषं, कुरु रिपुबलं, मार्गमासाद्य सद्यः।

---

१ तुडिगवीरसिंहात्मजे इति ख०, पुस्तकान्तरपाठश्च।

२ भगणरेफनगणभगणनगणलकारगकारास्तदिति ख०, पुस्तकान्तरपाठश्च।

३ मगणभगणनगणतगणतगणाविति ख०, पुस्तकान्तरपाठश्च।

४ कान्दिशीभवेति ख० [illegible]

किं नाश्रौषीः, परिणतधियां, नीतियोग्योपदेशं(१)
मन्दाक्रान्ता, भवति फलिनी, वारिलक्ष्मीः क्षयाय ॥

(१०९) शिखरिणी य्मौ न्सौ भ्लौ गृतुरुद्राः ॥ १९ ॥

यस्य पादे यकारमकारनकारसकारभकारलकारगकारास्तद्वृत्तं(२) शिखरिणी नाम। षट्स्वेकादशसु च यतिः। तत्रोदाहरणम्।

यशःशेषीभूते, हृदि गगननाथे,(३) गुणनिधौ,
प्रवृत्ते वैराग्ये, विषयरसनिष्क्रान्तमनसाम्।
इदानीमस्माकं, घनतरुलतां निर्झरवतीं,
तपस्तप्तुं चेतो, भजति गिरिमालां शिखरिणीं ॥

धृत्याम्(४)।

(११०) कुसुमितलतावेल्लिता म्तौ न्यौ यावन्द्रियर्त्तुस्वराः॥२०॥

यस्य पादे मकारतकारनकारा यकारद्वयञ्च तद्वृत्तं(५) कुसुमितलतावेल्लिता नाम। पञ्चसु षट्सु सप्तसु च यतिः॥ तत्रोदाहरणम्।

---

१ नीतिमार्गोपदेशमिति ख०, ग० च।

२ यमनसभलगणमुभयभमलकारगकाराश्च भवन्ति तद्वृत्तमिति ख०, ग०, पुस्तकान्तरपाठः।

३ तुहिनरमनाथे इति ख०, ग०, पुस्तकान्तरपाठः।

४ धृताविति ख०, पुस्तकान्तरपाठः।

५ मतौ तनभनसयभा यगणौ च सदिति ख०, पुस्तकान्तरपाठः।

तत्र कृतौ।

(२१२) सुवदना म्रौ भ्नौ य्भौ लगावृषिस्वरर्त्तवः ॥२२॥

यस्य पादे मकाररेफभकारनकारयकारभकारलकारगकारा भवन्ति तद्वृत्तं(१) सुवदना नाम। सप्तसु सप्तसु षट्सु च यतिः। तत्रोदाहरणम्।

या पीनोद्गाढतुङ्ग,-स्तनजघनघना,-भोगालसगति,-
र्यस्याः कर्णावतंसो,-त्पलरुचिजयिनी, दीर्घे च नयने।
श्यामा सीमन्तिनीनां, तिलकमिव मुखे, या च त्रिभुवने,
सम्प्राप्ता साम्प्रतं मे, नयनपथमसौ, दैवात् सुवदना ॥

(२१३) ग्लिति वृत्तम् ॥ २३ ॥

यस्य पादे गकारलकाराः क्रमेण भवन्ति तद्वृत्तं नाम वृत्तम्(१)। कृतिप्रकारेण(२) यावद्भिरेव पिंगलच्छन्दांसि पूर्य्यन्ते तावतां(३) ग्लां ग्रहणम्(४)। तत्रोदाहरणम्।

जन्तुमात्रदुःखकारि कर्म्म निर्म्मितं भवत्यनर्थहेतु
तेन सर्व्वमात्मतुल्यमीक्षमाण उत्तमं सुखं लभस्व।

---

१ मसगरसयभसगमनसयसगमसगलकारगकाराश्च तदिति ख॰, ग॰, पुस्तकान्तर-पाठश्च।

२ तद्वृत्तं वृत्त नामेति ख॰, ग॰, पुस्तकान्तरपाठश्च।

३ कृतिप्रकरणे इति ग॰।

४ तावत मेवेति ग॰, पुस्तकान्तरपाठश्च।

५ ग्रहणं विज्ञेयं गुरुलघुभिरिति ग॰।

धन्यानामेताः, कुसुमितलताः-वेल्लितोत्फुल्लवृक्षाः,
सोत्कण्ठं कूजत्,-परभृतकला,-लाप(१) कोलाहलिन्यः।
मध्यादौ माद्यन्,-मधुकरकुलोद्गीतझङ्काररम्या(२)
ग्रामान्तस्रोतः,-परिसरभुवः, प्रीतिमुत्पादयन्ति॥

अतिधृतौ।

(१११) शार्दूलविक्रीडितं म्सौ ज्सौ तौ गादित्यऋषयः॥२१॥

यस्य पादे मकारसकारौ जकारसकारौ तकारौ गकारश्च भवति, तद्वृत्तं(३) शार्दूलविक्रीडितं नाम। द्वादशभिः सप्तभिश्च यतिः। तस्योदाहरणम्।

कम्बुग्रीवमुदग्रवाहुशिखरं, रक्तान्तदीर्घेक्षणं,
शालप्रांशुशरीरमायतभुजं, विस्तीर्णवक्षःस्थलम्।
कोलस्कन्धमनुद्धतं(४) परिजने, गम्भीरमन्द्रस्वरं,(५)
राज्यश्रीः समुपैति वीरपुरुषं, शार्दूलविक्रीडितम्॥

इदानीं कृतिः प्रकृतिराकृतिः विकृतिः संकृतिरतिकृतिरुत्कृतिश्चेति(६) सप्तछन्दसः क्रमेणैकाक्षरवृद्ध्योदाह्रियन्ते॥

---

१ परभृतकुलालापेति ख०, ग०, पुस्तकान्तरपाठश्च।
२ मधुकरकुलोद्गीतझङ्काररम्येति ख०, पुस्तकान्तरपाठश्च।
३ तगणसगणौ जगणसगणौ तगणौ गकारश्च यदिति पुस्तकान्तरपाठः।
४ कोलस्कन्धमनुद्धतमिति ख०, ग०, पुस्तकान्तरपाठश्च।
५ गम्भीरमन्द्रस्वरमिति ख०, ग०, पुस्तकान्तरपाठश्च।
६ संकृतिरभिकृतिरुत्कृतीति ख०, ग०, पुस्तकान्तरपाठश्च।

तत्र क्रतो ।

(११२) सुवदना म्रौ भ्नौ य्भौ ल्गावृषिस्वरर्त्तवः ॥२२॥

यस्य पादे मकाररेफभकारनकारयकारभकारलकारगकारा भवन्ति तद्वृत्तं(१) सुवदना नाम । सप्तसु सप्तसु षट्सु च यतिः । तत्रोदाहरणम् ।

या पीनोद्गाढतुङ्ग,-स्तनजघनघना,-भोगालसगति,-
र्यस्याः कर्णावतंसो,-त्पलरुचिजयिनी, दीर्घे च नयने ।
श्यामा सीमन्तिनीनां, तिलकमिव मुखे, या च त्रिभुवने,
सम्प्राप्ता साम्प्रतं मे, नयनपथमसौ, दैवात् सुवदना ॥

(११३) ग्लिति वृत्तम् ॥ २३ ॥

यस्य पादे गकारलकाराः क्रमेण भवन्ति तद्वृत्तं नाम वृत्तम्(२) । इतिप्रकारेण(३) यावद्भिरेव पिंगलाक्षराणि पूर्य्यन्ते तावतां(४) ग्लां ग्रहणम्(५) । तत्रोदाहरणम् ।

जन्तुमान्दुःखकारि कर्म्म निर्मितं भवत्यनर्थहेतु
तेन सर्व्वमात्मतुल्यमीक्षमाण उत्तमं सुखं लभस्व ।

१ मगणरगणभगणनगणयगणभगणलघुकारगकाराश्च तदिति ख०, ग०, पुस्तकान्तर-पाठः ।

२ तद्वृत्तं इत नामेति ख०, ग०, पुस्तकान्तरपाठः ।

३ इतिप्रकारेण इति ग० ।

४ तावतामेवेति ग०, पुस्तकान्तरपाठः ।

५ पदच्छित्या गुरुभिर्लघुभिर्येति ग० ।

विद्धि बुद्धिपूर्व्वकं ममोपदेशवाक्यमेतदादरेण
वृत्तमेतदुत्तमं(१) महाकुलप्रसूतजन्मनां हिताय(२) ॥

अत्र पादान्ते यतिः ।

प्रकृतौ ।

(११७) स्रग्धरा म्रौ भ्नौ यौ य् त्रिः सप्तकाः ॥ २४ ॥

यस्य पादे मकाररेफभकारनकारास्त्रयश्च यकारा भवन्ति तद्वृत्त (३) स्रग्धरा नाम । सप्तसु सप्तसु सप्तसु च यतिः ॥ तस्योदाहरणम् ।

रेखा भ्रूः सुभ्रदन्त, द्युतिहसितधर, चन्द्रिकाचारुमूर्त्ति,-
माद्यन्मातङ्गलीला,-गतिरतिविपुला,-भोगतुङ्गस्तनी या।
रम्भास्तम्भोपमोरू, रलिमलिनघन,-स्निग्धधम्मिल्लहस्ता,
बिम्बोष्ठी रक्तकण्ठी, दिशतु रतिसुखं, स्रग्धरा सुन्दरीयम्॥

आकृतौ ।

(११८) मद्रकं भ्रौ नौ न्रौ न्गौ दिगादित्याः ॥ २५ ॥

यस्य पादे भकाररेफौ नकाररेफौ पुनर्नकाररेफौ नकार-गकारौ(४) च भवतस्तद्वृत्तं मद्रकं नाम । दशभिर्द्वादशभिश्च यतिः । तस्योदाहरणम् ।

---

१ इत्युत्तममिति ख०, पुस्तकान्तरपाठश्च ।

२ यदा हितादेति ख०, पुस्तकान्तरपाठश्च ।

३ मगणरगणभगणनगणास्त्रयश्च यगणाश्चेदिति ख०, ग०, पुस्तकान्तरपाठश्च ।

४ भगणरगणौ नगणरगणौ पुनर्नगणरगणौ नगणगकारौ इति पुस्तकान्तरपाठः ।

मद्रकगीतिभिः सकृदपि, स्तुवन्ति भवाय भवन्तमभवं,
भक्तिभरावनम्रशिरसः, प्रणम्य तव पादयोः सुकृतिनः।
ते परमेश्वरस्य पदवी,-मवाप्य सुखमाप्नुवन्ति विपुलं,
मर्त्यभुवं स्पृशन्ति न पुन,-र्मनोहरसुराङ्गनापरिवृताः॥

विकृतौ।

(११६) अश्वललितं न्जौ भ्जौ भ्जौ भ्गौ युद्राऽऽदित्याः॥२६॥

यस्य पादे नकारजकारौ भकारजकारौ पुनर्भकारजकारौ भकारलकारौ गकारश्च(१) तद्वृत्तमश्वललितं नाम। एकादशभिर्द्वादशभिश्च यतिः। तत्रोदाहरणम्।

पवनविधूतवीचिचपलं, विलोकयति जीवितं तनुभृतां,
वपुरपि हीयमानमनिशं, जरावनितया वशीकृतमिदं।
सपदि निपीडनव्यतिकरं, यमादिव नराधिपान्नरपशुः,
परवनितामवेक्ष्य कुरुते, तथापि हतबुद्धिरश्वललितम्॥

(११७) मत्ताक्रीडा मौ तौ नौ नौ न्लौ गवसुपञ्चदशकौ॥२७॥

यस्य पादे मकारौ तकारनकारचतुष्कं नकारगकारौ च(१) तद्वृत्तं मत्ताक्रीडा नाम। अष्टाभिः पञ्चदशभिश्च यतिः। तत्रोदाहरणम्।

---

(१) नकारजकारौ भकारजकारौ पुनर्भकारजकारौ भकारौ लकारगकारौ च भवत इति पुस्तकान्तरपाठः।

१ मकारौ, तकारौ नकारचतुष्कं लकारगकारौ चेति ग०, पुस्तकान्तरपाठः।

हृद्यं मद्यं पीत्वा नारी, स्खलितगतिरतिशयरसिकहृदया,
मत्ताक्रीडाल्लोलैरङ्गै,-र्मदमखिलविटजनमनसि कुरुते ।
वीतक्रीडाक्षीलालापै(१) श्रवणसुखसुभगसुललितवचना,
नृत्यैर्गीतैर्भ्रूविक्षेपैः, कलभणितविविधविहगकुलरुतैः ॥

सङ्कृती ।

(१९८) तन्वी भ्तौ न्सौ भौ न्याविन्द्रियस्वरमासाः ॥२८॥

यस्य पादे भकारतकारनकारसकारा भकारौ नकारयकारौ च(२) तद्वृत्तं तन्वी नाम। पञ्चसु सप्तसु द्वादशसु च यतिः ॥
तन्वोदाहरणम् ।

चन्द्रमुखी सुन्दरघनजघना, कुन्दसमानशिखरदशना या,
निष्कलवीणा,-श्रुतिसुखवचना,त्रस्तकुरङ्गतरलनयनान्ता(३)।
निर्मुखपीनोन्नतकुचकलसा,-मत्तगजेन्द्रललितगतिभावा,(४)
निर्भरलीला(५)निधुवनविषये(६)मुञ्चनरेन्द्र भवतु तव तन्वी॥

अभिकृती ।

---

१ वीतक्रीडाक्षीलोलालापैरिति ख०, पुस्तकान्तरपाठः।

२ भगणतगणौ नगणसगणौ भगणौ नगणयगणौ च भवत इति ग०, पुस्तकान्तरपाठः।

३ नयना चेति ख०, ग०, पुस्तकान्तरपाठः।

४ स्खलितगमना चेति ख०, ग०, पुस्तकान्तरपाठः।

५ निर्भरलोलेति ग०, पुस्तकान्तरपाठः।

६ निधुवनविषये इति ख०, पुस्तकान्तरपाठः।

(२९) क्रौञ्चपदा भ्मौ स्भौ नौ नौ ग्भूतेन्द्रियवसुपयः ॥२९॥

यस्य पादे भकारमकारसकारभकारा नकाराश्च चत्वारो(१) गकारश्च भवति, तद्वृत्तं क्रौञ्चपदा नाम । पञ्चभिः पञ्चभिरष्टभिः सप्तभिश्च यतिः । तस्योदाहरणम् ।

या कपिलाक्षी, पिङ्गलकेशी, कलिरुचिरनुदिन, मनु-नयकठिना,

दीर्घतराभिः, स्थूलशिराभिः, परिवृतवपुरति,-शय-कुटिलगतिः ।

आयतजङ्घा, निम्नकपोला, लघुतरकुचयुग,-परिचित-हृदया,

सा परिहार्य्या, क्रौञ्चपदा स्त्री, ध्रुवमिह निरवधि, सुखमभिलषता ॥

उत्कृती ।

(३०) भुजङ्गविजृम्भितं मौ त्नौ नौ सौ ल्गौ वसुरुद्र-र्त्तवयः ॥ ३० ॥

यस्य पादे मकारौ तकारनकारौ नकारौ रेफमकारौ

---

१ भगणमगणौ मगणभगणौ नगणाश्चत्वार इति पुस्तकान्तरपाठः । भमसभा नाश्चत्वार इति ख० ।

लकारगकारौ च(१) तद्वृत्तं भुजङ्गविजृम्भितं नाम। अष्टभिरेकादशभिः सप्तभिश्च यतिः। तत्रोदाहरणम्।

ये सन्नद्धानेकानीकै,-र्नरतुरगकरिपरिवृतैः समं तव शत्रवो,

युद्धश्रद्धालुब्धात्मान,-स्त्वदभिमुखमपगतभियः,-पतन्ति धृतायुधाः।

ते त्वां दृष्ट्वा सङ्ग्रामाग्रे, तुडिगनृप क्षपणमनसः, फलन्ति(२) दिगन्तरं

किं वा सोढुं शक्यन्ते कै,-र्भङ्गभिरपि सविषविषमं, भुजङ्गविजृम्भितम्॥

अथ कात्यायनेनाप्युक्तम्।

ध्यानैकाग्रा लग्ना दृष्टिः,(३) कमलमुखि लुलितमलकं, करे स्थितमाननं,

चिन्ताशक्ता शून्या बुद्धि,-र्द्विरदगतिपतितरसना, तनुस्तनानां गता।

---

१ मगणौ नगणनगणौ पुनर्नगणौ रगणसगणौ लकारगकारौ च भवत इति ग०, पुस्तकान्तरपाठः।

२ क्षपणमनसश्चलन्ति इति ग०, पुस्तकान्तरपाठः

३ दीना दृष्टिरिति च०, पुस्तकान्तरपाठः।

कृतयः समाप्ताः ॥

(१७१) दण्डको नौ रः ॥ ३२ ॥

इदानीं दण्डकजातयः कथ्यन्ते। यत्र पादे द्वौ नकारौ रेफाश्च सप्त(१) भवन्ति, दण्डको नाम सः। उत्कृतेः षड्विंशत्यक्षरायाः समनन्तरं दण्डकस्य पाठात् सप्तविंशत्यक्षरत्वमेव युक्तम्। सर्वेषां छन्दसामेकैकाक्षरवृद्ध्या प्रवृत्तेः। इत ऊर्ध्वं पुनरेकैकरेफवृद्ध्या प्रस्तारः। दण्डको नौ र इति श्रवणात्। तत्रोदाहरणम्।

इह हि भवति दण्डकारण्यदेशे स्थितिः पुण्यभाजां मुनीनां मनोहारिणी,
त्रिदशविजयिवीर्य्यदृप्तात्(२) दशग्रीवलक्ष्मीविरामेण रामेण संसेविते(३)।
जनकयजनभूमिसम्भूतसीमन्तिनीसीमसीतापदस्पर्शपूताश्रमे,
भुवननमितपादपद्माभिधानाम्बिकातीर्थयात्रागतानेकसिद्धाकुले ॥

अत्र पादान्ते यतिः।

---

१ नगणौ रगणाः सप्तेति ख॰, ग॰, पुस्तकान्तरपाठः।

२ वीर्यदीप्तेति ग॰, पुस्तकान्तरपाठः।

३ समेधिते इति ख॰, ग॰ पुस्तकान्तरपाठः।

(१३३) प्रथमश्चण्डवृष्टिप्रपातः ॥ ३३ ॥

यः सप्तविंशत्यक्षरपादः प्रथमो दण्डकः स चण्डवृष्टिप्रपातो नाम[१]। पूर्वमेवोदाहरणम्।

(१३४) अन्यत्र रातमाण्डव्याभ्याम् ॥ ३४ ॥

रातमाण्डव्याभ्यां ऋषिभ्यामन्यत्राप्यभिधान-
मेतदेव ताभ्यां पुनरन्यैव सञ्ज्ञा कृतास्य वृत्तस्य।
रातमाण्डव्यग्रहणं पूजार्थम्।

(१३५) शेषः प्रचित इति ॥ ३५ ॥

इतश्चण्डवृष्टिप्रपातादूर्द्ध्वं दण्डकप्रस्तारः[२] प्रचित इति सञ्ज्ञां लभते, पूर्वमेकैकाक्षरक्रमेण छन्दसां वृद्धिरुक्ता। इदानीन्तु रेफोपलक्षिताक्षरत्रयेण वृद्धिः। तस्योदाहरणम्।

प्रथमकथितदण्डकश्चण्डवृष्टिप्रपाताभिधानो मुनेः
पिङ्गलाचार्य्यनाम्नो मतः,

प्रचित इति ततः परं दण्डकानामियं जातिरेकैक-
रेफाभिवृद्धया यथेष्टं भवेत्।

स्वरुचिरचितसञ्ज्ञया तद्विशेषैरशेषैः पुनः काव्य-
मन्येऽपि कुर्व्वन्तु वागीश्वराः,

---

१ नाम भवतीति ख०, पुस्तकान्तरपाठः।

२ शेषो दण्डकप्रस्तार इति पुस्तकान्तरपाठः।

भवति यदि समानसङ्ख्याचरैर्यत्र पादव्यवस्था
ततो दण्डकः पूज्यतेऽसौ जनैः ॥

अत्र पादान्ते यतिः । इति दण्डकाः समाप्ताः ।

इति हलायुधकृतायां पिङ्गलच्छन्दोवृत्तौ सप्तमाध्यायः ॥

(१७६) अत्रानुक्तं गाथा ॥ १ ॥

अत्र शास्त्रे नामोद्देशेन यन्नोक्तं छन्दः प्रयोगे च दृश्यते तद् गाथेति मन्तव्यम् । (१)तत्र त्रिष्टुभि ।

(१७७) कुड्मलदन्ती भ्तौ न्गौ गिन्द्रियरसाः ॥ २ ॥

यस्य पादे भगणतगणौ नगणो गकारो च भवतस्तद्वृत्तं कुड्मलदन्ती नाम । पञ्चभिः षड्भिश्च यतिः । तत्रोदाहरणम् ।

कुड्मलदन्ती, विकटनितम्बा, किन्नरकण्ठी, लघुतरमध्या।
बिम्बफलोष्ठी, मृगशिशुनेत्रा, मित्र भवन्तं सुखयतु कान्ता ॥

जगत्याम् ।

(१७८) वरतनुर्न्जौ ज्रौ षड् रसाः ॥ ३ ॥

यस्य पादे नगण जगणौ जगण रगणौ च, तद्वृत्तं वरतनुर्नाम । षड्भिः षड्भिश्च यतिः । तत्रोदाहरणम् ।

---

१ निम्नलिखितं छन्दोजातं टीकाकारेणैव कृतं अन्यपुस्तकेषु दृश्यते ।

अयि विजहीहि, हृढोपगूहनं त्यज नवसङ्गमभीरुवल्लभम् ।
अरुणकरोद्गम,-म एष वर्त्तते, वरतनु सम्प्रवदन्ति कुक्कुटाः॥

(१७९) जलधरमाला म्भौ स्मौ समुद्रवसवः ॥ ४ ॥

यस्य पादे मगणभगणौ सगणमगणौ च भवतस्तद्वृत्तं जलधरमाला नाम। चतुर्भिरष्टाभिश्च यतिः। तदोदाहरणम् ।

धत्ते शोभां, कुवलयदाम्नः श्यामा,
शैलोत्सङ्गे, जलधरमाला लीना ।
विद्युल्लेखा, कनककृतालङ्कारा,
क्रीडासुप्ता, युवतिरिवाङ्के पत्युः ॥

(१८०) गौरी नौ रौ ॥ ५ ॥

यस्य पादे नगणौ रगणौ च भवतस्तद्वृत्तं गौरी नामेति गाथा । पादान्ते यतिः । तदोदाहरणम् ।

प्रणमति चरणारविन्दद्वयं, त्रिभुवननमितस्य गौरीपतेः ।
सकृदपि मनसैव यः सेवितः, प्रवितरति यथेष्टमष्टौ गुणान् ॥

इयमेव गौरी दण्डकात् पूर्व्वञ्च एकैकरेफवृद्धा नामान्तराणि लभते ।

(१८१) ललना भतौ न्सौ इन्द्रियर्षयः ॥ ६ ॥

यस्य पादे भगणतगणौ नगणसगणौ च भवतस्तद्वृत्तं ललना नाम गाथा। पञ्चभि. सप्तभिश्च यतिः। तत्रोदाहरणम्।

या कुचगुर्वी, मृगशिशुनयना, पीननितम्बा, मद-करिगमना।
किन्नरकण्ठी, सुरुचिरदशना, सा तव सौख्यं, वितरतु ललना ॥

अतिजगत्याम्।

(१८२) कनकप्रभा स्जौ स्जौ ग् ॥ ७ ॥

यस्य पादे सगणजगणौ पुनः सगणजगणौ गकारश्च, तद्वृत्तं कनकप्रभा नाम गाथा। पादान्ते यतिः॥ तत्रोदाहरणम्।

कनकप्रभा पृथुनितम्बशालिनी,
विपुलस्तनी हरिणशावकेक्षणा।
इयमङ्गना नयनयोः पथि स्थिता
कुरुते न कस्य मदनातुरं मनः॥

(१८३) कुटिलगतिर्नौ तौ ग् स्वरर्त्तव ॥ ८ ॥

यस्य पादे नगणौ तगणौ गकारश्च भवति, तद्वृत्तं कुटिलगतिर्नाम गाथा। सप्तभि. षड्भिश्च यतिः॥ तत्रोदाहरणम्।

अधरकिसलये, कान्तदन्तक्षते,
हरिणशिशुदृशां, नृत्यति भ्रूयुगम् ।
ध्रुवमिदमुचितं यदिपत्तौ सता-
मतिकुटिलगते, स्यान्मदानुत्सवः ॥

मकर्याम् ।

(१८४) वरसुन्दरी जभौ नौ गौ ॥ ९ ॥

यस्य पादे भगणजगणनगणनगणा गकारौ च भवत-स्तद्वृत्तं वरसुन्दरी नाम गाथा । पादान्ते यतिः । तस्योदाहरणम् ।

स्वादुशिशिरोज्ज्वलसुगन्धिजलपूर्णं,(१)
वीचिचयचञ्चलविचित्रशतपत्रम् ।
हंसकलकूजितमनोहरतटान्तं,
पश्य वरसुन्दरि सरोवरमुदारम् ॥

(१८५) कुटिला(२) म्भौ न्यौ गौ वेदरसससमुद्रा ॥ १० ॥

यस्य पादे मगणभगणनगणयगणगकारौ च भवतस्तद्वृत्तं कुटिला(२) नाम गाथा । चतुर्भिः षड्भिश्चतुर्भिश्च यतिः । तस्योदाहरणम् ।

---

१ स्वादुजलपूर्णमभितो परिपूर्णमिति पुस्तकान्तरपाठः ।
२,२ कुटिलेमिति पुस्तकान्तरपाठः ।

२८

अध्वस्थानां(१), जनयति सुख,-मुच्चैः कूजन्,
दात्यूहोऽयं, पथि निचुलनि,-तोयोपान्ते ।
कर्णाटस्त्री,-रतिकुहरित,-तुल्यच्छेदै,-
र्नादैः कण्ठ,-स्खलनकुटिल,-मन्दावर्त्तैः ॥

षष्ठी ।

(१८६) शैलशिखा भ्रौ न्भौ भ्गौ भूतरसेन्द्रियाः ॥ ११ ॥

यस्य पादे भगणरगणौ नगणभगणौ भगणो गकारश्च भवति तद्वृत्तं शैलशिखा नाम गाथा । पञ्चभिः षड्भिः पञ्चभिश्च यतिः । क्वचित् पादान्ते यतिं पठन्ति । तस्योदाहरणम् ।

शैलशिखानि,-कुञ्जशयितस्य, हरेः श्रवणे,
जीर्णतृणं क,-रेण निदधीत,(२) कपिश्वपचः ।
क्षुद्रवधाप,-वादपरिहार,-विनीतमते,-
स्तस्य नताव,-तैव लघुता हि,-पयूथभिदः ॥

(१८७) वरयुवती भ्रौ यौ न्गौ ॥ १२ ॥

यस्य पादे भगणरगणौ यगणमगणौ नगणो गकारश्च भवति, तद्वृत्तं वरयुवती नाम गाथा । पादान्ते यतिः । तस्योदाहरणम् ।

---

१ अध्वन्यानामिति पुस्तकान्तरपाठः ।

२ निदधातीति क० ।

कुञ्जरकुम्भपीठपीनोन्नतकुचयुगला,
पार्व्वणशर्व्वरीशगर्व्वापहमुखकमला।
पीननितम्बविम्बसंवाहनशिथिलगतिः,
मुञ्जनराधिराज भूयात्तव वरयुवतिः॥

अत्यष्टी।

(१८८) अतिशायिनी सौ ज्भौ ज्गौ ग् दिक्स्वराः॥१३॥

यस्य पादे सगणौ जगणभगणौ जगणो गकारौ च भवतस्तद्वृत्तं अतिशायिनी नाम गाथा। दशभिः सप्तभिश्च यतिः। तत्रोदाहरणम्।

इति धौतपुरन्ध्रिमत्सरान्, सरसि मज्जनेन,
श्रियमाप्तवतोऽतिशायिनी,-मपमलाङ्गभासः।
अवलोक्य तदैव यादवा,-नपरवारिराशेः,
शिशिरेतररोचिषाप्यपां, ततिषु मङ्क्तुमीषे(१)॥

(१८९) अवितथं न्जौ भ्जौ ज्लौ ग्॥१४॥

यस्य पादे नगणजगणौ भगणजगणौ जगणलकारौ गकारश्च भवति, तद्वृत्तमवितथं नाम गाथा भवति। यतिः पादान्ते। तत्रोदाहरणम्।

---

१ माघस्य ८ सर्गे ९ श्लोक।

श्रुतिपरिपूर्ण(१) वक्त्रमतिसुन्दरवाग्विभवं,
तमखिल(२) जैमिनीयमतसागरपारगतम् ।
अवितथवृत्तविप्रजनपूजितपादयुगं,
पितरमहं नमामि बहुरूपमुदारमतिम् ॥

(८९) वस्विन्द्रियसमुद्राश्वैन् कोकिलकम् ॥ १५ ॥

यस्य पादे पूर्व्वोक्ता गणा भवन्ति, अष्टाभिः पञ्चभिश्च तुर्भिश्च यतिर्भवति, तदृत्तं कोकिलकमिति गाथा । तस्योदाहरणम् ।

नवसहकारपुष्प, मधुनिष्कल, कण्ठतया,
मधुरतरस्वरेण, परिकूजति, कोकिलक ।
प्रथमककारविद्ध,-वचनैर्धन,-लुब्धमते,
तवगमनस्य भङ्ग, मिव सम्प्रति, कर्त्तुमनाः ॥

दूती ।

(९१) विबुधप्रिया सौं जौ भ्रौ वसुदिशः ॥ १६ ॥

यस्य पादे रगणसगणौ जगणौ भगणरगणौ च भवतस्तद्वृत्तं विबुधप्रिया नाम गाथा भवति । अष्टाभिर्दशभिश्च यतिः । तस्योदाहरणम् ।

---

१ श्रुतिपरिपूर्णेति पुस्तकान्तरपाठः ।

२ प्रमदिनमिति पुस्तकान्तरपाठः ।

कुन्दकुड्मलकोमल,-द्युतिदन्तपङ्क्तिविराजिता-
हंसगद्गदवादिनी, वनिता भवेद्विबुधप्रिया।
पीनतुङ्गपयोधर,-द्वयभारमन्थरगामिनी-
नेत्रकान्तिविनिर्जित,-श्रवणावतंसितकैरवा॥

(१८८) नाराचकं नौ रौ रौ॥ १७॥

यस्य पादे नगणौ रगणाश्चत्वारो भवन्ति, तद्वृत्तं नाराचकं नाम गाथा। दशभिरष्टभिश्च यतिः। तस्योदाहरणम्(१)।

रघुपतिरपि जातवेदो,-विशुद्धां प्रगृह्य प्रियां,
प्रियसुहृदि विभीषणे, सङ्क्रमय्य श्रियं वैरिणः।
रविसुतसहितेन तेना, नुयातः ससौमित्रिणा,
भुजविजितविमानरत्ना,-धिरूढः प्रतस्थे पुरीम्॥

अतिधृतौ।

(१८९) विस्मिता य्मौ न्सौ रौ ग्रसर्तुस्वराः॥ १८॥

यस्यपादे यगणमगणौ नसगणौ रगणौ गकारश्च भवति, तद्वृत्तं विस्मिता नाम गाथा। षड्भिः षड्भिः सप्तभिश्च यतिः। तस्योदाहरणम्(२)।

---

१ रघुवंशे।
२ माघे।

श्रिया जुष्टं दिव्यैः, सपटहरवै,-रन्वितं पुष्पवर्षै,-
र्वपुष्टश्चैद्यस्य, क्षणमृषिगणैः, स्तूयमानं निरीय।
प्रकाशेनाकाशे, दिनकरकरान्, विक्षिपद्विस्मिताक्षै,-
र्नरेन्द्रैरौपेन्द्रं, वपुरथ विशद्,-धामभीत्याम्बभूवे ॥

(१९५) शशिवदना न्जौ भ्जौ ज् ज्रौ रुद्रदिशः ॥ १९ ॥

यस्य पादे नगणजगणौ भगणो जगणास्त्रयो रगणश्च भवति, तद्वृत्तं शशिवदना नाम गाथा। एकादशभिर्दशभिश्च यतिः। पञ्चकावलीति केचित्। तस्योदाहरणम्।

तुरगशताकुलस्य परितः, परमेकतुरङ्गजन्मनः,
प्रमथितभूभृतः प्रतिपथं, मथितस्य भृशं महीभृता।
परिचलतो बलानुजबल,-स्य पुरः सततं धृतश्रियः,-
श्चिरविगतश्रियो जलनिधे, स्तदाभवदन्तरं महत्(१)॥

एवमादीनि वृत्तानि कोटिशः प्रस्तारेषु महाकविप्रयोगेषु च दृश्यन्ते। विशेषसञ्ज्ञाभावात्तानि शास्त्रकारेण नामनिर्देशं कृत्वा नोक्तानि, तानि गाथाशब्देन कथ्यन्ते। इदानीं प्रस्तारादीन् प्रत्ययानुपक्रमते। तत्र गायत्र्यादिप्रस्तारसिद्ध्यर्थमेकाक्षरप्रस्तारपूर्व्वकं द्व्यक्षरप्रस्तारं सूत्रद्वयेनाह।

---

१ माघस्य १५सर्गस्य ८९ श्लोक।

(१८८) द्विकौ ग्लौ ॥ २० ॥

उपरिष्टाद् गकारं लिखित्वाऽधस्ताल्लकारं विन्यसेदित्येकाक्षरप्रस्तारः। तस्य द्विकत्वाद् द्वौ ग्लौ द्विकौ स्थापयेत्। द्वे आवृत्ती प्रमाणमनयोरिति द्विकौ। सङ्ख्याया अतिशदन्तायाः कन्निति कन्प्रत्ययः। ततश्च गकारं ततोऽधस्ताल्लकारं लिखित्वा विस्पष्टार्थमधस्तिर्य्यग्रेखां दद्यात्। अधस्ताच्च पूर्व्ववद् गकारलकारौ स्थापयेत्। अत्र किं कर्त्तव्यमित्याह।

(१८९) मिश्रौ च ॥ २१ ॥

अनेन द्वितीयाक्षरप्रस्तारं दर्शयति। चकारः पूर्व्वप्रस्तारसमुच्चयार्थः। द्विकौ ग्लौ स्थापयित्वा अनन्तरं द्वितीयस्थानेषु(१) मिश्रौ ग्लौ विन्यसेत्। गकारो गकारेण संश्लिष्टो मिश्र उच्यते(२)। लकारश्च लकारेण। मिश्राविति(३) गकारलकाराभ्यां प्रत्येकमभिसम्बध्यते। द्वन्द्वात् परो यः श्रूयत इति न्यायात्। ततश्च प्रथमायामावृत्तौ गकारौ मिश्रौ स्थापयेत्, द्वितीयायां लकाराविति। ततो मध्ये लेखामपनयेत्। एवं चतुःप्रकारो द्व्यक्षरप्रस्तारो भवति। तद्यथा, गौ लगौ ग्लौ लाविति। इदानीं द्व्यक्षरप्रस्तारपूर्व्वकमेकैकाक्षरवृद्ध्या त्र्यक्षरादिप्रस्तारं दर्शयितुमाह।

(१९०) पृथग्ला मिश्राः ॥ २२ ॥

द्व्यक्षरप्रस्तारस्य पूर्व्वन्यायेन द्विकं लेखाविभक्तं स्थाप-

---

१ स्थानद्वितीये इति पुस्तकान्तरपाठः।

२ मिश्रः श्लिष्ट उच्यते इति ख०, ग०, पुस्तकान्तरपाठश्च।

३ मिश्रावपीति पुस्तकान्तरपाठः।

यित्वा तृतीयाक्षरस्थानेषु प्रथमावृत्तौ गकारा मिश्रा दातव्याः । द्वितीयावृत्तौ लकारा मिश्रास्ततो मध्ये द्वेगामपनयेत्(१) । एवं त्रिकः प्रस्तारः सिध्यति । पृथगिति विजातीयसंसर्गमाह । तेन प्रथमायामावृत्तौ न लकारप्रवेशः । द्वितीयायां न गकारस्य(२) । एवं त्रिकप्रस्तारं द्विः स्थापयित्वा(३) पृथग् ग्ला मिश्रा दातव्याः । इति चतुरक्षरप्रस्तारः । एवं तत्पूर्वकः पञ्चाक्षरप्रस्तारस्तथैव तत्पूर्वकः षडक्षरो गायत्रीसमवृत्तः प्रस्तारः ।

उष्णिगादीनामप्येकैकाक्षरवृद्ध्या(४) अयमेव न्यायः(५) तत्रेदं सूत्रं चाक्षरात्(६) प्रभृति पुनः पुनरावर्त्तनीयं यावदभिमतः प्रस्तारः ।

(१८) वसवस्त्रिकाः ॥ २३ ॥

एवं पूर्वोक्ते चाक्षरप्रस्तारे अष्टौ त्रिका जायन्ते, ते च मकारादयः शास्त्रादौ कथिता एव । प्रदर्शनार्थञ्चैतत् । तेन षोडश चतुष्का द्वात्रिंशत्पञ्चका भवन्ति । एवं चतुःषष्टिर्गायत्रीसमवृत्तानि सर्वगुरुलघ्वाद्यन्तानि भवन्ति । द्विगुणोत्तरमुष्णिगादीनामेकैकाक्षराधिक्याद् विस्पष्टार्थमिदं सूत्रं, प्रस्तारादेव सङ्ख्यापरिच्छित्तेः । नष्टवृत्तपरिज्ञानार्थमाह ।

---

१ लकारास्ततो मध्याद् द्वेगामपनयेदिति ख०, पुस्तकान्तरपाठः ।

२ लकारस्याप्रवेशो द्वितीयायां गकारस्येति पुस्तकान्तरपाठः ।

३ एवं त्रिकं द्विः स्थापयित्वेति ख०, पुस्तकान्तरपाठः ।

४ एकाक्षरवृद्धेति ख०, पुस्तकान्तरपाठः ।

५ अयमेव न्याय इति ख०, पुस्तकान्तरपाठः ।

६ चाक्षरचयात् इति पुस्तकान्तरपाठः ।

(२९९) लर्द्धे ॥ २४ ॥

यद्येवं विजिज्ञासेत गायत्र्याः समवृत्तं षष्ठं कीदृशमिति । तदा तमेव षट्सङ्ख्याविशेषमर्द्धयेत्, तस्मिन्नर्द्धीकृते लघुरेको लभ्यते(१) स भूमौ विन्यास्यः । इदानीमवशिष्टात् त्रिरिति सङ्ख्याविषमत्वादर्द्धयितुं न शक्यते, तत्र किं प्रतिपत्तव्यमित्याह ।

(३००) सैके ग् ॥ २५ ॥

अर्द्ध इत्यनुवर्त्तते । विषमसङ्ख्यायामेकमधिकं निक्षिप्य ततोऽर्द्धयेत्, तत्रैको गकारो लभ्यते, तं पूर्वलब्धात् लकारात् परं स्थापयेत्(२) । ततो द्विसङ्ख्यावशिष्यते, पुनस्तामर्द्धयेत्, ततश्चैकलकारं दद्यात् । ततश्चैकसङ्ख्यावशिष्यते, तत्र तावत् सैके गिति लक्षणमावर्त्तनीयं, यावद्वृत्ताक्षराणि षट् पूर्य्यन्ते । एवं सङ्ख्यान्तरेऽपि योज्यं उद्दिष्टवृत्तस्य सङ्ख्यापरिज्ञानार्थमाह ।

(३०१) प्रतिलोमगुणं द्विर्लाद्यम् ॥ २६ ॥

यस्य वृत्तस्य सङ्ख्यां जिज्ञासेत तद्भूमौ(३) प्रस्तारयेत् । ततस्तस्यान्ते यो लकारः सजातीयापेक्षया तमादौ कृत्वा प्रातिलोम्येन द्विरावर्त्तयेत् । तत्र निराकाराया आवृत्तेरसम्भवात् प्रथमातिक्रमे कारणाभावादेकसङ्ख्या लभ्यते । ततश्चैकसङ्ख्याद्वयमन्त्यलकारस्याधस्तात् स्थापयित्वा द्विगुणयेत्, ततस्तस्मादपनीय तत्-

१ लभ्यते इति पुस्तकान्तरपाठः ।

२ पूर्वलब्धात्परं स्थापयेदिति ख॰, ग॰ घ ।

३ तद्भूमिमिति पुस्तकान्तरपाठः ।

यित्वा तृतीयाक्षरस्थानेषु प्रथमावृत्तौ गकारा मिश्रा दातव्याः । द्वितीयावृत्तौ लकारा मिश्रास्ततो मध्ये लेगामपनयेत्(१)। एवं त्रिकः प्रस्तारः सिध्यति । पृथगिति विजातीयममर्गमाह। तेन प्रथमायामावृत्तौ न लकारप्रवेशः । द्वितीयायां न गकारस्य(२)। एवं त्रिकप्रस्तारं द्विः स्थापयित्वा(३) पृथग् ग्ला मिश्रा दातव्याः । इति चतुरक्षरप्रस्तारः । एवं तत्पूर्वकः पञ्चाक्षरः प्रस्तारस्तथैव तत्पूर्वकः षडक्षरो गायत्रीसमवृत्तः प्रस्तारः ।

उष्णिगादीनामप्येकैकाक्षरवृद्ध्या(४) अयमेव न्यायः(५) तत्रेदं सूत्रं चाक्षरात्(६) प्रभृति पुनः पुनरावर्त्तनीयं यावदभिमतः प्रस्तारः ।

(१९८) वसवस्त्रिकाः ॥ २३ ॥

एवं पूर्व्वोक्ते त्र्यक्षरप्रस्तारे अष्टौ त्रिका जायन्ते, ते च मकारादयः शास्त्रादौ कथिता एव । प्रदर्शनार्थञ्चैतत् । तेन षोडश-चतुष्का द्वात्रिंशत्पञ्चका भवन्ति । एवं चतुःषष्टिर्गायत्रीसमवृत्तानि सर्वगुरुलघ्वाद्यन्तानि भवन्ति । द्विगुणोत्तरमुष्णिगादीनामेकैकाक्षराधिक्याद् विस्पष्टार्थमिदं सूत्रं, प्रस्तारादेव सङ्ख्यापरिच्छित्तेः । नष्टवृत्तपरिज्ञानार्थमाह ।

---

१ लकारास्ततो मध्याद्गेखामपनयेदिति ख०, पुस्तकान्तरपाठश्च ।

२ लकारस्याप्रवेशो द्वितीयाया मकारस्येति पुस्तकान्तरपाठः ।

३ एव त्रिक द्वि स्थापयित्वेति ख०, पुस्तकान्तरपाठश्च ।

४ एकाक्षरवृद्धेति ख०, पुस्तकान्तरपाठश्च ।

५ अयमेव न्याय इति ख०, पुस्तकान्तरपाठश्च ।

६ चतुरक्षरात् इति पुस्तकान्तरपाठः ।

(१९९) लर्द्धे ॥ २४ ॥

यदेवं विजिज्ञासेत गायत्र्यां समवृत्तं षष्ठं कीदृशमिति । तदा तमेव षट्सङ्ख्याविशेषमर्द्धयेत, तस्मिन्नर्द्धीकृते लघुरेको लभ्यते(१) तं भूमौ विन्यस्यात् । इदानीमवशिष्टात् त्रिरिति सङ्ख्याविषयत्वादर्द्धयितुं न शक्यते, तत्र किं प्रतिपत्तव्यमित्याह ।

(२००) सैके ग् ॥ २५ ॥

अर्द्धे इत्यनुवर्त्तते । विषमसङ्ख्यायामेकमधिकं निक्षिप्य ततोऽर्द्धयेत, तत्रैको गकारो लभ्यते, तं पूर्वलब्धाल्लकारात् परं स्थापयेत(२) । ततो द्विसङ्ख्यावशिष्यते, पुनस्तामर्द्धयेत, ततश्चैकलकारं दद्यात् । ततश्चैकसङ्ख्यावशिष्यते, तत्र तावत् सैके गिति लक्षणमावर्त्तनीयं, यावद्वृत्ताक्षराणि षट् पूर्य्यन्ते । एवं सङ्ख्यान्तरेऽपि योज्यं उद्दिष्टवृत्तस्य सङ्ख्यापरिज्ञानार्थमाह ।

(२०१) प्रतिलोमगुणं द्विर्लाद्यम् ॥ २६ ॥

यस्य वृत्तस्य सङ्ख्यां जिज्ञासेत तद्भूमौ(३) प्रस्तारयेत । ततस्तस्यान्ते यो लकारः सजातीयापेक्षया तमादौ कृत्वा प्रातिलोम्येन द्विरावर्त्तयेत । तत्र निराकारायाः आवृत्तेरसम्भवात् प्रथमातिक्रमे कारणाभावादेकसङ्ख्या लभ्यते । ततश्चैकसङ्ख्याद्वमन्त्यलकारस्याधस्तात् स्थापयित्वा द्विगुणयेत, ततस्तस्मादपनीय तत्-

---

१ लभ्यते इति पुस्तकान्तरपाठः ।

२ पूर्वलब्धकात्परस्थापयेदिति म०, स० च ।

३ तद्वृत्तमिति पुस्तकान्तरपाठः ।

पूर्वस्य वर्णस्याधस्ताद्विधाय पुनर्द्विगुणयेत। पुनस्तदपि पूर्वस्यैव यावन्ति वृत्ताक्षराणि प्रातिलोम्येन समाप्यन्ते, तत्र याः सङ्ख्या निष्पद्यन्ते तावतिथं तद् वृत्तमिति। तत्र विशेषमाह।

(२०१) ततोऽप्येकं जह्यात्॥ २७॥

पूर्व्वोक्ते कर्म्मणि क्रियमाणे यदि सा सङ्ख्या गकारस्थानमापद्यते तदा तां द्विगुणयित्वा ततः सङ्ख्यासमुदायादेकं त्यजेत्, ततः पूर्व्वोक्तं कर्म्म कुर्य्यात्। ततः परिपूर्णत्वात्तद्वृत्तसङ्ख्या(१) सिध्यति। प्रस्ताराद्विना वृत्तसङ्ख्यापरिज्ञानार्थमाह।

(२०२) द्विरर्द्धे॥ २८॥

अपनीत इत्यध्याहारः। यदा जिज्ञासित षडक्षरे छन्दसि कति वृत्तानि भवन्ति, तदा तां छन्दोऽक्षरसङ्ख्यां भूमौ स्थापयित्वा ततोऽर्द्धमपनयेत। तस्मिन्नपनीते द्वौ लभ्येते। ततस्तां द्विसङ्ख्यां भूमौ पृथक् प्रस्तारयेत। ततः शेषास्त्रयोऽक्षरसङ्ख्याया भवन्ति, तेषामर्द्धयितुमशक्यत्वात् किं कर्त्तव्यमित्याह।

(२०३) रूपे शून्यम्॥ २९॥

विषमसङ्ख्यातो रूपमपनीय तस्मिन्नपनीते शून्यं लभ्यते। तत् पूर्व्वलब्धाया द्विसङ्ख्याया अधस्तात् स्थापयेत, ततो द्विसङ्ख्यावशिष्यते, ततोऽर्द्धेऽपनीते पुनर्द्विसङ्ख्या लभ्यते, तां शून्याधस्तात् स्थापयेत, ततो रूपे शून्यं लभ्यते, तद् द्विसङ्ख्याया अधस्तात् स्थापयेत्। ततः किं कर्त्तव्यमित्याह।

---

१ परिपूर्णां इत्यधिकं क्वचित् पुस्तकान्तरपाठ।

(२०५) द्विः शून्ये ॥ ३० ॥

शून्यस्थाने द्विरावृत्तिं कुर्य्यात्। तत्र निराकाराया आवृत्तेरसम्भवात् प्रथमातिक्रमे कारणाभावात् एकसङ्ख्या लभ्यते। तां शून्ये स्थापयित्वा द्विगुणयेत। ततो द्वौ भवतः। तस्योपरिष्टादर्द्धस्थानं द्विसङ्ख्याङ्कं(१) तदपनीय तस्य स्थाने तं द्विसङ्ख्याङ्कं(२) स्थापयेत। अनन्तरमिदं कर्त्तव्यमित्याह।

(२०६) तावदर्द्धे तद्गुणितम् ॥ ३१ ॥

यदर्द्धस्थाने(३) स्थितं सङ्ख्याजातं तत्तावद्गुणितं(४) कुर्य्यात्। एतदुक्तं भवति, स्वसङ्ख्ययैव गुणयितव्यमिति। ततो द्वौ द्वाभ्यां गुणितौ चत्वारो भवन्ति। तेषामुपरिष्टाच्छून्यस्थानं तत्र तानारोपयेत। अनन्तरं द्विः शून्य इति द्विगुणिता अष्टौ भवन्ति, तानर्द्धस्थाने निधाय तावद्गुणान् कुर्य्यात्। ततोऽष्टावष्टाभिर्गुणितायतुःषष्टिर्भवन्ति गायत्रीसमवृत्तानि। अनेनैव न्यायेनाष्टाविंशत्यधिकशतमुष्णिहः। षट्पञ्चाशदधिके द्वे शते(५) अनुष्टुभः। द्वादशोत्तराणि पञ्चशतानि बृहत्याः। चतुर्विंशत्यधिकं सहस्रं पङ्क्तेः। अष्टचत्वारिंशदधिके द्वे सहस्रे त्रिष्टुभः। षण्णवत्यधि-

१ द्विसङ्ख्याकमिति पुस्तकान्तरपाठः।

२ तां द्विसङ्ख्यामिति पुस्तकान्तरपाठः।

३ यत्तदर्द्धस्थाने इति पुस्तकान्तरपाठः।

४ तथावद्गुणमिति पुस्तकान्तरपाठः।

५ षट्पञ्चाशदधिकशतद्वयमिति पुस्तकान्तरपाठः।

कानि चत्वारि सहस्राणि जगत्याः। एवमतिच्छन्दसां सतीनाञ्च द्रष्टव्यम्।

(१०७) द्विर्द्व्यूनन्तदन्तानाम् ॥ ३२ ॥

गायत्रादिवृत्तसङ्ख्याजातं द्विगुणीकृत्य द्वाभ्यामूनं कुर्यात्। तत्तदन्तानां परिमाणं भवति, यस्य छन्दसः सङ्ख्या द्विगुणिता तत्पर्यन्तानां पूर्वेषामेकाक्षरप्रभृतीनां सङ्ख्या भवतीत्यर्थः।

(१०८). परेण पूर्णम् ॥ १६ ॥

तदेतत्(१)छन्दोवृत्तसङ्ख्याजातं द्विगुणितं पूर्णमेव(२) स्थापयितव्यं न द्व्यूनं। परे छन्दसि जिज्ञासिते तत् सङ्ख्याजातं द्विगुणितं परस्य छन्दसो वृत्तानां सङ्ख्या भवति। तद्यथा। चतुःषष्टिर्गायत्री समवृत्तानां सङ्ख्या(३) द्विगुणिता सती परस्योष्णिहः समवृत्तसङ्ख्याष्टाविंशं शत भवति॥

(१०९) परे पूर्णमिति ॥ १७ ॥

अतोऽनेकद्विविलघुक्रियासिद्ध्यर्थं यावदभिमतं प्रथमप्रस्तारवत् मेरुप्रस्तारं दर्शयति, उपरिष्टादेकं चतुरस्रकोष्ठं(४) लिखित्वा तस्याधस्तादुभयतोऽर्द्धनिष्क्रान्तं कोष्ठकद्वयं लिखेत,

१ तदेवेति पुस्तकान्तरपाठ।
२ पूर्णमेवेति पुस्तकान्तरपाठ।
३ समवृत्तसङ्ख्येति पुस्तकान्तरपाठ।
४ कोष्ठकमिति ख०, पुस्तकान्तरपाठश्च।

तस्याप्यधस्ताद्वयं[1] तस्याप्यधस्ताच्चतुष्टयं यावदभिमतं स्थानमिति प्रथममेरुप्रस्तारः। तत्र प्रथमे कोष्ठे[2] एकसङ्ख्यां व्यवस्थाप्य लक्षणमिदं प्रवर्त्तयेत्। तत्र परे कोष्ठे यद्वृत्तसङ्ख्या जातं तत् पूर्व्वकोष्ठयोः पूर्णं निवेशयेत। तत्रोभयोः कोष्ठयोरेकैकमङ्कं दद्यात्। ततस्तृतीयायां पङ्क्तौ पर्य्यन्तकोष्ठयोः परकोष्ठगतमेकैकमङ्कं दद्यात्। मध्ये कोष्ठे तु[3] परकोष्ठद्वयाङ्कमेकीकृत्य पूर्णं निवेशयेदिति पूर्णशब्दार्थः। चतुर्थ्यां पङ्क्तावपि पर्य्यन्तकोष्ठयोरेकैकमेव स्थापयेत। मध्यमकोष्ठयोस्तु परकोष्ठद्वयाङ्कमेकीकृत्य पूर्णं त्रिसङ्ख्यारूपं स्थापयेत्। उत्तरत्राप्ययमेव न्यासः।

तत्र[4] द्विकोष्ठायां पङ्क्तौ एकाक्षरस्य विन्यासः। तत्रैकगुर्वेकलघुवृत्तं भवति। तृतीयायां पङ्क्तौ द्व्यक्षरस्य प्रस्तारः। तत्रैकं सर्वगुरु द्वे एकलघुनी एकं सर्वलघ्विति कोष्ठक्रमेण वृत्तानि भवन्ति। चतुर्थ्यां पङ्क्तौ त्र्यक्षरस्य प्रस्तारः। तत्रैकं सर्वगुरु त्रीण्येकलघूनि त्रीणि द्विलघूनि[5] एकं सर्वलघु। तथा पञ्चमादिपङ्क्तावपि सर्वगुर्व्वादि सर्वलघ्वन्तमेकद्व्यादिलघु द्रष्टव्यमिति। षष्ठप्रत्ययोऽप्यर्द्धपरिच्छित्तिरित्येके। सोऽल्पत्वः

१ तस्याप्यधस्ताद्द्वयमिति पुस्तकान्तरपाठः।

२ प्रथमकोष्ठके इति ख०, ग० घ।

३ मध्यमकोष्ठे तु इति ख०, ग०, पुस्तकान्तरपाठश्च।

४ तत्रापीति पुस्तकान्तरपाठः।

५ त्रीणि त्रीणि एकद्विलघूनि इति पुस्तकान्तर पाठः।

त्वात् पुरुषेच्छानुविधायित्वेनानियतत्वाच्च नोक्तः। एवं प्रत्ययसमास.(१) समाप्तः॥

पिङ्गलाचार्यरचिते छन्दःशास्त्रे हलायुधः।
मृतसञ्जीवनीं नाम वृत्तिं निर्मितवानिमाम्॥

इति श्रीभट्टहलायुधकृतायां छन्दोवृत्तौ मृतसञ्जीवनीनाम्न्यामष्टमोऽध्यायः समाप्तः॥

म य द्वादश। धीः पञ्चदश। छन्दषोडश। पादः परोष्णिक् प्रस्तारपङ्क्तिर्विंशतिर्विंशतिरेकविंशतिः। देवतादितोऽष्टौ। चतुःशतं षष्ठो विंशतिर्विंशति। युगपरान्तिका त्रयोदश। वृत्तं गाथादौ विंशतिर्विंशतिः। यवमती त्रीणि। यतिर्विंशति.। वातोर्म्मी मष्टादश। प्रहर्षिणी विंशतिः। शार्दूलविक्रीडितं पञ्चदश। चत्रानुक्तं सप्तदश। इतित्यष्टादशच्छन्दः समाप्तम्॥

---

१ प्रत्ययविभाग इति पुस्तकान्तः